# BACK-TO-SHANKARA SERIES

१-४. ईशकेनमुण्डकोपनिषदः, तैत्तिरीयशीक्षावल्ली च – सटिप्पणशाङ्करभाष्यसंयुताः —

Shankara's Bhashyas on the **Isa, Kena, Mundaka Upanishads** and the **Sikshavalli of the Taittiriya**. Each of these books contains the Upanishad Text and a Critical Edition of the Bhashya in Devanagari sub-divided into paragraphs with appropriate Headings, Useful Foot-notes with reference to parallel passages in the other works of the great Acharya, a Summary of the Upanishad, an Index of important words in the Bhashya, and a thought-provoking Introduction, are other special features that enhance the value of the publication.

५. सुगमा – अध्यासभाष्यस्य नवीनव्याख्या, श्रीसच्चिदानन्देन्द्रसरस्वतीप्रणीता —

A new commentary on the famous Introduction to the Sutra-Bhashya by Shankara. Its sole object is to represent Shankara's teaching in all its pristine glory.

६. माण्डूक्यरहस्यविवृतिः – श्रीसच्चिदानन्देन्द्रसरस्वतीप्रणीता —

An open sesame to the Mandukya with Gaudapada's Karikas. The New Sanskrit Commentary by Sri Swami Satchidanandendra Saraswati not only lays bare every esoteric doctrine taught or implied in the Karikas, but also effectively removes all misconceptions that have gathered round Gaudapada's teachings.

७. तैत्तिरीयभाष्यार्थविमर्शिनी – आनन्दवल्ली भृगुवल्ली च व्याख्यासहिता —

The **Ananda and Bhrigu Vallies** of the Taittiriya Upanishad Bhashya with an original elaborate commentary by Sri Swami Satchidanandendra Saraswati in Sanskrit with Introduction and two Indexes.

८. वेदान्तडिण्डिमः —

Sri Narasimha Saraswati Swamiji's work. Critically edited with an original commentary by Sri Swami Satchidanandendra Saraswati.

९. मूलाविद्यानिरासः अथवा श्रीशङ्करहृदयम् —

An original work on Advaita Vedanta discussing the nature and destruction of Avidya according to Shankara.

१०. वेदान्तबालबोधिनी —

A commentary on the "Pratahsmarana-Stotram" of Sri Bhagavatpada in the form of a catechism.

**Adhyatma Prakasha Karyalaya, Holenarsipur.**

शुद्धशाङ्करप्रक्रियाप्रकाशकाः

# कतिचन वेदान्तग्रन्थाः

१. **ईशावास्योपनिषच्छाङ्करभाष्यम्** – विषयविभागानुसारेण प्रविभक्तग्रन्थशरीरम्, प्रतिप्रविभागप्रतिपाद्यविषयसूचकशिरोलेखोपेतम्, भाष्यान्तरसंवादिस्थलनिर्देशपूर्वकं टिप्पणालङ्कृतम्, जिज्ञासूपयोगिपरिशिष्टमन्त्रानुक्रमणिकाशब्दसूच्यादिसमेतं विचारप्रचोदकपीठिकायुक्तं च ॥

२. **केनोपनिषद्भाष्यम्** – ईशावास्यभाष्यवदेव सर्वपरिकरोपेतम् । अत्र भाष्यहृदयविसंवादिटीकाभिप्रायाः समालोचिताः । पदवाक्यभाष्ययोरेककर्तृकत्वमसंभावितमिति विमर्शनपूर्वकमुपादितं च ॥

३. **मुण्डकोपनिषद्भाष्यम्** – भूमिकाटिप्पणादिसंवलितम्, केनभाष्यवत् ॥

४. **माण्डूक्यरहस्यविवृतिः**–उपनिषद्व्याख्या, गौडपादीयकारिकाव्याख्या च । अत्र माण्डूक्योपनिषदि गर्भीकृतानि नैकानि रहस्यानि श्रीगौडपादाभिमतप्रक्रियानुसारेणोद्घाटितानि । श्रीशाङ्करभाष्योक्त्युपजीवनेनैव, उपनिषदः कारिकाणां चार्थो भाष्यान्तरसंधानेन व्याख्यान्तरदोषाविष्करणसहितं व्याकृतः । अर्वाचीनग्रन्थपुरावृत्ततत्त्वशोधकोद्भावितसौगतमतसंक्रान्तिशङ्कापङ्कप्रक्षालनव्याजेन गौडपादीया प्रक्रिया सुविशदीकृता च॥

५. **सुगमा** – अध्यासभाष्यस्य नवीनव्याख्या श्रीसच्चिदानन्देन्द्रसरस्वतीप्रणीता । अत्र भाष्यकारोक्त्युपजीवनेनैव शाङ्करवेदान्तप्रक्रिया वाचकहृदयंगमीकृता । शुद्धसंप्रदायविरुद्धा एकदेशीयव्याख्याः परवादाश्च तत्र तत्र श्रुतियुक्त्यनुभवप्रातिकूल्यप्रकटनपूर्वकं निर्विशङ्कं निराकृताश्च ॥

६. **वेदान्तबालबोधिनी** – भगवत्पादीय' प्रातःस्मरणस्तोत्र 'व्याख्या, प्रश्नोत्तररूपा, पारिभाषिकशब्दविवरणपट्टिकासमेता । शुद्धशाङ्करवेदान्तप्रक्रियापरिचयेप्सूनां परमोपकारिणी ॥

७. **तैत्तिरीयोपनिषदि–आनन्दवल्ली भृगुवल्ली च** – अत्र उपनिषदं खण्डशो विभज्य शाङ्करभाष्यसंयोजनेन विभूष्य श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिभिः तत्र तत्र भागशो भाष्यार्थविमर्शनार्थं निवेशिता स्वोपज्ञा सर्वार्थसंदर्शिनी व्याख्या ॥

८. **वेदान्तविद्वद्गोष्ठी**–शाङ्करभाष्यव्याख्यानप्रस्थानयोः अविद्याविषये, प्रातिभासिकवस्तूत्पत्तिविषये सौषुप्ताविद्याविषये च वैलक्षण्यमधिकृत्य एकादशानां विद्वत्प्रकाण्डानाम् अभिप्रायप्रतिपादकलेखनसंग्रहरूपो ग्रन्थः ॥

— प्राप्तिस्थानम् —

**अध्यात्मप्रकाशकार्यालयः, होळेनरसीपुरम्**
**(हासन जिल्ला, मैसूरु संस्थानम्, दक्षिण रेल्वे.)**

# THE UPANISHADS
# WITH
# SRI SHANKARA'S COMMENTARY

# श्रीशाङ्करभाष्यसंयुता उपनिषदः

# MANDUKYA RAHASYA VIVRITI

## (An open sesame to the Mandukya)

SOME OPINIONS

1 Very useful to the students of Adwaita Vedanta who follow the modern method as well as the ancient one. Swamiji's Commentary on the Karikas, shows the depth of his knowledge in the subject, the clarity of his expression and his lucidity in style.

— *The Sunday Standard*

2 This is not merely a commentary on the Karika of Gowdapada. The author covers a much wider ground, taking into account all relevant criticism, and discusses threadbare the implications of the Adwaita standpoint *vis a vis* the other systems.

— *The Vedanta Kesari*

3 The Introduction in English and the Bhumika in Sanskrit, are both scholarly and valuable ...... The language is easy and forcible ...... This is a book that requires and deserves careful study. — *The Prabuddha Bharata*

4 It is an erudite and scholarly work explaining the Upanishad and Karika passages fully and thoroughly with appropriate headings, and often criticises views held by others ...... The language employed in the commentary is majestic and beautiful, and one rarely comes across such writing nowadays. — *The Hindu*

THE

ADHYATMA PRAKASHA KARYALAYA,

HOLENARSIPUR. (Hassan District, Mysore State, S. Rly.)

अध्यात्मग्रन्थावलिः

THE

# KATHAKA UPANISHAD

WITH

**Shri Shankara's Commentary**

Edited with Notes

*By*

SRI SRI SWAMI SATCHIDANANDENDRA SARASWATI

# काठकोपनिषत्

श्रीशाङ्करभाष्यसंयुता

श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिभिः

सशोधिता भाष्यटिप्पणेन समलङ्कृता च

क्रमाङ्कः ११३

होळेनरसीपुरे
अध्यात्मप्रकाशकार्यालये
प्राकाश्यं नीता

शकाब्दाः १८८४

**First Edition 1962**
**1000 Copies**

*All Rights Reserved*
by
The Adhyatma Prakasha Karyalaya,
Holenarsipur, Mysore State.

*Printed in India*
**by**
**Y. Narasappa**
**at**
**The Adhyatma Prakasha Press, Holenarsipur.**

# GENERAL PREFACE

The present edition of Sri Shankaracharya's Upanishad-Bhashyas, is intended for readers who wish to have at a moderate price the plain text of Shankara's works unencumbered by commentaries and sub-commentaries but provided with such aids to study as a beginner is likely to need in appreciating the original.

Every volume of the series has been provided with an Introduction, Short Notes on points of special interest, References to parallel passages in the other works of the great Acharya, a Summary of the Upanishad, and an Index.

It is hoped that the systematic division of the text into paragraphs with indication of important various readings, the tracing of quotations to their originals, and the close attention paid to typographical details will all combine to make this edition specially convenient for the earnest reader.

*PUBLISHERS*

# INTRODUCTION

## The Place of the Upanishad

The Katha Upanishad has to be inferred as belonging to the Kathaka recension of the Krishna Yajurveda, merely on the strength of the title it bears. For we do not find any followers of that branch, who are actually reciting it nowadays. The relation of the Upanishad to the other portions of that recension of the Veda, has not been indicated by any commentator on the Upanishad. Shankara, in particular, affords no clue whatever either in his Introduction or in the body of his Bhashya, which may lead one to determine the place of the Upanishad. The incomplete nature of the Published portion of the Kathaka portion, adds to our difficulty, for while the Samhita of the recension has been printed both in Germany and in our own country, its Brahmana portion has not yet been accessible to scholars.

It is a source of some solace, therefore, to find that a portion of the Upanishad, the dialogue between Yama and Nachiketas, has its counter-part in the Taittiriya Brahmana, and a sort of redaction in the Maha-Bharata. The story as found in the latter, has been given in detail in the Sanscrit Introduction. It will be seen that the narrative there, has little or

nothing in common with the Upanishad. The incident of Nachiketas being cursed by his wrathful father to see Yama, is not in connection with a sacrifice. Yama sends him back to life after showing him the various heavenly worlds which righteous men attain, especially the Loka which the gift of cows ensures. The version in the Taittiriya bears more points of resemblance. The third boon granted by Yama, however, the knowledge of the Highest Brahman transcending the sphere of all religious works, is conspicuous by its absence there. The relevant portion with Sayana's Bhashya, has been appended to the present edition of the Upanishad for the convenience of the reader.

What has become of the Kathaka Brahmana, is yet wrapped up in mystery. Patanjali, in his great commentary on Panini (4-3-101), remarks that 'The Kathaka and the Kalapaka are being recited in every village.' And yet the Brahmana of that widely studied Veda, has been fated to be thrown into the limbo of oblivion! A portion of the Taittiriya Brahmana, the third Ashtaka, contains a portion - from the tenth Prashna onwards - which the present day traditional reciters style 'the Kathaka'. It is note-worthy that the first two Ashtakas of the Brahmana contain only eight Prashnas, whereas the third alone comprises twelve, thus rendering its title Ashtaka (octad) a misnomer. Can it be, that, as the Kathaka fell into more and more disuse, the followers of the Taittiriya appropriated this portion of it, out of affection for a version of their own Shakha?

## The Teaching of the Upanishad

In his Introduction to the Bhashya, Shankara calls both the Agni-vidya ( knowledge of Virat or Lower Brahman ) and the knowledge of Brahman transcending all religious works, by the name of 'Upanishad'. It is obvious, however, by his introductory observations on the twentieth mantra of the first Valli, that he regards the knowledge of the Higher Brahman as pre-eminently 'The Upanishad'. 'The innate ignorance of the nature of super-imposition of the notions of action, instruments of action, and the fruits of action', he says, 'has got to be destroyed by the knowledge of the identity of Brahman and Atman to be treated of in the sequel' (23)[1].

## The Special Features of the Bhashya

### THE DOCTRINE OF CONJUNCTION OF RITES AND KNOWLEDGE NOT DISCUSSED

Shankara has not entered here into a lengthy discussion of the demerits of the doctrine of the conjunction of rites and knowledge as a means to liberation, for the obvious reason that the doctrine is ruled out by the very nature of the third question propounded by Nachiketas. He requests Yama to enlighten him as to the nature of reality which is beyond all religious works, and Yama's answer to it forms the main theme of this Upanishad.

---

1. Single figures thus enclosed in brackets refer to the number of the paragraph in the Bhashya.

AVIDYA AND MAYA

In an important passage (1-1-20) which we have already referred to, Shankara describes Avidya as the seed of Samsara or transmigration (स्वाभाविकस्याज्ञानस्य संसारबीजस्य); and in commenting on the expression महतः परमव्यक्तम् (1-3-11) 'the Avyakta is greater than the Mahat', he describes Avyakta also as the 'seed' of the world (अव्यक्तं सर्वस्य जगतो बीजभूतम्, अव्याकृतनामरूपसतत्त्वम्); while in explaining गूढोऽऽत्मा न प्रकाशते (1-3-12) 'this hidden Atman does not shine forth', he says that the Atman is 'enveloped in Avidya-Maya' (गूढः संवृतः दर्शनश्रवणादिकर्मा अविद्यामायाच्छन्नः). Putting these statements together, some have drawn the corollary that Avidya and Maya are perfectly identical, and hence it is wrong to make any distinction between them in Shankara's Vedanta.

A close examination of the Sutra-Bhashya, however, reveals that Avidya is false-knowledge ('तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते', 'अध्यासो नामातस्मिंस्तद्बुद्धिरित्यवोचाम', 'मिथ्याप्रत्ययरूपः' Int. S. B.), whereas Maya is something objective, falsely imagined by Avidya to exist ('अविद्याकल्पिते नामरूपे .... ईश्वरस्य माया, शक्तिः, प्रकृतिः S. B. 2-1-14). In his commentation of the Sutra devoted to the elucidation of the connotation of the term Avyakta (B. S. 1-4-3), Shankara gives two alternative interpretations, one treating it as the objective Maya and the other as the subjective Avidya or ignorance, thus disclosing that he does not identify the two concepts. Hence I have explained the passage treating of स्वाभाविकाज्ञान (1-1-20) as meaning that the innate ignorance of man, is responsible

for all the evils of mundane life, while the passage on Avyakta (1-3-1I) I have intrepreted to describe the seed or material cause of the world (सर्वस्य जगतो बीज-मव्याकृतमतत्त्वम् ) in conformity with the Brihadaranyaka (1-4-7) and the Sutra-Bhashya (2-1-14) already cited. Amarakosha, the dictionary of Sanscrit synonyms, ( हेतुर्ना कारणं बीजम् ) is favourable to either interpretation and so, the context alone can justify the meaning we choose. Again the Bhashya (1-3-12) which describes Atman as enveloped in Avidya-Maya, I have taken to mean that the Self, appears, as the individual soul, to be enveloped by the conditioning adjuncts such as the organs of sight or hearing which, in reality, are the products of Maya, the figment of Avidya. The critical reader alone can judge as to which of the two views-the one identifying Avidya and Maya, and the other distinguishing them as subjective and objective - appeals to him as being consistent with the spirit of Shankara's Bhashyas.

### AGAMA AND TARKA

There are two words which, just like Avidya and Maya, are liable to be misunderstood. Some have taken 'Agama' invariably to mean Sruti or Revelation, and they believe that Sruti is to be entirely relied upon as the only means of acquiring Vedantic knowledge while 'Tarka' or reason is to be altogether eschewed in the case of Brahman, since the Sruti expressly declares that the knowledge of Brahman cannot be attained through ratiocination. But this view does not seem to fit in with the spirit of Shankara's commentary, since we find in the

Bhashya as well as in the Upanishad itself, a good deal of reasoning employed. Shankara's actual position in this matter can be gathered from his comment on the verse नैषा तर्केण... (1-2-9). "This knowledge of Atman is not to be attained through ratiocination or mere reasoning based upon one's own guessing; nor can it be sublated by that reasoning" (नैषा तर्केण स्वाभ्यूहमात्रेण आपनेया न प्रापणीया इत्यर्थः । न अपनेतव्या वा न हातव्या). "A mere speculator without the aid of Agama (तार्किको हि अनागमज्ञः), avers whatever his own intellect has devised. Hence this knowledge is to be got only through some one else than the dialectician, through an Acharya conversant with Agama." (37)

The 'Agama' here referred to, is the traditional method of teaching, which consists in the annulment, by reasoning, of the alien properties super-imposed upon the Self by Avidya, or innate ignorance. For this purpose, the line of reasoning suggested by the Sruti is to be preferred to dry ratiocination, since that is based upon universal experience. Examples of such Vedic reasoning, have been extracted from the body of the Upanishad, ( 1-3-10, 11, 12 ; 2-1-3 ; 2-1-4 ; 2-2-1 ) and adduced in the Sanscrit Introduction. It will be readily seen that these are no mere syllogisms of the logician, but rather helps to the seeker in rendering the Upanishadic teaching more and more intelligible by dissociating it from super-imposed elements.

## YOGA AND JNANA

In this Upanishad is to be found a certain Yoga taught once in the body of the work (अध्यात्म-

योगाधिगमेन धीरो 1-2-12), and again at the conclusion (विद्यामेतां योगविधिं च 2-3-18) as necessary for the knowledge of Atman. Now, what is the place of this Yoga in Shankara's system? There is a belief in certain quarters that Atman cannot be known fully through attending to Vedic teaching alone, unless one attains direct realization (साक्षात्कार) through the practice of Yoga. I have examined this view at some length in the Sanscrit Introduction and conclusively shown that, according to Shankara, the doctrine of the so-called realization after knowledge, is untenable, in as much as the Atman is for ever self-revealed, and never remote or obscured by anything other than ignorance. I have also drawn attention to the fact that Shankara teaches that a few gifted souls can and do realize their identity with Brahman through Upanishadic teaching alone (सकृदुक्तमेव S. B. 4-1-2), while for the rest of the aspirants who are not sufficiently introvert, the Adhyatma-Yoga or the art of withdrawing the senses and staying the mind on the Self, may be necessary before intuiting the real Atman.

### LIBERATION

With regard to final liberation from all bondage, the prevalent notion is that liberation in the present life is only secondary since there remains a residue of Avidya until the mortal coil is shuffled off. The Sanskrit Introduction shows the untenability of this view also. Shankara, no doubt, admits a gradual liberation in the case of the devotees of the Lower Brahman (109), but for those whose igno-

rance, desires and Karma are altogether destroyed simultaneously with the dawn of knowledge, Jivanmukti or liberation while yet living (इहैव) is an undeniable fact (80). Videha-Mukti or liberation after disembodiment is only figuratively called liberation, merely because the enlightened souls no more take on a fresh body. ( पुनः शरीरं न गृह्णातीत्यर्थः । )

## Conclusion

Shankara's system is thus seen to be quite dissimilar to any other Darshana in that (1) unlike the Karma-Mimamsakas and other Vedantins who rely on the authority of the Vedas, he holds that Sruti is a Pramana not merely on the score of its being the Veda, but because it leads to immediate experience of the truth it teaches; (2) unlike the Buddhistic Nihilists who declare the whole universe to be essenceless (निःस्वभाव), he maintains that there is one Reality which serves as the ground of all else which is super-imposed upon it; (3) unlike the Sankhyas and others who rely on cold ratiocination alone as the primary source of knowledge of the ultimate cause of the world, he appeals to the Vedic line of reasoning which rests upon verifiable experience at every step; and (4) unlike the followers of Patanjali and others who teach the practice of Yoga as the *sine qua non* for attaining and resting in the true nature of the individual self, he makes use of the Adhyatma Yoga only as a means to turn the mind inward by dissolving all unreal elements into the only Self which is the ground of all apparent phenomena.

## The Notes on the Upanishad

This small Upanishad contains many a gem of spiritual teaching which Shankara's Bhashya has brought to light. I have, therefore, edited it with the same care that has been taken with regard to the Kena and the Mundaka.

For my notes on this Upanishad, as elsewhere, I have depended upon Shankara himself rather than the glossators. Neither Anandagiri nor Balagopalendra-Yatindra can be trusted as safe guides throughout, since they are both very recent writers as shown in the Sanscrit Introduction.

My special Narayana Smaranams to Pandita Pravara **Sri. H. Ananta Murthy Sastrigal** and **Sri. Parakkaje Subrahmanya Bhatta,** Vedanta Siromani and Visharada, who have both looked through the manuscript and offered some useful suggestions.

I hope that this edition of the Kathaka Bhashya will be of some use to students who wish to have clear notions of the teachings of Shankara, through the constant remembrance of whose holy feet, I have been graced with some inkling of his philosophical method.

*Holenarsipur,*
6-7-62

*EDITOR.*

# भूमिका

## उपनिषदः स्थानम्

काठकसंज्ञितेयमुपनिषत् कृष्णयजुर्वेदीयकाठकारण्यकान्तर्गतेति समाख्यामात्रबलादनुमेया, यस्कारणमिदानीं तदारण्यकं कैश्चिदप्यधीयमानं नोपलभ्यते, न च भाष्यकारैः कैश्चिदपि तत्स्थानमिदंतया निर्दिष्टमस्ति । शङ्करभगवत्पादीयभाष्येऽपि न ग्रन्थसंबन्धो निबद्धो लिङ्गान्तरं वा दृश्यते, येन तस्य स्थानं निर्णेतुं शक्नुयामेति । यद्यपि शार्मण्यदेशेऽस्मद्देशे च काठकसंहिता संमुद्रितैव, तथापि काठकब्राह्मणं नाद्यावधि दृक्पथमानीतं ग्रन्थसंशोधकैरिति भास्या उपनिषदस्तेन संबन्धः शक्यनिर्धारणः ॥

तदस्मिन् व्यतिकरे यत्किञ्चिन्मोदावहमेतदेकम्, यदुपनिषदारम्भस्थिता मृत्युनचिकेतःसंवादरूपा आख्यायिका महाभारते आनुशासनिकपर्वण्येकाधिकसप्ततितमाध्याये, तैत्तिरीयब्राह्मणे च रूपान्तरेणाप्युपलभ्यत इति ॥

महाभारते तावदित्थं कथाशरीरम् – ऋषिरुद्दालकिर्दीक्षामुपगतो नाचिकेतं पुत्रं स्वोपचारे न्ययुङ्क्त । नियमसमाप्तौ च पुत्रमुवाच – व्यासक्तमनसा मया कुशेध्मादिकं विस्मृतं नदीतीरे, तदादाय गृहमागच्छेति । तत्र तु तेन पुत्रेणान्विष्यमाणमपि नावाप्तं नदीवेगाप्लुतत्वात् सर्वस्य । अतः प्रत्यावृत्याह – न पश्यामि किञ्चित्तत्रेति । पिता तु क्षुत्पिपासाश्रमार्दितस्तदाकर्ण्य 'यमं पश्य' इति सहसा तमशपत् । शापाभिहतो नाचिकेतः सद्यस्तत्रैव गतसत्त्वो न्यपतत् । अथोद्दालकिस्तं तदवस्थं दृष्ट्वा किं मया कृतमिति चिन्ताक्रान्तः पुत्रमनुशोचन्, तां रात्रिं परिदेवनेनैव तत्र निनाय । तेन मुक्तैरश्रुभिः सिक्तः पुत्रः पुनः संज्ञामवाप्तः । अतीव हृष्टेन पित्रा 'दिष्ट्या पुनरायातस्त्वम् । के लोका जितास्त्वया ? दिव्यवपुः किल दृश्यसे !' इति पृष्टः सर्वं यद् वृत्तं यमलोके तन्न्यवेदयत् ॥

इत्येवं शापतद्विमोचनवृत्तान्तो भारते । संवादः खल्वप्युपनिषद्वर्णितादन्यादृश एव तत्र । यमलोकं गतः किल नाचिकेतो वैवस्वतेन महर्षिकृतेऽर्घ्यादिभिः प्रपूजितो 'भवद्विषयं गतोऽस्मि यथाकर्म मम लोकान् विधत्स्व' इति प्रार्थयामास । यमस्तु प्रतिबभाषे " हे नाचिकेत, न त्वं मृतः । यमं पश्येति खल्वब्रवीत् पिता ।

नाहं तस्य महर्षेर्वचनं वितथं कर्तुमुत्सहे । तत् प्रतिनिवर्तस्व गृहान् प्रति । परं प्रस्थानात् पूर्वं किमप्यभीप्सितं वरं वृणीष्व, यतः प्रीतोऽहमतिथेस्ते " इति । नाचिकेतोऽवोचत् – 'यदि वरं दित्सुरसि, तर्हि पुण्यकृतां लोकान् द्रष्टुमिच्छामीति । वैवस्वतोऽपि तांल्लोकान् संदर्शयामास तस्मै, विशिष्य च यथाविधि गोदानं कृतवतां भोज्याः शश्वत्स्रोताः क्षीरस्य सर्पिषश्च नदीः प्रदर्श्य गोदानमाहात्म्यं प्रशशंसेति । इदं चात्रधेयं यद् भारते ऋषेर्नामोद्दालकिरिति, न त्वौद्दालकिः यथा प्रकृतोपनिषदि । पुत्रस्य नाम नाचिकेत इति, न तु नचिकेता यथात्रेति ॥

तैत्तिरीयकब्राह्मणे पुनरधिकतरं कथासाम्यं दरीदृश्यते कथानकस्योपनिषद्गतेनेत्यतस्तुलनात्मकविमर्शरसिकानामुपयोगाय स ग्रन्थभागः प्रस्तुतपुस्तकान्ते सायणभाष्यसंवलितो मुद्रापितोऽस्माभिः । परस्मिन्नदन्तरमस्ति तत्रापि कथासंविधाने यत् पितृशापाभिहतं नचिकेतसं दैवीवाक् समनुजग्राह यमलोककर्तव्योपदेशेनेति । वरास्तु तत्र नचिकेतसा प्रार्थिताः – (१) पितरं जीवन् प्राप्नवानीति, (२) इष्टापूर्तयोरक्षितिं ब्रूहीति, (३) पुनर्मृत्योरपचितिं ब्रूहीति च त्रयः । तथा च ब्राह्मणे नाचिकेताग्निचयनोपासनलक्षणम् उपनिषदुदाहृतद्वितीयवरविषयभूतमग्निविद्यासमाख्यं केवलमुपात्तं स्वर्गलोकापराभिधानब्रह्मलोकप्राप्तिफलम्, क्रममुक्तिफलकं वेति सुस्पष्टम् । तृतीयवरविशदीकृतमात्मयाथात्म्यज्ञानं तु नैव तत्र परामृष्टमिति सुमहद् वैलक्षण्यं ब्राह्मणारण्यकान्तर्गताख्यानयोः । अतो यावत् काठकारण्यकं ब्राह्मणं च न समासाद्यते, तावद् दुर्निर्धारण एवोपनिषदो गतग्रन्थेन संबन्ध इति प्राप्नोति ॥

'ग्रामे ग्रामे काठकं कालापकं च प्रोच्यते' इति व्याकरणमहाभाष्ये (पा. ४–३–१०१) समुपवर्णितं काठकाध्ययनमिदानीं जगद्भक्षककालवशं गतमित्यत्यन्तं शोचनीयमेतत् । ब्राह्मण्यरक्षकक्षत्रियभूमिपालानां वैरल्यात् प्रोत्साहनमलब्ध्वा एतच्छाखाध्येतारो ब्राह्मणवंश्या अध्यापनसंप्रदायप्रवर्तने औदासीन्यमापुरिति संभाव्यते । तत्रेदमपि नासंभावितं यदुच्छिन्नप्रायाध्ययनसंप्रदायं काठकमुपलभ्य तैत्तिरीयाः केचित् तद् ब्राह्मणं कृष्णयजुर्वेदाभिमानित्वात् स्वीचक्रुः परिरक्षणायेति । अस्ति हि संप्रतितनी वैदिकी प्रथा यत् तैत्तिरीयब्राह्मणस्य तृतीयाष्टकदशमप्रश्नमारभ्य यावत् समाप्ति परिशिष्यमाणं काठकमित्येव व्यपदिश्यत इति । तत्राद्याष्टकद्वये प्रत्येकमष्टावेव प्रश्नाः सन्ति । तृतीय एव त्वष्टके द्वादश पठ्यन्त इत्येतदप्यष्टकसमाख्यानानानुगुण्यं यथोक्तसंभावनोपोद्दलकमिव भाति । एतत्प्रसङ्गतस्तैत्तिरीयारण्यकभाष्यवाक्यानि सायणाचार्यलिखितानि समालोचनीयानि संशोधकैः –

सावित्रो नाचिकेतश्च चातुर्होत्रस्तृतीयकः ।
तुर्यो वैश्वसृजस्तद्वद्वह्निरारुणकेतुकः ।
स्वाध्यायब्राह्मणं चेति सर्वं काठकमीरितम् ॥
नारण्याधीतिनियमः सावित्रादिचतुष्टये ।
अतस्तद्ब्राह्मणग्रन्थे श्रुतं व्याख्यातमप्यदः ॥
वह्निरारुणकेत्वाख्यः काठके पञ्चमः श्रुतः ।
आरण्यकादावाम्नातस्तद्व्याख्याथ प्रतन्यते ॥

इति । भट्टभास्करीयतैत्तिरीयब्राह्मणभाष्ये तृतीयाष्टकस्यान्ते 'एवमश्वमेधान्तानि तित्तिरिप्रोक्तानि काण्डानि व्याख्यातानि । अथ काठकाग्निकाण्डान्यष्टौ' इति तु यल्लिखितं तदपि तैत्तिरीयब्राह्मणे कठब्राह्मणसमावेशं संभावयतीव[1] । तिष्ठतु तावत् कथं काठकब्राह्मणमारण्यकं वा विरलप्रचारमासीदिति चिन्ता, कठोपनिषदियं कृष्णयजुर्वेदान्तर्गता इति तर्कस्तु सर्वसंमत इत्येतावदेवेदानीं शक्यावगम इत्युपरमामोऽधिकाभ्यूहपरंपरानुधावनात् ॥

## उपनिषत्प्रतिपाद्यविषयः

भगवत्पादैर्भाष्यकारैर्यद्यपि ग्रन्थावतरणिकायाम् उपनिषच्छब्दनिर्वचन-व्याजेन ब्रह्मयाथात्म्यज्ञानम्, अग्निविद्या चेत्युभयमप्युपनिषच्छब्दवाच्यमिति ब्रुवाणैः (खं. २-३) परापरब्रह्मविद्याद्वयं प्रकृतोपनिषत्प्रतिपाद्यमित्यर्थादुक्तं भवति, 'अग्निविद्या पृष्टा प्रत्युक्ता च । तस्याश्च फलप्राप्तिप्रकारो वक्तव्यः' (खं. १०७) इति च कण्ठरवेणोपनिषदभिधेयत्वं स्वीकृतमस्याग्निविद्याया अपि; तथापि तृतीयवरगोचरमात्मयाथात्म्यज्ञानमेव प्राधान्येनोपनिषदभिधेयमभिप्रेतं तेषामिति प्रथमवल्लीविंशतितममन्त्रावतरणिकाग्रन्थादवगम्यते । 'एतावद्व्यतिक्रान्तेन विधि-प्रतिषेधार्थेन मन्त्रब्राह्मणेनावगन्तव्यं यद् वरद्वयसूचितं वस्तु, नात्मतत्त्वविषय-याथात्म्यविज्ञानम् । अतो विधिप्रतिषेधार्थविषयस्यात्मनि क्रियाकारकफलाध्यारोपण-लक्षणस्य स्वाभाविकस्याज्ञानस्य संसारबीजस्य निवृत्त्यर्थं तद्विपरीतब्रह्मात्मैकत्वविज्ञानं क्रियाकारकफलाध्यारोपणशून्यम् आत्यन्तिकनिःश्रेयसप्रयोजनं वक्तव्यमित्युत्तरो

---

1. एवं तैत्तिरीयारण्यकस्यान्तिमं प्रपाठकत्रयं केचित् काठकारण्यकत्वेनाङ्गीकृत्य प्राकाश्यं नीतवन्त इति भट्टाचार्य श्रीपाद दामोदर सातवलेकर - इत्येतेषां काठकसंहिताप्रस्तावे लिखितमस्ति । काठकसामान्यगता विचारा इतोऽप्यधिकतरं बहुलमुपलभ्यन्ते तत्र संहिताप्रस्तावे, तत एव चाधिगन्तव्या वाचकैरिति न संगृहीताः । प्रकृतानुपयोगात् ॥

ग्रन्थ आरभ्यते । (खं॰ २३) इति हि तद्भाष्यम् । युक्तं चैतत् । नचिकेतसा ह्यग्निविद्यासमधिगमानन्तरम् 'अन्यत्र धर्मादन्यत्राधर्मात्' इति विधिनिषेधार्थविलक्षणम्, 'अन्यत्रास्मात्कृताकृतात्' इति कार्यकारणभावासंपृक्तम्, 'अन्यत्र भूताच्च भव्याच्च' इति कालत्रयापरिच्छिन्नं च वस्तुविषयं हि दर्शनं पृच्छ्यते (१-२-४)। न चैतादृशं वस्तु कथञ्चन साध्यरूपकर्मोपासनाशेषभूतं भवितुमर्हतीति ॥

## भाष्ये जिज्ञासुभिरवधेया विषयाः

### ज्ञानकर्मसमुच्चयनिराकरणे हेतुः –

तदेवं क्रियाकारकफलभेदात्मकात् सर्वथा वैलक्षण्यादेव पृष्टस्य वस्तुनः, प्रश्ननिर्णयोऽपि तादृशवस्तुविषय एव भवितुमर्हतीति श्लिष्यते । अत एव च यमः परब्रह्मविषयकं ज्ञानं स्तुवन् साध्यसाधनगोचरं ज्ञानं निन्दति तस्याविद्याकामकर्मक्षेत्रानतिवर्तित्वं ज्ञापयितुम् 'श्रेयो हि धीरोऽभिप्रेयसो वृणीते, प्रेयो मन्दो योगक्षेमाद् वृणीते' (१-२-२) इति, 'नैतां सृङ्कां वित्तमयीमवाप्तो यस्यां मज्जन्ति बहवो मनुष्याः' इति, 'विद्याभीप्सिनं नचिकेतसं मन्ये न त्वा कामा बहवोऽलोलुपन्त' (१-२-४), 'अविद्यायामन्तरे वर्तमानाः ...' (१-२-५) इति च । तदित्थं ब्रह्मविद्याफलं सर्वथा साधनसाध्यविलक्षणमिति प्रश्नतन्निर्णयाभ्यां सुस्फुटत्वादेव स्यादाचार्यैरत्र ज्ञानकर्मसमुच्चयवादनिराकरणे न पृथग्यत्न आस्थितः, अविद्यानिवर्तकब्रह्मविद्यास्वरूपविशदीकरणमेव स्यादृतमत्रेति ॥

### अविद्या माया च –

अधस्तादुदाहृतभाष्यवाक्ये 'स्वाभाविकस्याज्ञानस्य संसारबीजस्य' (खं॰ २३) इत्यविद्यायाः संसारबीजत्वेन व्यपदेशात्, 'महतः परमव्यक्तम्' (१-३-११) इति मन्त्रव्याख्यानावसरे 'अव्यक्तं सर्वस्य जगतो बीजभूतम् अव्याकृतनामरूप सतत्त्वं .... अव्यक्ताकाशादिनामवाच्यम्' (३०, ५८) इत्यव्याकृतस्यापि बीजत्वेन वर्णनात्, समनन्तरोत्तरमन्त्रव्याख्याने 'एष पुरुषः सर्वेषु ब्रह्मादिस्तम्बपर्यन्तेषु भूतेषु गूढः संवृतः दर्शनश्रवणादिकर्मा, अविद्यामायाच्छन्नः' (खं॰ ५९) इत्यविद्यामायाशब्दयोःसमभिव्याहाराच्च स्यात् केचिद् व्याख्यातारो मन्यन्ते स्म भाष्यकारमते अविद्यैव माया मायैव चाविद्या नानयोर्भिदास्तीति । सूत्रभाष्यनिरूपणेन परमवगम्यते – अविद्या नाम ज्ञानपक्षस्यैव । 'तमेतमेवं लक्षणमध्यासं पण्डिता

अविद्येति मन्यन्ते ', ' अध्यासो नामातस्मिंस्तद्बुद्धिरित्यवोचाम ', ' मिथ्याप्रत्ययरूपः ', इति मिथ्याज्ञान एवाविद्याध्यासशब्दयोरभ्यासदर्शनात्, माया तु ज्ञेयपक्षस्यैव – ' अविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञस्येश्वरस्य माया, शक्तिः, प्रकृतिः – इति च श्रुतिस्मृत्योरभिलप्येते ' ( सू. भा. २-१-१४ ) इत्यविद्याकल्पितज्ञेयपदार्थत्वेन लक्षितत्वात् । अव्यक्तशब्दार्थनिरूपणप्रसङ्गेन च प्रवृत्ते ' तदधीनत्वादर्थवत् ' (वे. सू. १. ४-३) इति सूत्रभाष्ये ' अव्यक्ता हि सा माया । तत्त्वान्यत्वनिरूपणस्याशक्यत्वात् । तदिदं महतः परमव्यक्तम् इत्युक्तम् । अव्यक्तप्रभवत्वान्महतः यदा हैरण्यगर्भी बुद्धिर्महान् । यदा तु जीवो महान्, तदाप्यव्यक्ताधीनत्वाज्जीवभावस्य महतः परमव्यक्तमित्युक्तम् । अविद्या ह्यव्यक्तम् । ' इत्यव्यक्तशब्दशब्दितत्वेन मायाया अविद्यायाश्च पृथक्पृथग् विकल्प्य व्याख्यानादवगम्यते भाष्यकारस्य न मायाविद्ययोः समानार्थत्वमिष्टमिति । न चेहापि तथैव तयोर्भेदाङ्गीकारे कोऽपि विरोधः समस्ति । ' क्रियाकारकफलाध्यारोपणलक्षणस्य स्वाभाविकस्याज्ञानस्य संसारबीजस्य निवृत्त्यर्थम् ' (१-१-२०) इत्यत्राविद्याया एव क्रियाकारकाद्यध्यासरूपाया ब्रह्मात्मैकत्वविज्ञाननिवर्त्यत्वेनोपस्थापिताया एवाज्ञानशब्दत्वे सर्वथा सामञ्जस्यात् । तस्याज्ञानस्य संसारबीजत्वं तु सर्वानर्थहेतुत्वादुपपद्यते । ' हेतुर्ना कारणं बीजम् ' इति कोशात् । ' सर्वस्य जगतो बीजभूतमव्याकृतसतत्त्वम्' (१-३-११) इत्यत्र त्वव्याकृतनामरूपलक्षणस्याव्यक्तस्य नामरूपात्मकव्याकृतजगत उपादानकारणत्वोक्तिः । ' तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियत ' (बृ. १-४-७) इति श्रुत्यन्तरात्, ' अविद्याकल्पिते नामरूपे .... संसारप्रपञ्चबीजभूते ' इत्यादिसूत्रभाष्येणैकार्थत्वाच्च । ' अविद्यामायाच्छन्नः ' (१-३-१२) इत्यत्र पुनः – यत एवाविद्याकल्पितचक्षुःश्रोत्रादिलक्षणमायाकार्योपाविच्छन्न इव दर्शनश्रवणादिकर्मव्यापृतो लक्ष्यते, अत एव न प्रकाशते आत्मत्वेन कस्यचिदप्यज्ञस्य ; परमार्थतस्तु ' श्रोत्रस्य श्रोत्रं....चक्षुषश्चक्षुः ' (के. १-२) इत्यादिश्रुत्यन्तरोक्तनीत्या चक्षुःश्रोत्रादीनामपि स्वविषयव्यञ्जनसामर्थ्यं चक्षुराद्यसंहते नित्यस्वयंप्रकाशे सत्येव भवतीति नाविद्यामायाच्छन्नः कदाचिदपीत्यर्थोऽवसेयः । वक्ष्यति हीहापि ' येन रूपं रसं गन्धं .... एतेनैव विजानाति ' (२-१-३) इति । अत एवं सर्वं निराकुलमिति नात्राविद्यामायैक्यवादो कथमपि शङ्कनीय इति ज्ञेयम् ॥

## आगमतर्कयोरात्मज्ञानजनने कृत्यम् –

'अतर्क्यम्' (१-२-८), ' नैषा तर्केण मतिरापनेया ' (१-२-९)-इत्यादिश्रुतिभिस्तर्कस्य निराकरणात् तर्कस्य ब्रह्मात्मज्ञाने सुतरामनपेक्षितत्वम् शाब्दिक-

समधिगम्यत्वं च ब्रह्मणो मन्यन्ते केचिद् वादिनः। तन्न सम्यक्। यतोऽस्यामेवोपनिषदि नैके तर्काः प्रयुक्ता दरीदृश्यन्ते आत्मस्वरूपाधिगमनाय। भाष्यकाराणां तु मतम् अत्रैवंरूपम् – श्रुत्यनुगृहीतस्तदनुसारेण पुरुषकल्पितश्च तर्कोऽनुभवाङ्गत्वेन स्वीकार्यः। केवलतर्कस्तु पुरुषाभ्यूहमात्रलक्षणो न श्रुत्यर्थस्य सहकारी तदपबाधनसमर्थो वेति सर्वथा परित्याज्य इति। तथा हि भाष्येऽत्र व्याख्याता श्रुतिः 'नैषा तर्केण मतिरापनेया' (१–२–९) इति। 'नैषा तर्केण स्वबुद्ध्यभ्यूहमात्रेण आपनेया। न प्रापणीयेत्यर्थः। नापनेतव्या वा, न हातव्या।' इति हि भाष्यम्॥

इदमत्र तर्कस्य प्राबल्यदौर्बल्यविनिगमनाकारणम्। श्रुतिस्तावदागमप्रधाना स्वयमात्मज्ञानजननसमर्था। तत्र, आगमो नाम आत्मस्वरूपेऽध्यारोपितानाम् अतद्धर्माणामपनयनप्रकारविशेषः। अयं ह्यात्मा स्वतःसिद्धत्वात् स्वयंप्रकाशत्वाच्च स्वसिद्धौ न किमपि प्रमाणमपेक्षते। इन्द्रियार्थेभ्यो व्यावर्त्य मनसः प्रत्यगात्मस्रोतस्तया प्रवर्तनपूर्वकं वीक्षणमात्रमेव खलं तत्र। तथा च श्रुतिः– 'कश्चिद्धीरः प्रत्यगात्मानमैक्षत् आवृत्तचक्षुरमृतत्वमिच्छन्' (२–१–१) इति। अतः संप्रदायगतोऽयमध्यारोपितानात्मांशापह्नवेन केवलात्मोपदेश 'आगम' इत्युच्यते। श्रुतिश्चागमप्रकारेणैव बोधयन्त्यात्मानमित्यनुभवावसाना भवति 'अशब्दमस्पर्शमरूपमव्ययम्' (१–३–१५) इत्याद्या। अत एवाचार्योऽप्यागमाभिज्ञ एव आत्मबोधने समर्थो भवतीति श्रुतिरपि वक्ति 'प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ' (१–२–९) इति। व्याख्याता चेयं भाष्यकारैः 'येयमागमप्रभूता मतिः, अन्येनैवागमाभिज्ञेनाचार्येणैव तार्किकात् प्रोक्ता सती सुज्ञानाय भवति' (खं. भा. ३७) इति। तर्कस्तु केवलमतिकौशलाज्जायमानोऽनुभवमननुसरन् अप्रतिष्ठो भवेत्। बाधकतर्कस्य सर्वत्र सुलभत्वात्। तथा च भाष्यम्– तर्क्यमाणे अणुपरिमाणे केनचित् स्थापिते आत्मनि ततोऽणुतरमन्योऽभ्यूहति, ततोऽप्यन्योऽणुतरमिति। न हि तर्कस्य निष्ठा क्वचिद् विद्यते' (खं. ३६) इति। श्रुत्यनुगृहीतस्तु तर्कस्तदनुसारी वा लौकिको नियतमनुभवानुसारीति ततः प्रबलतरमित्युपपन्नम्। अत एव बृहदारण्यकादिभाष्येप्युक्तम् 'आगमोपपत्तिभ्यां हि निश्चितोऽर्थः श्रद्धेयो भवत्यव्यभिचारात्' (बृ. भा. ४–५–१) इति॥

प्रकृतश्रुत्यनुगृहीता आत्मस्वरूपाधिगमे सहायकास्तर्काः केचनेहोदाह्रियन्ते यथोक्तार्थग्रहणदार्ढ्याय –

(१) इन्द्रियाणि, मनोबुद्धिर्महानात्माऽव्यक्तं चेत्येतानि यथोत्तरं सूक्ष्मतराणि, व्यापकानि, तत्तत्प्रत्यगात्मभूतानि चेत्यतः पूर्वपूर्वप्रविलापनेनोत्तरोत्तरस्याधिगमो भवत्यात्मत्वेन। सर्वप्रत्यगात्मा च पुरुषशब्दवाच्यो ब्रह्माभिन्नः। ततोऽन्यस्य प्रत्यक्त्वस्याभावात्॥ (१–३–१०, ११, १२)

(२) येनैव विज्ञानस्वभावेनात्मना बाह्यान् रूपरसगन्धादीन् विषयान् आध्यात्मिकांश्च चक्षुरादीन् विजानाति लोकः, स एव सर्वज्ञः सर्वान्तर आत्मा धर्माधर्मायतीतः ॥ २-१-३.

(३) स्वप्नजागरितयोः सर्वं विज्ञेयं बाह्यमाध्यात्मिकं च येनात्मचैतन्येनोभयावस्थाव्यापकेन पश्यति लोकः, स एवात्मा अधिगन्तव्यः ॥ २-१-४.

(४) योऽयं कार्यकरणसंघाते तदसंहतस्तद्विलक्षणस्तिष्ठति नित्यचैतन्यस्वरूपः पुरस्वामीव पुरे, यदर्थं च सर्वोऽयं संघातः स्वव्यापारे नियतं वर्तते, स एष आत्मा नचिकेतसा पृष्टः ॥ (२-२-१)

नैते केवलानुमानरूपास्तर्काः, यतो न लिङ्गलिङ्गिसंबन्धज्ञानपूर्वकं किञ्चिदिहावगन्तव्यमस्ति । न च नित्यचैतन्यस्वरूपस्य सर्वान्तरस्य सर्वस्यात्मभूतस्य तर्केण किञ्चित् साध्येत, निराक्रियेत वा । तस्मादेतैस्तर्कैर्नित्यसिद्धत्वेनागमैकगम्ये आत्मन्यध्यारोपितमुपाधिकृतं मिथ्यारूपमपि तद्धर्मवत् परिकल्प्य तदपनयद्वारेण मनसः प्रत्यगात्माभिमुख्यसंपादनेन आगमसाहाय्यमाचर्यते केवलम् इत्यनुभवाङ्गत्वेन तदाश्रयणमविरुद्धमिति ॥

योगज्ञानयोः संबन्धः —

अथात्र श्रुतौ ज्ञानोपायत्वेन योगोऽप्युपदिष्टोऽस्ति- 'अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति '(१-२-१२) इति । उपसंहारे च 'मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वा । विद्यामेतां योगविधिं च कृत्स्नम् । ब्रह्मप्राप्तः' (२-३-१८) इत्युक्तम् । तत्रेदं निरूप्यम्-किं योगस्य वाक्यज्ञानप्राप्तिसमनन्तरमपि साध्यं किमप्यस्ति, किं वा केवलं वाक्यज्ञानाधिगमोपायमात्रत्वं तस्येति ? कश्चात्र विशेषः, यदि ज्ञानानन्तरमपि योगस्य कृत्यं भवेत् , यदि वा तस्य तत्पूर्वरूपत्वमेवेति ? अत्रोच्यते । यदि वाक्यज्ञानप्राप्त्यनन्तरमपि योगस्य कृत्यमवशिष्येत, ततो नागमैकसमधिगम्यम् आत्मवस्तु-इति प्राप्नोति । अथ पूर्वरूपत्वमेव योगस्यात्मज्ञानप्राप्तेः, तत आगमैकवेद्यम् आत्मवस्तु-इत्युपपद्यते । तदवश्यं निरूपणीयमेतत् । तत्र केचित् उदाहृतश्रुत्यवलम्बनेन ब्रुवते-न केवलं श्रवणमात्रेण भवत्यात्माधिगमः, कथं तर्हि, श्रवणज्ञानप्राप्त्यनन्तरं श्रुतार्थमननादपि परार्चीनेन योगाभ्यासलभ्यसाक्षात्करणेनैव । अन्यथा किमर्थः स्याद् योगोपदेशः ? आगमैकसमधिगम्यत्वप्रवादस्तु यथागमाध्यवसितस्यैव योगाभ्यासेन साक्षात्करणीयतया साक्षात्कारस्याप्यागमजन्यत्वमुररीकृत्येत्यदोष इति । तदेतदपेशलम् । ' शृण्वन्तोऽपि बहवो यं न विद्युः ' (१-२-७), ' श्रुत्वाप्येनं वेद न चैव कश्चित् ' (गी. २-२९) इति श्रुतिस्मृत्योः 'अपि' शब्दस्वारस्यात् , श्रवणमात्रेणापि वेदनप्राप्तेः केषाञ्चिन्निपुणमती-

नामवश्याङ्गीकार्यत्वात् । न चैवं योगोपदेशानर्थक्यम् । ये श्रवणमात्रेणावगन्तुं न शक्नुवन्ति, तान् प्रत्यवगत्यर्थत्वेन तत्सार्थक्यात् । यत्तूच्यते–श्रावणज्ञानादर्थान्तरमप्यस्ति साक्षात्काररूपं विज्ञानं तदेव चागमजन्यमात्मज्ञानं मुख्यमिति । तत्रैते वादिनः प्रष्टव्याः- कोऽयं साक्षात्कारो नामेति ? न तावत् प्रत्यक्षादिनेव बाह्यप्रमेयस्य मनसा विषयीकरणमात्मनः । यतो 'नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा' (२-३-१२) इति श्रुतिः कण्ठरवेण तन्निषेधति । अथ श्रुतब्रह्मणोऽपि यथापूर्वं दुःखित्वाद्यनुभवानपायदर्शनात्, योगेन तदपोह्य निर्दुःख्यात्मानुभवः संपादनीयः, स एव च साक्षात्कार इति मतम् । तदपि न चारु । दुःखित्वादेरात्मचैतन्यविषयत्वात्, उत्तमाधिकारिणां वेदान्तश्रवणजनितब्रह्मात्मावगमान्निर्दुःख्यात्मानुभवोत्पत्तेरन्तरायाभावात् । यथोक्तं सूत्रभाष्ये–"देहादिवदेव चैतन्याद् बहिरुपलभ्यमानत्वाद् दुःखित्वादीनाम्, सुषुप्तादिषु चाननुवृत्तेः । चैतन्यस्य तु सुषुप्तेऽप्यनुवृत्तिमामनन्ति – 'यद्वै तन्न पश्यति पश्यन् वै तन्न पश्यति' (बृ. ४-३-२३) इत्यादिना । तस्मात् सर्वदुःखविनिर्मुक्तैकचैतन्यात्मकोऽहम् – इत्येष आत्मानुभवः । न चैवमात्मानमनुभवतः किञ्चिदन्यत् कृत्यमवशिष्यते" (सू. भा. ४-१-२) इति । न च श्रवणमात्रादनुभवो न जायत एवेतीदं वेदान्ताभियुक्तसंमतम् । यतः सूत्रभाष्ये एव (४-१-२) दृश्यते वचनम् 'न च सकृत् प्रयुक्ते शास्त्रयुक्ती कस्यचिदप्यनुभवं नोत्पादयत इति शक्यते नियन्तुम् । विचित्रप्रज्ञत्वात् प्रतिपत्तॄणाम्' इति । तस्मान्नेयं समीचीना प्रक्रिया । 'साक्षाद्विजानाति' (१-२-२०), 'अवगम्यात्मभावेन साक्षात्' (२-१-४), 'साक्षादनुभवन्ति' (२-२-१२) – इत्येवमादीनि तु भाष्यवचनानि न वाक्येन परोक्षेण ज्ञातस्य हिमालयादेरिव साक्षाद्विषयीकरणपराणि, किं तर्हि बाह्येभ्योऽनात्मभ्य उपरतबुद्धीनां सर्वान्तरस्य सर्वसूक्ष्मस्य सर्वसाक्षिण आत्मनैवानुभवो जायते इत्येवंपराणीत्यवगन्तव्यम् । अनेनैव ह्यर्थेनानुगतानि सर्वाण्येतानि वाक्यानि । तथाहि – 'अयमहमस्मीति साक्षाद् विजानाति' (खं. ४६) इति, करणनिरपेक्षमेवानुभवतीत्यर्थः । एवं 'महान्तं विभुमात्मानं मत्वा अवगम्य आत्मभावेन साक्षात् अहमस्मि परमात्मा – इति, धीरो न शोचति' (खं. ६९) इति । अवस्थात्रयव्यापके द्रष्टरि साक्षिणि स्वात्मनि, आत्मनैव निष्ठां लब्ध्वा विशोको भवतीत्यर्थः । एवम् 'आत्मस्थं स्वशरीरहृदयाकाशे बुद्धौ चैतन्याकारेणाभिव्यक्तम् .... आत्मानं ये निवृत्तबाह्यवृत्तयोऽनुपश्यन्ति आचार्यागमोपदेशमनु साक्षादनुभवन्ति' इति । साक्षिचैतन्यमनात्मभ्यो निवृत्तमनसः स्वात्मनैवानुभवन्तीत्यर्थः (खं. ८९) । एवमन्यान्यप्येवंजातीयकानि वचनानि व्याख्यातव्यानि । तस्मात्, आत्मनः साक्षाद्विज्ञानं नाम सर्वतो बाह्यादुपरतस्य स्वात्मन्येवावस्थानमेव, नातोऽन्योऽस्त्यनुभवः । सर्वदापि साक्षादेव

ह्ययमात्मा बाह्यासक्तमनस्कानां नावभासते । 'यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः' (बृ· ३-४-१) इति श्रुतेः । अतः, श्रवणमात्रेणापि अविद्याध्यारोपित-निराकरणेनात्मन्यवस्थानं नाशक्यसंपादनमुत्तमाधिकारिणामिति श्लिष्यते । एतदर्थ-मेव चाध्यात्मयोगोपदेशोऽपि । यथाह भगवान् भाष्यकारः 'सर्वानर्थसंयोग-वियोगलक्षणा हीयमवस्था योगिनः । एतस्यां ह्यवस्थायाम् अविद्याध्यारोपणवर्जित-स्वरूपप्रतिष्ठ आत्मा' (खं· १०३) इति । 'विषयेभ्यः प्रतिसंहृत्य चेतस आत्मनि समाधानम् अध्यात्मयोगः । तस्याधिगमः प्राप्तिः । तेन मत्वा देवम् आत्मानं धीरो धीमान् हर्षशोकौ जहाति' (खं· ३९) इति योगलक्षणकथनं, योगेनात्मज्ञानमिति व्यवहारश्चैवमेवावकल्पते । तस्मात्, आत्मावगत्यर्थमेव योगोऽपि श्रवणमननवत्, न तु ज्ञाने जातेऽपि साक्षात्काराख्यज्ञानान्तरजननार्थम् - इत्येव भाष्यकारमतमिति शिवम् ॥

## ज्ञानफलभूता मुक्तिः

अग्निविद्याख्यापरब्रह्मविद्यारतास्तदात्मभावं गत्वा (खं· २०) शरीरपातात् पूर्वमेवाधर्मज्ञानरागद्वेषादीनपहाय (खं· २१), अन्तकाले सुषुम्नानाड्या ऊर्ध्वं गत्वा आदित्यद्वारेण बहुकालभोग्यम् आपेक्षिकममृतत्वम्, ज्ञानप्राप्तौ ब्रह्मणा सह कालान्तरेण मुख्यमेव वा अमृतत्वं (खं· १०९) भजन्ते । सैषा 'क्रममुक्ति'र्नाम (सू· भा· ४-३-१०) । तदेवं यद्यपि ब्रह्मलोके सम्यग्दर्शनं जायेतापि, तथापि तल्लोकप्राप्तिर्न सर्वेषां सुलभा-इतीहैवात्मानुभवः संपादनीयो विवेकिभिः। ब्रह्मलोका-दन्यत्र लोकान्तरेऽविविक्तमेवात्मदर्शनम् (खं· ९८) । इहजन्मनि ज्ञानसमकाल-प्राप्यमविद्याकामकर्मबन्धनैर्विमुक्तत्वं जीवन्मुक्तिशब्दव्यपदेश्यम् (खं· ८०) । एषा मुख्यमुक्तिर्न लोकान्तरगमनमपेक्षते । यत इहैव च मुक्तो ब्रह्म प्राप्नोति(खं·१०६) गमनप्रयोजककामानामविद्याग्रन्थिभेदेन मूलतो विनाशात् (खं· १०६) । अत इहैव मुक्त एतद्देहपातानन्तरं शरीरान्तरं न गृह्णातीत्येतावता श्रुत्या 'विमुक्तश्च विमुच्यत' इत्यनया (खं· ८०) पुनरपि विमुक्तिरुच्यते – इत्येवं विदेहमुक्तिं गौणीं व्याचख्युराचार्याः ॥

तदेवं स्थिते यदुच्यते कैश्चिद् व्याख्यानप्रस्थानानुयायिभिः-जीवन्मुक्तिर्गौणी, यतोऽत्राविद्यालेशोऽनुवर्तते यावच्छरीरपातम्, विदेहमुक्तिरेव तु मुख्येति, यदपि चोच्यते कैश्चित् सर्वथा अविद्यानाशे सति ज्ञानसमकालं शरीरपात एव सद्योमुक्ति र्नामेति, तदेतत् न केवलं भाष्यविरुद्धम्, किं तु सशरीरत्वस्य मिथ्याज्ञाननिमित्त-त्वात् स्वाभाविकत्वाच्चाशरीरत्वस्य ज्ञानादेव तु कैवल्यम्-इति वेदान्तसिद्धान्तस्य मूलोच्छेदि चेति न पृथग् वक्तव्यम् ॥

भाष्यकारवेदान्तप्रक्रियायां परमतसंक्रान्तिशङ्कानवसरः

तदेवं (१) भगवत्पादसंमतवेदान्तप्रक्रियायां ब्रह्मणः श्रुत्यैकसमधिगम्यत्वाङ्गीकारेऽपि, आगमविधया अनुभवपर्यन्तोपदेशकत्वाभ्युपगमाच्छ्रुतेः, वेदवाक्यत्वेनैव वाक्यप्रामाण्यस्वीकर्तृकर्ममीमांसकमतात् वेदान्त्येकदेशिमताच्च वैलक्षण्यमस्याः । (२) जीवभावस्य प्रपञ्चस्य च मायिकत्वाश्रयणेऽपि कूटस्थनित्यचैतन्यलक्षणपरमार्थात्मकत्वोपपादनात् सौगतमताद् भिन्नप्रस्थानत्वम् । (३) जगत्कारणभूतात्मस्वरूपनिर्धारणे तर्कानुसरणेऽपि श्रुत्यनुगृहीततदनुसारिलौकिकतर्कमात्रस्यानुभवाङ्गतया पुरस्कारात् नित्यानुमेयपुरुषप्रधानाद्यभ्युपगन्तृसाङ्ख्यमताद् वैषम्यम् । (४) आत्मस्वरूपप्रतिष्ठार्थं योगोपदेशेऽपि केवलम् अविद्याध्यारोपितानात्मप्रविलयनेन प्रत्यगात्माभिमुख्यसंपादनैकप्रयोजनत्वाद् ध्यानस्य प्रकृतिपुरुषवियोजनफलकचित्तवृत्तिनिरोधोपदेष्टृपातञ्जलमताद् वैसादृश्यम् — इत्येवं विभावनेन मतान्तरसंक्रान्तिशङ्कापङ्कप्रक्षालनं करणीयं सूक्ष्मदर्शिभिर्जिज्ञासुभिः ॥

## भाष्यटीकाकारौ

अस्या उपनिषद आनन्दज्ञानो, बालगोपालेन्द्रयतीश्वरश्चेति द्वौ व्याख्यातारौ प्रसिद्धौ । तत्रानन्दज्ञानस्तावन्मुण्डकोपनिषट्टीकाकृतोऽनन्य एव, यस्मादसौ मुण्डकव्याख्यायामिवात्रापि (२–३–१६) प्रकटार्थं नाम ग्रन्थं 'विस्तरश्च प्रकटार्थे द्रष्टव्यः' इति स्वीयत्वेन परामृशति । भास्करोक्तं च ब्रह्मविद्विषयां गतिं प्रत्याचष्टे 'यदभाणि भास्करेण प्रकरणाद् ब्रह्मविद्विषयैवेयं गतिरिति, तदसत् । गतिश्रवणेन लिङ्गेन परिच्छिन्ने गमनयोग्येऽस्या गतेः संबन्धावगमे सति दुर्बलेन प्रकरणेन प्रकृतब्रह्मवित्संबन्धानुपपत्तेः' इति । गोपालयतीश्वरस्तु 'कठवल्लीभाष्यटीका कृता गोपालयोगिना । अनया प्रीयतां देवो दक्षिणाशामुखः शिवः ॥' इति स्वीयव्याख्यां समापयन् यद्यपि स्वतन्त्रव्याख्यातृत्वमतिं जनयति पठितॄणां हृदये, तथाप्यानन्दज्ञानव्याख्यामेव तत्र तत्र शब्दशोऽनूद्य तस्यैव विवरणं चक्रे इत्यत्र न कोऽपि संशयः । अत एवार्वाचीनत्वादेतयोर्व्याख्यायां यद्यद्भाष्याननुगुणत्वेन प्रत्यभात्, तत्तद्विमर्शनमपि मनाक्कृतमस्मदीयटिप्पणे शुद्धशाङ्करप्रक्रियावधारणेप्सूनां कृते ॥

## उपनिषत्समाप्तौ स्थिता शान्तिः

अत्रोपनिषदि समाप्तौ निवेशितं शान्तिव्याख्यानं तैत्तिरीयभाष्यगतैतद्व्याख्यानतईषद्भिन्नमपि भगवत्पादीयमेव स्यादिति संभावयितुं शक्यते । 'इत्योमिति' इति

ग्रन्थपरिसमापकवचनबलादप्येवमवसेयं भवति । आनन्दाश्रममुद्रितोपनिषत्पुस्तके परं संपादकैरेवं लिखितं टिप्पणे–'सह नाववतु' इत्यस्य सर्वस्य स्थाने 'सह नाविति शान्तिः ॥ ३ ॥' इति ग्रन्थो वर्तते झ. ज. ट. पुस्तकेषु । छ. पुस्तके 'सह नाववतु' इति सर्वम् । 'इति द्वितीयाध्यायः' इत्यस्य सर्वस्य पश्चाद्वर्तते इति । एतत्समालोचनातो नः कियांश्चित् संशयो जायते मूलोपनिषद्ग्रन्थे शान्तिरियं स्थिता वा न वेति । आनन्दज्ञानेन न व्याख्यातः शान्तिग्रन्थः, गोपालयतीश्वरेण तु विवृतः । अतः प्राचीनपुस्तकभाण्डागारेषु स्थितान् अपरानपि कांश्चित्कोशान् परीक्ष्य निर्णयमेतदिति भाति । अत्र ग्रन्थतत्त्वशोधका एव शरणीकरणीयाः ॥

## अन्तिमा विज्ञप्तिः

अल्पाकारायामप्यस्यामुपनिषदि नैकेऽमोघोपदेशा अन्तर्गर्भिताः सन्तीति भाष्यकारैराविष्कृतम् । हृदयग्रन्थीनामात्यन्तिकभेदे मर्त्योऽमृतो भवत्यत्रैव ब्रह्म समश्नुते चेत्यनुशासतीयं मुमुक्षूणां परमोपकाराय भवेद् वेदान्तहृदयोद्घाटनेनेत्यत्र न काचन संशीतिः । मुण्डकोपनिषदमिवेमामपि यथामति संशोध्य विषमस्थलविशदीकरणटिप्पणेन संयोजितवानस्मि । अनेन च प्रयत्नेन कियानुपकारः स्यात् जिज्ञासूनामित्यत्र तु त एव प्रमाणम् । ममत्वेतत्सेवाया अवकाशमनुगृहीतवतां भगवत्पादाचार्याणां चरणयुगलस्मरणमेव चित्ते चिरं तिष्ठतादित्येतावत्याकाङ्क्षेति

अध्यात्मप्रकाशकार्यालये<br>शुभकृत्संवत्सरीयआषाढशुक्लत्रयोदश्याम्<br>भानुवासरे 15-7-1962

ग्रन्थसंपादकः

# ग्रन्थविभागक्रमः


| | | पृष्ठसङ्ख्या |
|---|---|---|
| १. | सामान्योपक्रमणिका, आङ्ग्लभाषामयी | 5 |
| २. | संपादकस्य भूमिका, (आङ्ग्लभाषामयी) | 7 |
| ३. | भूमिका, (संस्कृतवाण्याम्) | 16 |
| ४. | विषयानुक्रमणिका | 28 |
| ५. | संशोधनं संयोजनं च | 33 |
| ६. | सङ्केताक्षरविवरणम् | 34 |
| ७. | उपनिषत् सटिप्पणभाष्ययुता | १–१३३ |
| ८. | उपनिषत्सारः | १३४ |
| ९. | मन्त्राणामनुक्रमणिका | १४१ |
| १०. | परिशिष्टम् | १४४ |
| ११. | भाष्यस्थमुख्यशब्दसूची | १४८ |

# विषयानुक्रमणिका

## उपनिषदवतरणिकाभाष्यम्


मङ्गलाचरणपूर्वकं ग्रन्थारम्भप्रतिज्ञा – ब्रह्मविद्यारूपायाः उपनिषदः संबन्ध-प्रयोजने – अग्निविद्याया अपि उपनिषत्त्वम् – उपनिषच्छब्दो ग्रन्थे औपचारिकः – उपनिषदोऽनुबन्धचतुष्टयवत्त्वम् पत्रपृष्ठानि १–४


## प्रथमाध्याये – प्रथमा वल्ली


**नचिकेतसो यमसकाशप्राप्तिः**

वाजश्रवसो यज्ञः – नचिकेतसः श्रद्धा – नचिकेतसः स्वगतं चिन्ता – पित्रा नचिकेतसं मृत्यवे ददामीत्युक्तिः – नचिकेतसः परिदेवना – पितरं प्रति नचिकेतस उक्तिः ॥ ५–८

**यमं प्रति परिवारस्योक्तिः**

अतिथिसेवा अवश्यं कर्तव्या ॥ ९–१०

**यमेन वरत्रयप्रदानम्**

यमस्य वरप्रदाने हेतुकथनम् ॥ १०–११

**नचिकेतसा प्रार्थितः प्रथमो वरः**

पितुः सौमनस्यं प्रथमो वरः – मृत्युना प्रथमवरदानम् ॥ ११–१२

**द्वितीयो वरः**

अग्निविद्याप्रार्थना – मृत्योर्वरदानप्रतिज्ञा – इष्टकाचयनोपदेशः ॥ १३–१५

**प्रीतेन यमेन प्रत्तश्चतुर्थो वरः**

तुष्टेन मृत्युना सृङ्कादानम् – ज्ञानकर्मसमुच्चयफलम् ॥ १५–१८

**अग्निविज्ञानप्रकरणोपसंहारः**

फलोपसंहारः – प्रकरणोपसंहारः ॥ १८–१९

पत्रपृष्ठानि

तृतीयो वरः

उत्तरग्रन्थसंबन्धः – आत्मज्ञानप्रार्थना–यमेन शिष्यबुद्धिविचालनम् – नचिकेतसः स्थैर्यम् आत्मजिज्ञासायाम् – आत्मज्ञानफलतुल्यतया उपस्थापितानि कतिचित् फलानि – नचिकेतसा सर्वकामोपभोगनिन्दा ॥ १९–२७

तृतीयवरप्रार्थनोपसंहारः

आत्मविज्ञानमेव मम वाञ्छितं नान्यदिति प्रतिज्ञा ॥ २७–२८

## प्रथमाध्याये – द्वितीया वल्ली

विद्याविद्ययोर्विद्याया एव श्रेयस्करत्वम्

श्रेयःसाधनमुपाददानस्यैव पुरुषार्थः – विवेकिन एव श्रेयःसाधनं वृणते ॥ २९–३०

यमकृता नचिकेतसः प्रशंसा

नचिकेतसो वैराग्यम् – नचिकेतसो विवेकः– अज्ञानां ध्रुवं संसारानर्थभाजनत्वम्– श्रेयोऽर्थी सुदुर्लभः – आगमवता आचार्येण प्रोक्तमेव ज्ञानं सफलम् – तर्कमात्रेण आत्मज्ञानं नाप्यम् – मत्तोऽपि विरक्ततरस्त्वमिति यमेन नचिकेतसः प्रशंसा ॥ ३१–४०

वक्ष्यमाणज्ञानस्तुतिः

आत्मज्ञानाद् द्वन्द्वात्ययः – आत्मज्ञानादानन्दप्राप्तिः ॥ ४१–४२

आत्मयाथात्म्यविषयः प्रश्नः ४२–४३

ओंकारद्वारेण ब्रह्मोपदेशः

ओंकारसाधनत्वं ब्रह्मप्राप्तेः – ओंकारस्य परब्रह्मालम्बनत्वम् ॥ ४३–४६

आत्मनः साक्षात् स्वरूपनिर्धारणम्

आत्मा सर्वविक्रियारहितः – आत्मनः सर्वक्रियाश्रयत्वविषयत्वाभावः – अकाम एवात्मानं पश्यति – विषयापहृतचित्तैर्दुर्विज्ञेय आत्मा ४६–५१

आत्मविज्ञानफलम्, साधनं च

आत्मज्ञानस्य शोकराहित्यं फलम् – आत्मविज्ञानोपायः – आत्मविज्ञाने साधनान्तराणि – साधनसंपत्तिरहितो नात्मानं विजानीयात् ॥ ५१–५५

## प्रथमाध्याये – तृतीया वल्ली


पत्रपृष्ठानि

तृतीयवल्लीसंबन्धः ॥ ५६

### हृदये स्थितं ब्रह्मद्वयम्

द्वौ आत्मानौ हृदये स्तः – क्वेदं ब्रह्मद्वयम् ॥ ५६–५८

### रथरथिरूपककल्पना

शरीरादीनां रथादित्वम् ॥ ५९–६०

### विज्ञानवदविज्ञानवतोः फलभेदः

सुबुद्धिमत एव वश्येन्द्रियत्वम् – अविज्ञानवतः संसारगतिः, विज्ञानवतो मोक्षश्च ॥ ६१–६३

### ब्रह्मणः परमसूक्ष्मत्वात् प्रत्यगात्मत्वम्

विष्णोः पदस्य प्रत्यगात्मत्वम् – सर्वस्यापि प्रत्यगात्मायं परमात्मा ॥ ६४–६९

### सूक्ष्मस्यात्मनो दर्शनार्थं योगः

इन्द्रियादिप्रविलयनयोगः – आत्मदर्शनयत्नकर्तव्यतोपदेशः – निरतिशयसूक्ष्मत्वा-द्युपपत्तिर्ब्रह्मणः ॥ ६९–७३

### आत्मविज्ञानस्तुतिः

आख्यानश्रोतुर्विज्ञातुश्च ब्रह्मसायुज्यं फलम् – श्राद्धकाले श्रावणेन अनन्तफलवत्त्वं कर्मणः ॥ ७४–७५


## द्वितीयाध्याये – प्रथमा वल्ली


### काम एव आत्मज्ञानस्य प्रतिबन्धः

उत्तरवल्लीसंबन्धः – परागदृष्टिः स्वभावो लोकस्य, प्रत्यग्दृष्टिस्तु कस्यचिदेव – अविवेकिनामेव विषयविषयः कामः – न विवेकिनाम् ॥ ७६–७९

### आत्माधिगमप्रकारः

यद् बाह्याध्यात्मिकरूपाद्यवभासकं तदेव प्रकृतं ब्रह्म – यज्जाग्रत्स्वप्नसाक्षि तदेव प्रकृतमात्मतत्त्वम् – जीवं कालत्रयातीतपरमात्मत्वेन विदुषः फलम् ॥ ७९–८३

### प्रत्यगात्मब्रह्मणः सर्वात्मत्वम्

हिरण्यगर्भः प्रकृतब्रह्मणोऽनन्यः–हिरण्यगर्भस्य सर्वभूतात्मत्वम् अग्निरूपेण स्थितो विराडपि ब्रह्मैव – प्राणस्य सर्वदेवतामयत्वम् – सर्वेषामपि संसारिणां ब्रह्मणानन्यत्वम् ॥ ८३–८७

पत्रपृष्ठानि

ब्रह्मात्मैकत्वज्ञानात् सर्वानर्थप्रहाणिः

अविद्ययैव ब्रह्मणि नानात्वं भासते – हृदयावच्छिन्नत्वेन विभाव्यमान आत्मा-ब्रह्मैव ॥ ८७–९०

ज्ञानाज्ञानफलोपसंहारः

अज्ञानिनः सातत्येन संसारः – ज्ञानिन आत्मा परमात्मनः सकाशात् सर्वथा दुर्विवेचनः ॥ ९०–९२

## द्वितीयाध्याये – द्वितीया वल्ली

ब्रह्मतत्त्वनिर्धारणे प्रकारान्तरम्

शरीररचनासमालोचनेन तदसंहतात्माधिगमः–ब्रह्मणः सर्वेष्वपि शरीरेष्वेकत्वम्–वायुकरणव्यापारलिङ्गेनात्माधिगमः – यस्य विगमे कार्यकरणसंघातो हतबलो भवति स आत्मा – प्राणादिकरणसमूहस्य आत्मार्थत्वम् ॥ ९३–९८

ब्रह्मात्मनोरेकत्वम्

आत्मनोऽज्ञानान्मनुष्यादिस्थावरान्ता गतिः – आत्मनोऽनन्यद् ब्रह्म ॥ ९८–१००

आत्मैकत्वे दृष्टान्तौ

एकस्यैवानेकत्वेन विभाव्यमानत्वे दृष्टान्तद्वयम् ॥ १०१–१०२

देहस्थस्यापि परस्य न संसारदुःखम्

परमात्मनो दुःखालिप्तत्वे दृष्टान्तः ॥ १०२–१०४

आत्मज्ञानिनां नित्यसुखशान्ती

सर्वकारणं परमात्मानमात्मत्वेन पश्यताम् नित्यसुखम् – आत्माधीनमेव नित्यत्वं चेतरेषाम् ॥ १०४–१०७

ब्रह्मानन्दः सर्वेषामपि सुवेद्यः

आत्मा स्वयं भाति विभाति चेतररूपेण ॥ १०७–१०९

## द्वितीयाध्याये – तृतीया वल्ली

षष्ठवल्लीसंबन्धः ॥ ११०

जगतः परमकारणं ब्रह्म

संसारवृक्षरूपकम् – संसारमूलस्य ब्रह्मणः स्वरूपम् ॥ ११०–११२

जगन्नियन्तृ ब्रह्म

सर्वप्रवृत्तिहेतुभूतं ब्रह्म – ब्रह्मणो भयहेतुत्वम् ॥ ११३–११४

पत्रपृष्ठानि

**ब्रह्म चेहैव लोके विज्ञातव्यम्**

ब्रह्म चेदिहैव न ज्ञातम्, ततो जन्मान्तरकारणं भवति – इहलोके एव ब्रह्मणः स्फुटदर्शनम् ॥ ११४–११६

**ब्रह्म प्रत्यगात्मत्वेनैव बोद्धव्यम्**

आगमापायिनाम् इन्द्रियाणां सर्वेषामपि साक्षी प्रत्यगात्मा – आत्मनः सर्वप्रत्यक्त्वं ज्ञात्वा मुक्तिः ॥ ११६–११९

**ज्ञानसाधनं योगः**

अविकल्पयितृबुद्ध्यैव शक्यदर्शन आत्मा–हृन्मनीड्बुद्धिप्राप्तिः कथं भवति ?– योगावस्थानिरूपणम् ॥ ११९–१२२

**ब्रह्मज्ञानं तत्फलं च**

आत्मास्तित्ववादिन्येव तत्त्वोपलब्धिः – अस्तीत्युपलब्धवत एव निरुपाधिकात्म-तत्त्वज्ञानम् – कामप्रविलये अमृतत्वप्राप्तिः – अविद्याग्रन्थिविनाशात् कामानां समूलविनाशः ॥ १२३–१२८

**अपरब्रह्मविद्याफलम्**

गतिविशेषसंकीर्तनस्य प्रयोजनम् – अपरब्रह्मविदां गतयः ॥ १२८–१३०

**उपसंहारः**

उपनिषदर्थोपसंहारः – आख्यायिकार्थोपसंहारः ॥ १३०–१३२

**शान्तिः**

शान्तिपाठप्रयोजनकथनं तद्व्याख्यानं च ॥ १३२–१३३

**काठकोपनिषत्सारः** १३४

**मन्त्राणामनुक्रमणिका** १४१

**परिशिष्टम्** १४४

**भाष्यस्थमुख्यशब्दसूची** १४८

# संशोधनं संयोजनं च

[ टि· इति टिप्पणपरामर्शकः सङ्केतः, भा· भा· इति भाष्यभागपङ्क्तेः सङ्ख्या सूच्यते ॥ ]

| पार्श्वे | पङ्क्तौ | पठितव्यं संयोज्यं वा |
|---|---|---|
| ४ | भा· भा· ५–७ | यथाप्रतिभानं |
| ५ | टि· 1 | प्रलोभन |
| १२ | टि· 5 | एव स्थाता |
| ३७ | टि· 3 | स्यात्, अत्र |
| ९३ | 11 | असंहत |
| ,, | टि· 2 | संहतानां |
| १०५ | 5 टिप्पणान्ते संयोज्यम् | श्वे· ६–१२ |
| १०६ | 3 | ‘ उपदेशमनु पश्यन्ति ’ इत्युक्तेस्तदनन्तरं ज्ञानाभ्यासादि कर्तव्यताद्यवशेषवादनिरासः ॥ |
| ११५ | टि· 1 | संबध्यते, |
| १२५ | शीर्षकलेखने | एव निरुपाधिकात्मतत्त्वज्ञानम् |
| १३० | टि· 5 | प्रथमवल्लीभाष्ये |
| १३० | टि· 7 | मुञ्जादिषीकाया इव |

विज्ञापना :– दर्शनमात्रेण सुबोधानां स्खालित्यानामिह ग्रहणं न कृतम् ॥

# सङ्केताक्षरविवरणम्

अत्रत्यसङ्केताक्षराणि प्रायशो विवरणं नैवापेक्षन्ते । यस्मात् · ई·· के·, मुं·, मां·, तै·, ऐ·, छां·, बृ· – इतीमानि प्रसिद्ध ईशकेनाद्युपनिषदाम् आद्यक्षराणि । ई· भा·, के· भा·, – इत्यादीनि तु तत्तद्भाष्यपरामर्शकानि च । तथा च कश्चिदेत्र सङ्केताक्षराणीह दिग्दर्शनार्थं सविवरणं प्रदीयन्ते ॥

| सङ्केतः | विवरणम् |
|---|---|
| अव· | अवतरणिकायाम् |
| आ॥ | आनन्दाश्रममुद्रितपाठे |
| आ॥ गि॥, आ· गि· | आनन्दगिरीयटीकायाम् |
| ऋ· सं· | ऋक्संहितायाम् |
| कौ· | कौषीतकिब्राह्मणोपनिषदि |
| गी· | भगवद्गीतासु |
| गो· | गोपालेन्द्रयतिकृतटीकायाम् |
| गौ· का· | गौडपादीयकारिकासु |
| तै· ब्रा· | तैत्तिरीयब्राह्मणे |
| द्र· | द्रष्टव्यम् |
| पा· | पाणिनीयव्याकरणे |
| मनु· | मनुस्मृतौ |
| वा॥ | वाणीविलासमुद्रणालयपुस्तके |
| वि· पु· | विष्णुपुराणे |

॥ ॐ ॥

श्रीमच्छाङ्करभाष्यसंयुता

# का ठ को प नि ष त्

ओं सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।
तेजस्विनावधीतमस्तु मा विद्विषावहै ॥

ओं शान्तिः शान्तिः शान्तिः

## अथोपनिषदवतरणिकाभाष्यम्

### मङ्गलाचरणपूर्वकं ग्रन्थारम्भप्रतिज्ञा –

१. ओं[1] नमो भगवते[2] वैवस्वताय[3] मृत्यवे ब्रह्मविद्याचार्याय[4]

---

## अथ सच्चिदानन्देन्द्रसरस्वतीकृतं टिप्पणम्

कर्मोपासनयुक्तैर्यः प्राप्यः स्वर्गान्तभुक्तये ।
अध्यात्मयोगिभिर्ज्ञेयः सद्योमुक्त्यै स नो गतिः ॥

ओं नमो ब्रह्मविद्यासंप्रदायकर्तृभ्यः ॥

1. ओंकारो मङ्गलार्थः; उपनिषद्वेद्यवस्तुसंसूचनार्थश्च भवति, आचार्यनमस्कारार्थं विनियुक्तोऽपि । ओंकारस्य परापरब्रह्माधिगमोपायत्वस्य (१-२-१५) वक्ष्यमाणत्वात् ॥

2. उत्पत्तिं च विनाशं च भूतानामागतिं गतिम् । वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥ (वि. पु. ६-५-७८) इति स्मृतेः, उत्पत्त्यादिविद् भगवानसौ मृत्युः ॥ 3. विवस्वतः सूर्यस्य अपत्यं पुमान् वैवस्वतो यमः ॥

4. यद्यपि मृत्युरेवात्र ब्रह्मविद्योपदेष्टा श्रूयते, तथापि यस्मै स उपदिदेश, स नचिकेता मनुष्यलोके प्रथमः संप्रदायकर्ता-इत्याशयेन सोऽप्याचार्यत्वेन नमस्क्रियते । अत एवात्र 'ब्रह्मविद्याचार्याय' इत्यस्य मध्यमणिन्यायेनोभयतोऽन्वयः॥

नचिकेतसे च । अथ काठकोपनिषद्वल्लीनां[1] सुखार्थप्रबोधनार्थम्[2] अल्पग्रन्था वृत्ति[3]रारभ्यते ॥

## ब्रह्मविद्यारूपायाः उपनिषदः संबन्धप्रयोजने –

२. सदेर्धातोर्विशरणगत्यवसादनार्थस्य, उपनिपूर्वस्य, क्विप्प्रत्ययान्तस्य रूपमिदम्[4] 'उपनिषत्' इति । उपनिषच्छब्देन च व्याचिख्यासितग्रन्थप्रतिपाद्यवेद्यवस्तुविषया[5] विद्या उच्यते । केन पुनरर्थयोगेन[6], उपनिषच्छब्देन विद्या उच्यत इति ? उच्यते । ये मुमुक्षवो दृष्टानुश्रविक[7]-विषयवितृष्णाः सन्तः, उपनिषच्छब्दवाच्यां वक्ष्यमाणलक्षणां विद्याम् उपसद्य उपगम्य[8]तन्निष्ठतया निश्चयेन शीलयन्ति[9], तेषाम् अविद्यादेः[10] संसारबीजस्य विशरणात्, हिंसनात् विनाशनात् – इत्यनेनार्थयोगेन विद्या 'उपनिषत्' इत्युच्यते । तथा च वक्ष्यति 'निचाय्य तं मृत्युमुखात् प्रमुच्यते[11]' (१–३–१५) इति ॥

---

1. षण्णामपि ग्रन्थविभागानाम् ॥ 2. सुखेन उपनिषदर्थज्ञापनार्थम् ॥

3. 'अल्पग्रन्था वृत्ति'रिति वृत्त्यन्तराणां ग्रन्थतो बृहत्त्वेऽपि तत्रोपनिषदो न सुखेनार्थबोधो भवतीति सूचितम् । वृत्तिशब्दो भाष्यपरः ॥

4. 'इदम्' इति क्वचिन्नास्ति ॥ 5. वेद्यं वस्तु ब्रह्मात्मतत्त्वम् ॥

6. अर्थसंबन्धेन । विशरणादीनां धात्वर्थत्वेन प्रदर्शितानां मध्ये केन योगाद् विद्या उपनिषच्छब्दवाच्या ? – इति प्रश्नः ॥

7. इहलोके दृष्टा दृष्टविषयाः, केवलश्रुतिगम्याः पारलौकिका आनुश्रविकाः ॥ 8. श्रद्धाभक्तिपुरःसरम् उपसृत्य ॥

9. तात्पर्येण तत्रैव निस्तिष्ठन्ति ॥ 10. अविद्याकामकर्मलक्षणस्य ॥

11. तं परमात्मानमवगम्य अविद्याकामकर्मलक्षणात् मृत्युमुखाद् विमुक्तो भवतीति श्रुत्युक्त्या ब्रह्मविद्या संसारबीजविनाशिनीत्यवगम्यते–इति भावः ॥

अत्र षद्लृ इत्यस्य धातोर्विशरणार्थं स्वीकृत्य विद्यायामुपनिषच्छब्दवृत्तिर्दर्शिता । 'उप' इत्युपसर्गव्याख्यानच्छलेन 'उपगम्य' इति च मुमुक्षुत्वं वैराग्यं च, नीत्यस्य व्याख्यानव्याजेन 'निश्चयेन' इति शमदमोपरतिसमाधानश्रद्धाः, 'शीलयन्ति' इति विवेकः – इत्येतानि साधनानि निर्दिष्टानीत्यनुसंधेयम् ॥

पूर्वोक्तविशेषणान् मुमुक्षून् वा[1] परं ब्रह्म गमयतीति ब्रह्म गमयितृत्वेव[2] योगात्, ब्रह्मविद्या उपनिषत् । तथा च वक्ष्यति 'ब्रह्म प्राप्तो विरजोऽभूद् विमृत्युः'[3] (२–३–१८) इति ॥

## अग्निविद्याया अपि उपनिषत्त्वम् –

३. लोकादिः, ब्रह्मजज्ञो योऽग्निः[4] तद्विषयाया विद्याया[5] द्वितीयेन वरेण प्रार्थ्यमानायाः[6] स्वर्गलोक[7]फलप्राप्तिहेतुत्वेन गर्भवासजन्मजराद्युपद्रववृन्दस्य लोकान्तरे[8] पौनःपुन्येन प्रवृत्तस्य अवसादयितृत्वेन[9] शैथिल्यापादनेन[10] धात्वर्थयोगात्, अग्निविद्यापि 'उपनिषत्' इत्युच्यते । तथा च वक्ष्यति 'स्वर्गलोका अमृतत्वं भजन्ते[11]' (१–१–१३) इत्यादि ॥

---

1. 'विशेषणान् वा मुमुक्षून्' वा ॥ ; इहत्यवाशब्दस्य ब्रह्मगमयितृत्वेन 'योगाद् वा' इति संबन्धो बोध्यः ॥

2. अत्र गत्यर्थमादाय तेन योगेन विद्याया उपनिषच्छब्दवाच्यता प्रदर्शिता । विद्यामात्रेण ब्रह्मप्राप्तिवचनात्, इह गतिरवगतिमात्रेण नित्यप्राप्तस्यैव प्राप्तिरभिप्रेतेति गम्यते ॥

3. अविद्याकामकर्मरहितः सन् ब्रह्मप्राप्तोऽभूत् – इति श्रुतिर्विद्यायाः ब्रह्मगमयितृत्वं दर्शयतीति भावः ॥

4. लोकादिः, लोकानां शरीरिणामादित्वात् (१-१-१५); ब्रह्मजज्ञः, हिरण्यगर्भब्रह्मणो जातत्वात् सर्वज्ञत्वाच्च (१-१-१७) । आभ्यां विशेषणाभ्यां विराट्प्रजापतिरुच्यते ॥

5. अत्र विद्या उपासनारूपा विवक्षिता ॥

6. सा हि विद्या नचिकेतसा (१-१-१३) प्रार्थ्यते द्वितीयवरत्वेन ॥

7. स्वर्गलोकोऽत्र वैराजो लोकः, प्रकरणात् ॥

8. मनुष्यलोके ॥

9. एषोऽर्थस्तृतीयोऽनुक्रान्तो षद्लृधातोः ॥

10. अत्रावसादो नात्यन्तमुच्छेदः । गतिपूर्वकत्वात् प्राप्तेः स्वर्गलोकस्य । अत आह शैथिल्यापादनात् इति । लोकान्तरे पुनः पुनः प्रवृत्तिर्जन्मादीनाम् ; अत्र पुनर्यावद्वैराजलोकसंप्लवं तथैव स्थितिरित्यभिप्रायेण शैथिल्यापादनत्वोक्तिः ॥

11. आपेक्षिकमिदममृतत्वं वैराजपदप्राप्तिरूपम् ॥

उपनिषच्छब्दो ग्रन्थे औपचारिकः –

४. ननु च उपनिषच्छब्देन अध्येतारो[1] ग्रन्थमपि अभिलपन्ति 'उपनिषदम् अधीमहे', 'अध्यापयामः'[2] इति चैवम्[3] । नैष दोषः । अविद्यादिसंसारहेतुविशरणादेः, सदिधात्वर्थस्य ग्रन्थमात्रे असंभवात्, विद्यायां च संभवात्; ग्रन्थस्यापि तादर्थ्येन[4] तच्छब्दत्वोपपत्तेः[5] । 'आयुर्वै घृतम्' (तै. सं. २–३–११) इत्यादिवत्[6] । तस्मात्, विद्यायां मुख्यया वृत्त्या उपनिषच्छब्दो वर्तते । ग्रन्थे तु भक्त्या[7] इति ॥

उपनिषदोऽनुबन्धचतुष्टयवत्त्वम् –

५. एवम् उपनिषन्निर्वचनेनैव विशिष्टोऽधिकारी[8] विद्यायाम् उक्तः । विषयश्च विशिष्ट उक्तो विद्यायाः, परं ब्रह्म[9] प्रत्यगात्मभूतम् । प्रयोजनं चास्या उपनिषदः[10] आत्यन्तिकी संसारनिवृत्तिः, ब्रह्मप्राप्तिलक्षणा[11] । संबन्धश्च[12] एवंभूतप्रयोजनेन उक्तः । अतो यथोक्ताधिकारिविषयप्रयोजनसंबन्धाया विद्यायाः करतलन्यस्तामलकवत्[13] प्रकाशकत्वेन विशिष्टाधिकारिविषयप्रयोजनसंबन्धा[14] एता वल्ल्यो भवन्ति । इत्यतः, ता यथा प्रतिभानं[15] व्याचक्ष्महे ॥

---

1. अध्यापकाश्च इति द्रष्टव्यम्, वाक्यशेषानुगुण्याय ॥
2. 'उपनिषदम् अध्यापयामः' वा॥ 3. एवंशब्दो नास्ति वा॥
4. विद्यार्थत्वेन ॥ 5. उपनिषच्छब्दगम्यत्वोपपत्तेः ॥
6. आदिशब्दात्, 'लाङ्गलं जीवनम्' इत्यादिलौकिकप्रयोगसंग्रहः ॥
7. गौण्या वृत्त्या ॥ 8. उक्तप्रयोजनकामः, वैतृष्ण्यादियुक्तश्च ॥
9. ब्रह्मगमयितृत्वार्थयोगेन विद्याया ब्रह्मविषयकत्वम् ॥
10. 'उपनिषदः' इति नास्ति वा॥ 11. अविद्यापगमद्वारेण ब्रह्मप्राप्तिः॥
12. साध्यसाधनलक्षणः। विद्या साधनम्, अविद्यापगमद्वारेण ब्रह्मप्राप्तिश्च साध्या – इति ॥ 13. निःसंशयम्, अविपर्यस्तं च ॥
14. विद्यायाः प्रतिपाद्यत्वम्, वल्लीरूपग्रन्थस्य प्रतिपादकत्वम् । विद्याप्रतिपत्तिः शास्त्रस्य साक्षात् प्रयोजनम्, तादृशप्रयोजनस्य च अविद्यादिनिवृत्तिद्वारेण ब्रह्मप्राप्तिः प्रयोजनमिति । तत्कामोऽधिकारीति च अर्थात् सिध्यतीति भावः ॥
15. औद्धत्यपरिहारार्थमिदं विशेषणदानं भाष्यकारेण ॥

# प्रथमाध्याये – प्रथमा वल्ली

## नचिकेतसो यमसकाशप्राप्तिः

**उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ ।**
**तस्य ह नचिकेता नाम पुत्र आस ॥ १ ॥**

**वाजश्रवसो यज्ञः –**

६. तत्र आख्यायिका विद्यास्तुत्यर्था[1] ॥

उशन् कामयमानः[2] । ह वै इति वृत्तार्थस्मरणार्थौ[3] निपातौ । वाजम् अन्नम् । तद्दानादिनिमित्तं श्रवो यशो यस्य स वाजश्रवाः । रूढितो वा[4] । तस्य अपत्यं वाजश्रवसः । (स वाजश्रवसः)[5] किल विश्वजिता सर्वमेधेन ईजे, तत्फलं कामयमानः । स तस्मिन् क्रतौ सर्ववेदसं सर्वस्वं धनं ददौ दत्तवान् । तस्य यजमानस्य ह नचिकेता नाम पुत्रः किल आस बभूव ॥ १ ॥

**तꣳ ह कुमारꣳ सन्तं दक्षिणासु नीयमानासु**
**श्रद्धाऽऽविवेश सोऽमन्यत ॥ २ ॥**

---

1. यमसंनिधिं प्राप्यापि, सकलप्रलोभनमविगणय्य ब्रह्मविद्यामेव प्रार्थितवान् नचिकेताः । इत्थंमहाभागेनं विद्येति स्तुत्यर्थमित्यर्थः ॥

2. वश कान्तौ इत्यस्माद्धातोर्निष्पन्नं रूपम् ॥

3. भूतार्थस्मारणार्थम् इत्यर्थः । स्मारणार्थमित्येव मूले लिखितं स्यात् भाष्यकारेण । किलेत्यर्थे ह वै इति निपातौ इत्यर्थः ॥

4. नेदं नाम अन्नदानादिनिमित्तयशोनिबन्धनं यौगिकम्, रूढित एव वा स्यात्तस्य तन्नामेत्यर्थः ॥

5. वा॥ पाठे एव कंसान्तर्गतौ शब्दौ ॥

नचिकेतसः श्रद्धा –

७. तं ह नचिकेतसं कुमारं प्रथमवयसं सन्तम् अप्राप्तप्रजननशक्तिं बालमेव श्रद्धा आस्तिक्यबुद्धिः पितुर्हितकामप्रयुक्ता आविवेश प्रविष्टवती । कस्मिन् काले इति ? आह – ऋत्विग्भ्यः, सदस्येभ्यश्च[1] दक्षिणासु नीयमानासु विभागेन उपनीयमानासु दक्षिणार्थासु गोषु । स आविष्टश्रद्धो नचिकेता अमन्यत ॥ २ ॥

**पीतोदका जग्धतृणा**
**दुग्धदोहा निरिन्द्रियाः ।**
**अनन्दा नाम ते लोका-**
**स्तान् स गच्छति ता ददत् ॥ ३ ॥**

नचिकेतसः स्वगतं चिन्ता –

८. कथमिति[2]? उच्यते–'पीतोदकाः' इत्यादिना दक्षिणार्था गावो विशेष्यन्ते । पीतम् उदकं याभिः, ताः पीतोदकाः । जग्धं भक्षितं तृणं याभिः, ता जग्धतृणाः । दुग्धो दोहः क्षीराख्यो यासां, ता दुग्धदोहाः । निरिन्द्रियाः प्रजननासमर्थाः[3], जीर्णाः, निष्फला गाव इत्यर्थः । यास्ताः एवंभूता गाः, ऋत्विग्भ्योः दक्षिणाबुद्ध्या ददत् प्रयच्छन् अनन्दाः अनानन्दाः – असुखा नाम इत्येतत् – ये ते लोकाः, तान् स यजमानः गच्छति ॥ ३ ॥

**स होवाच पितरं तत कस्मै मां दास्यतीति ।**
**द्वितीयं तृतीयं तꣳ होवाच मृत्यवे त्वा**
**ददामीति ॥ ४ ॥**

1. यज्ञसभायां मिलितेभ्यो ब्राह्मणेभ्यश्च ॥
2. कथम् अमन्यतेति ? 3. 'अप्रजननसमर्थाः' (आ॥)

**पित्रा नचिकेतसं मृत्यवे ददामीत्युक्तिः –**

९. तदेवं क्रत्वसंपत्तिनिमित्तं पितुरनिष्टं फलं मया पुत्रेण सता निवारणीयम्, आत्मप्रदानेनापि क्रतुसंपत्तिं कृत्वा–इत्येवं मत्वा[1] पितरम् उपगम्य स होवाच पितरम् 'हे तत तात, कस्मै ऋत्विग्विशेषाय दक्षिणार्थं मां दास्यसि?' इति। प्रयच्छसि?–इत्येतत्। स एवमुक्तेन पित्रा उपेक्ष्यमाणोऽपि द्वितीयं तृतीयमपि उवाच 'कस्मै मां दास्यसि, कस्मै मां दास्यसि?' इति। नायं कुमारस्वभावः इति क्रुद्धः सन् पिता तं ह पुत्रं किल उवाच 'मृत्यवे वैवस्वताय त्वा त्वां ददामि' इति ॥ ४ ॥

> **बहूनामेमि प्रथमो**
> **बहूनामेमि मध्यमः।**
> **किꣳ स्विद्यमस्य कर्तव्यं**
> **यन्मयाद्य करिष्यति ॥ ५ ॥**

**नचिकेतसः परिदेवना –**

१०. स एवमुक्तः पुत्रः, एकान्ते परिदेवयाञ्चकार। कथमिति? उच्यते –

बहूनां शिष्याणां पुत्राणां वा एमि गच्छामि प्रथमः सन् मुख्यया शिष्यादिवृत्त्या इत्यर्थः। मध्यमानां च बहूनां मध्यमः, मध्यमयैव वृत्त्या एमि। नाधमया कदाचिदपि[2]। तम् एवं विशिष्टगुणमपि पुत्रं माम् 'मृत्यवे त्वा ददामि' इत्युक्तवान् पिता[3]। स किंस्विद् यमस्य कर्तव्यं

---

1. 'मन्यमानः' वा॥

2. गुरोरिङ्गितं ज्ञात्वा प्रवृत्तिर्मुख्या, आज्ञावशेन प्रवृत्तिर्मध्यमा, सर्वथाप्यप्रवृत्तिरधमा॥

3. तत्र तावन्ममापराधप्रयुक्तमिदं मृत्युमुद्दिश्य दानोक्तिरित्यभिप्रायः॥

प्रयोजनम् मया प्रत्तेन[1] करिष्यति यत् कर्तव्यमद्य[2] ? नूनं प्रयोजनम् अनपेक्ष्यैव क्रोधवशात् उक्तवान् पिता । तथापि तत् पितुर्वचो मृषा मा भूत्[3]–इत्येवं मत्वा परिदेवनापूर्वकम् आह पितरं शोकाविष्टम् 'किं मया उक्तम् !' इति ॥

अनुपश्य यथा पूर्वे
प्रतिपश्य तथा परे ।
सस्यमिव मर्त्यः पच्यते
सस्यमिवाजायते पुनः ॥ ६ ॥

**पितरं प्रति नचिकेतस उक्तिः –**

११. अनुपश्य आलोचय विभावय अनुक्रमेण यथा येन प्रकारेण वृत्ताः पूर्वे अतिक्रान्ताः पितृपितामहादयस्तव । तान् दृष्ट्वा च तेषां वृत्तम् आस्थातुमर्हसि । वर्तमानाश्च अपरे साधवो यथा वर्तन्ते, तांश्च[4] प्रतिपश्य आलोचय तथा । न च तेषां मृषाकरणं वृत्तं वर्तमानं वा अस्ति । तद्विपरीतम् असतां च वृत्तं मृषाकरणम् । न च मृषाकृत्वा[5] कश्चित् अजरामरो भवति[6] । यतः सस्यमिव मर्त्यः मनुष्यः पच्यते जीर्णो म्रियते, मृत्वा च सस्यमिव आजायते आविर्भवति पुनः । एवम् अनित्ये जीवलोके किं मृषाकरणेन ? पालय आत्मनः सत्यम्, प्रेषय मां यमाय इत्यभिप्रायः ॥ ६ ॥

1. 'प्रदत्तेन' वा॥
2. न हि मया प्रत्तेन यमस्य किञ्चित्कर्तव्यमस्ति ॥
3. न हि यजमानस्य दीक्षितस्य मृषावदनं कथमपि युक्तमिति भावः ॥
4. एतदनन्तरं 'तथा' वा॥
5. 'मृषाभूतं कृत्वा' वा॥
6. मृषाकरणेन असतां वृत्तं नानुकरणीयमित्यत्र वाक्यशेषं संगमयितुमिदं मूलानुक्तमपि द्रष्टव्यमिति भावः ॥

## यमं प्रति परिवारस्योक्तिः

वैश्वानरः प्रविश-
त्यतिथिर्ब्राह्मणो गृहान् ।
तस्यैताꣳ शान्तिं कुर्वन्ति
हर वैवस्वतोदकम् ॥ ७ ॥

आशाप्रतीक्षे सङ्गतꣳ सूनृतां
चेष्टापूर्ते पुत्रपशूंश्च सर्वान् ।
एतद् वृङ्क्ते पुरुषस्याल्पमेधसो
यस्यानश्नन् वसति ब्राह्मणो गृहे ॥ ८ ॥

**अतिथिसेवा अवश्यं कर्तव्या –**

१२. स एवमुक्तः पिता आत्मनः सत्यतायै प्रेषयामास । स च यमभवनं गत्वा तिस्रो रात्रीरुवास, यमे प्रोषिते[1] । प्रोष्य आगतं यमम् अमात्या भार्या वा ऊचुर्बोधयन्तः[2] । वैश्वानरः अग्निरेव साक्षात् प्रविशति अतिथिः सन् ब्राह्मणः गृहान् दहन्निव । तस्य दाहं शमयन्त इवाग्नेः, एतां पाद्यासनादिदानलक्षणाम्, शान्तिं कुर्वन्ति सन्त अतिथेर्यतः, अतः हर आहर हे वैवस्वत, उदकं नचिकेतसे पाद्यार्थम् ॥ ७ ॥

यतश्च अकरणे प्रत्यवायः[3] श्रूयते –

---

1. कार्यवशात् कुत्रचिद् प्रवसिते ॥

2. एतदन्तं श्रुत्युक्तकथावृत्तान्तपूरणायापेक्षितमिति वाक्यशेषतोऽत्र-गम्यते । तत् सुहृद्भूत्वा आचार्यः स्ववाक्येन निबध्नाति ॥

3. यद्यपि सेवाया अकरणमभाव इति न ततो प्रत्यवायजनिर्युक्ता, तथापि अतिथेर्न्यक्करणं प्रत्यवायहेतुरित्यत्र तात्पर्यं बोध्यम् । न केवलम् अतिथेः पूजा शिष्टाचारवशात् अनिष्टशान्त्यर्थेति गम्यते, किन्तु अकरणे प्रत्यवायश्रवणाच्च-इति 'यतश्च' इत्यस्यार्थः ॥

आशाप्रतीक्षे । अनिर्ज्ञातप्राप्येष्टार्थप्रार्थना आशा, निर्ज्ञातप्राप्यार्थ-प्रतीक्षणं प्रतीक्षा ; ते आशाप्रतीक्षे । संगतं तत्संयोगजं[1] फलम् । सूनृतां च । सूनृता हि[2] प्रिया वाक्, तन्निमित्तं च[3] । इष्टापूर्ते । इष्टं यागजम्[4], पूर्तम् आरामादिक्रियाजं फलम् । पुत्रपशूंश्च । पुत्रांश्च पशूंश्च सर्वान् । एतत् सर्वं यथोक्तं वृङ्क्ते वर्जयति[5], विनाशयति इत्येतत् । पुरुषस्य अल्पमेधसः अल्पप्रज्ञस्य[6] । यस्य अनश्नन् अभुञ्जानः ब्राह्मणः गृहे वसति । तस्मात्[7] अनुपेक्षणीयः सर्वास्ववस्थास्वपि[8] अतिथिः इत्यर्थः ॥ ८ ॥

### यमेन वरत्रयप्रदानम्

**तिस्रो रात्रीर्यदवात्सीर्गृहे मेऽ-**
**नश्नन् ब्रह्मन्नतिथिर्नमस्यः ।**
**नमस्तेऽस्तु ब्रह्मन् स्वस्ति मेऽस्तु तस्मात्**
**प्रति त्रीन् वरान् वृणीष्व ॥ ९ ॥**

**यमस्य वरप्रदाने हेतुकथनम् –**

१३. एवमुक्तो मृत्युरुवाच नचिकेतसम् उपगम्य पूजापुरःसरम्— तिस्रो रात्रीः यत् यस्मात् अवात्सीः उषितवानसि गृहे मे मम अनश्नन्, हे ब्रह्मन् अतिथिः सन् नमस्यः नमस्कारार्हश्च । तस्मात्, नमः ते तुभ्यम्

1. तत्संयोगः· प्राप्यार्थसंयोगः । 'सत्संयोगजम्' इति तु वा॥; 'योगजम्' इति च (गो॥) व्याख्याकारः ॥
2. हिशब्दोऽनपेक्षित इति भाति ॥
3. 'फलम्' इति शेषः ॥
4. 'फलम्' इत्यधिकम् वा॥
5. 'आवर्जयति' इति (आ॥) पाठो न युक्तः ; धात्वर्थनिर्देशो ह्ययम् ॥
6. अतिथिष्वनादरो दोषाय इत्यजानत इत्यर्थः ॥
7. एवं प्रत्यवायश्रवणात् ॥
8. कष्टावस्थास्वपीत्यर्थः । 'सर्वावस्थास्वपि' इति वा॥

अस्तु भवतु । हे ब्रह्मन् स्वस्ति भद्रं मे अस्तु[1] । तस्मात्, भवतोऽनशनेन मद्गृहवासनिमित्ताद् दोषात् त्वत्प्राप्त्युपशमनेन[2] । यद्यपि भवदनुग्रहेण सर्वं मम स्वस्ति स्यात्, तथापि त्वदधिकसंप्रसादनार्थम् अनशनेनोषिताम् एकैकां रात्रिं प्रति त्रीन् वरान् वृणीष्व अभिप्रेतार्थविषयान् प्रार्थयस्व मत्तः॥

## नचिकेतसा प्रार्थितः प्रथमो वरः

**शान्तसंकल्पः सुमना यथा स्याद्**
**वीतमन्युर्गौतमो माभि मृत्यो ।**
**त्वत्प्रसृष्टं माभिवदेत् प्रतीत**
**एतत् त्रयाणां प्रथमं वरं वृणे ॥ १० ॥**

**पितुः सौमनस्यं प्रथमो वरः –**

१४. नचिकेतास्त्वाह – यदि दित्सुर्वरान्, शान्तसंकल्पः । उपशान्तः संकल्पो यस्य मां प्रति 'यमं प्राप्य किं नु करिष्यति मम पुत्रः' इति, स शान्तसंकल्पः । सुमनाः प्रसन्नचित्तश्च[3] यथा स्यात्, वीतमन्युः विगतरोषश्च । गौतमः मम पिता । मा अभि मां प्रति, हे मृत्यो । किञ्च, त्वत्प्रसृष्टं त्वया विनिर्मुक्तं प्रेषितं गृहं प्रति मा माम् अभिवदेत् प्रतीतः लब्धस्मृतिः 'स एवायं पुत्रो मम आगतः' इत्येवं प्रत्यभिजानन्[4] इत्यर्थः । एतत् प्रयोजनं त्रयाणां वराणां प्रथमम् आद्यं वरं वृणे प्रार्थये यत् पितुः परितोषणम् ॥ १० ॥

1. त्वदनादरप्रयुक्तः प्रत्यवायो मास्तु इत्यर्थः । यद्यपि ज्ञानिनो यमस्य नाकृतेन किञ्चित् प्रत्यवायोऽस्ति, तथापि लोकसंग्रहार्थमेवमुक्तम् आचरितं च तेन–इति मन्तव्यम् । गी. भा. ३–१८, बृ. भा. ४–४–६ ॥

2. उपशमेन इति वा॥ 3. 'प्रसन्नमनाश्च' आ॥ ; घ्नतस्तु वा॥

4. प्रेतीभूतोऽयमिति यथा नोपेक्षते, मम पुत्र एवायमिति च प्रत्यभिजानाति इत्यर्थः ॥

**यथा पुरस्ताद् भविता प्रतीत**
**औद्दालकिरारुणिर्मत्प्रसृष्टः ।**
**सुखꣳ रात्रीः शयिता वीतमन्यु-**
**स्त्वां ददृशिवान् मृत्युमुखात् प्रमुक्तम् ॥११**

मृत्युना प्रथमवरदानम् --

१५. मृत्युरुवाच – यथा बुद्धिः त्वयि पुरस्तात् पूर्वम् आसीत् स्नेहसमन्विता पितुस्तव, भविता प्रीतिसमन्वितः, तव पिता तथैव प्रतीतः प्रतीतवान् सन् । औद्दालकिः । उद्दालक एव औद्दालकिः[1] । अरुणस्य अपत्यम् आरुणिः । द्व्यामुष्यायणो वा[2] । मत्प्रसृष्टः मया अनुज्ञातः[3] सन् । इतरा[4] अपि रात्रीः सुखं प्रसन्नमनाः शयिता स्वप्ता[5] । वीतमन्युः विगतमन्युश्च भविता स्यात् त्वां पुत्रं ददृशिवान् दृष्टवान् सन् मृत्युमुखात् मृत्युगोचरात् प्रमुक्तं सन्तम् ॥ ११ ॥

## द्वितीयो वरः

**स्वर्गे लोके न भयं किञ्चनास्ति**
**न तत्र त्वं न जरया बिभेति ।**

1. स्वार्थेऽयं तद्धितः । अरुणस्यापत्यं हि स इत्युत्तरविशेषणाद् गम्यते -इति भावः ॥

2. अमुष्य पुत्रोऽमुष्यायणः । द्वयोः सबन्धी च अमुष्य पुत्रश्चेति द्व्यामुष्यायणः । उद्दालकस्य पुत्रः, वाग्दानेन अरुणस्यापीत्यतः, 'उद्दालकस्यापत्यम्' इत्यपि तद्धितः शक्यव्याख्यान इत्यभिप्रायः ॥

3. अनुगृहीतः । ममानुग्रहतः सर्वमेतत् स्यादिति भावः ॥

4. 'उत्तरा अपि' वा॥ ; अवशिष्टा रात्रीरित्यर्थः । यावज्जीवम् इति यावत् ॥

5. अमर्षरहित एस्य वाता, अत एव तस्य सुखनिद्रा लप्स्येतेति भावः ॥

उभे तीर्त्वा अशनायापिपासे
शोकातिगो मोदते स्वर्गलोके ॥ १२ ॥

स त्वमग्निँ स्वर्ग्यमध्येषि मृत्यो
प्रब्रूहि तँ[1] श्रद्दधानाय मह्यम् ।
स्वर्गलोका अमृतत्वं भजन्त
एतद् द्वितीयेन वृणे वरेण ॥ १३ ॥

अग्निविद्याप्रार्थना –

१६. नचिकेता उवाच – स्वर्गे[2]लोके रोगादिनिमित्तं भयं किञ्चन किञ्चिदपि नास्ति । न च तत्र त्वं मृत्यो सहसा[3] प्रभवसि । अतो जरया युक्तः इहलोकवत्[4] त्वत्तो न बिभेति कश्चित्[5] तत्र । किञ्च, उभे अशनायापिपासे तीर्त्वा अतिक्रम्य शोकमतीत्य गच्छति इति शोकातिगः सन् मानसेन दुःखेन वर्जितः, मोदते हृष्यति स्वर्गलोके दिवि[6] ॥ १२ ॥

एवंगुणविशिष्टस्य स्वर्गलोकस्य प्राप्तिसाधनभूतम् अग्निम् स्वर्ग्यं स त्वं मृत्युः अध्येषि स्मरसि । जानासि इत्यर्थः । हे मृत्यो, यतः, तं[7] प्रब्रूहि कथय श्रद्दधानाय श्रद्धावते मह्यं स्वर्गार्थिने । येनाग्निना

1. 'त्वम्' आ॥ 2. प्रजापतिलोके ॥
3. अकाले इत्यर्थः । कल्पान्ते तु मृत्युभयं स्वर्गस्याप्यस्ति यतः ॥
4. 'इहलोक इव' वा॥
5. 'कुतश्चित्' इति मै॥ पाठतो वरम् एष एव गृहीतः ॥
6. 'दिव्ये' इति आ॥ ; गृहीतस्तु वा॥ ; अशनायाद्यूर्मिषट्करहितः स्वर्गलोक इत्यभिप्रायः ॥
7. 'त्वम्' इति मूले भाष्ये च आ॥

चितेन स्वर्गलोकाः। स्वर्गो लोको येषां ते स्वर्गलोकाः यजमानाः अमृतत्वम् अमरणतां देवत्वं[1] भजन्ते प्राप्नुवन्ति। तदेतद् अग्निविज्ञानं[2] द्वितीयेन वरेण वृणे ॥ १३ ॥

प्र ते ब्रवीमि तदु मे निबोध
स्वर्ग्यमग्निं नचिकेतः प्रजानन्।
अनन्तलोकाप्तिमथो प्रतिष्ठां
विद्धि त्वमेतं निहितं गुहायाम् ॥ १४ ॥

मृत्योर्वरदानप्रतिज्ञा –

१७. मृत्योः प्रतिज्ञा इयम्। ते तुभ्यं प्रब्रवीमि। यत् त्वया प्रार्थितं तत्[3] उ मे मम वचसः निबोध बुध्यस्व एकाग्रमनाः सन्। स्वर्ग्यं स्वर्गाय हितम् स्वर्गसाधनम् अग्निं हे नचिकेतः, प्रजानन् विज्ञातवान् सन्। अहम्[4] इत्यर्थः। 'प्रब्रवीमि', 'तन्निबोध'–इति च शिष्यबुद्धिसमाधानार्थं वचनम्[5]। अधुना अग्निं स्तौति। अनन्तलोकाप्तिम्। स्वर्गलोकफलप्राप्तिसाधनम्[6] इत्येतत्। अथो अपि प्रतिष्ठाम्[7] आश्रयं जगतः, विराट्स्वरूपेण। तमेतम् अग्निं मया उच्यमानं विद्धि जानीहि[8] त्वं निहितं स्थितं गुहायां विदुषां बुद्धौ निविष्टम्[9] इत्यर्थः ॥ १४ ॥

---

1. ज्ञानकर्मसमुच्चयानुष्ठानतो हि देवत्वरूपम् अमृतत्वम्। ई. भा. ११. न च मुख्यामृतत्वं साधनसाध्यम्, नित्यत्वात् ॥ मुं. भा. १-२-११ (खं. ३१)

2. विराडुपासनरूपां विद्याम् ॥ 3. विज्ञानम् ॥

4. प्रजानन् प्रब्रवीमि – इति संबन्ध इति भावः ॥

5. सावधानचित्ततया शृणु-इत्यभिप्रायकं यमवचनमित्यर्थः ॥

6. अपरब्रह्मप्राप्तिलक्षणोऽपि स्वर्गोऽनन्त एव, इतरस्वर्गापेक्षया-इति भावः। अनन्तं ह वा अपारमक्षय्यं लोकं जयति। योऽग्निं नाचिकेतं चिनुते। य उ चैनमेवं वेद' (तै. ब्रा. ३-११-७-५) इति हि ब्राह्मणम् ॥

7. विराडेव हि आदित्यवाय्वग्निरूपेण त्रेधा अवस्थितः (बृ. १-२-३) तस्माद् विराड्रूपेणाग्निर्जगतः प्रतिष्ठा ॥

8. 'विजानीहि' इति वा॥ 9. उपासकैः साक्षात्कृत इत्यर्थः ॥

लोकादिमग्निं तमुवाच तस्मै
या इष्टका यावतीर्वा यथा वा ।
स चापि तत् प्रत्यवदद् यथोक्त-
मथास्य मृत्युः पुनरेवाह तुष्टः ॥ १५ ॥

इष्टकाचयनोपदेशः –

१८. इदं श्रुतेर्वचनम् । लोकादिं लोकानाम् आदिम् । प्रथमशरीरित्वात्[1] । अग्निं तं प्रकृतं नचिकेतसा प्रार्थितम् उवाच उक्तवान् मृत्युः, तस्मै नचिकेतसे । किञ्च या इष्टकाः चेतव्याः स्वरूपेण, यावतीर्वा सङ्ख्यया, यथा वा चीयते अग्निः येन प्रकारेण – सर्वमेतत्[2] उक्तवान् इत्यर्थः । स चापि नचिकेताः तत् मृत्युना उक्तं प्रत्यवदत् यथावत् प्रत्ययेन[3] अवदत् प्रत्युच्चारितवान् । अथ तस्य प्रत्युच्चारणेन तुष्टः सन् मृत्युः पुनरेव आह वरत्रयव्यतिरेकेण अन्यं वरं दित्सुः ॥ १५ ॥

प्रीतेन यमेन प्रत्तश्चतुर्थो वरः

तमब्रवीत् प्रीयमाणो महात्मा
वरं तवेहाद्य ददामि भूयः ।
तवैव नाम्ना भवितायमग्निः
सृङ्कां चेमामनेकरूपां गृहाण ॥ १६ ॥

---

1. ' स वै शरीरी प्रथमः स वै पुरुष उच्यते । आदिकर्ता स भूतानां ब्रह्माग्रे समवर्तत ' । (?) इति स्मृतेः ॥

2. चयनप्रकरणोक्तप्रकारेणेत्यर्थः । अत्र द्रष्टव्या भूमिका ॥

3. विज्ञाय ॥

**तुष्टेन मृत्युना सृङ्कादानम् –**

१९. कथम्[1] ? तं नचिकेतसम् अब्रवीत् । प्रीयमाणः शिष्यस्य[2] योग्यतां पश्यन् प्रीयमाणः प्रीतिमनुभवन्, महात्मा अक्षुद्र-बुद्धिः । वरं तव चतुर्थम्[3] इह प्रीतिनिमित्तम् अद्य इदानीं ददामि भूयः पुनः प्रयच्छामि । तवैव नचिकेतसः नाम्ना अभिधानेन[4] प्रसिद्धो भविता मया उच्यमानः अयमग्निः । किञ्च, सृङ्कां शब्दवतीं रत्नमयीं मालाम् इमाम् अनेकरूपां[5] विचित्रां गृहाण स्वीकुरु । यद् वा सृङ्काम् अकुत्सितां गतिं[6] कर्ममयीं गृहाण । अन्यदपि कर्मविज्ञानम् अनेकफलहेतुत्वात्[7] स्वीकुरु–इत्यर्थः ॥ १६ ॥

**त्रिणाचिकेतस्त्रिभिरेत्य सन्धिं**
**त्रिकर्मकृत् तरति जन्ममृत्यू ।**
**ब्रह्मजज्ञं देवमीड्यं विदित्वा**
**निचाय्येमाꣳ शान्तिमत्यन्तमेति ॥१७॥**

**ज्ञानकर्मसमुच्चयफलम् –**

२०. पुनरपि[8] कर्मस्तुतिमेवाह – त्रिणाचिकेतः त्रिःकृत्वः नाचिकेतोऽग्निः चितः येन सः त्रिणाचिकेतः[9] । तद्विज्ञानः, तदध्ययनः,

---

1. कथमाहेत्युच्यते ॥ 2. 'शिष्ययोग्यताम्' इति समस्तपदम् आ॥

3. पूर्वप्रत्तवरत्रितयापेक्षया । सू. १-४-६ भाष्ये वरप्रश्नसंख्याविचारः प्रतानितः ॥ 4. नाचिकेतोऽग्निः–इति नाम्ना ॥ 5. नीलपीतादिवर्णरत्नयुताम् ॥

6. जायस्व म्रियस्वेति तृतीया कुत्सिता गतिः पापकर्मफलम् । इयं तु पितृयाणदेवयानभिन्ना, अकुत्सिता पुण्या, कर्मोपासनफलभूता । सृजेर्गत्यर्थमादाय एवं व्याख्यातम् । द्रष्टव्यं १-२-३ भाष्ये सृङ्काम् इत्यस्य व्याख्यानम् ॥

7. अनेकफलहेतुत्वात् कर्मज्ञानयोः, गतिरप्यनेकरूपा इत्यर्थः ॥

8. अनन्तलोकाप्तिम् इत्यादिना स्तुत्वापि पुनस्तत्स्तुतिमेवाह-इत्यर्थः । अत्र कर्मण उपसर्जनत्वम् उपासनायाश्च प्राधान्यं विवक्षितम् । अत्र विषये द्रष्टव्यं परिशिष्टे सायणभाष्यसहितं तैत्तिरीयब्राह्मणम् ॥

9. त्रिणाचिकेतः पङ्क्तिपावनत्वेन स्तुतो धर्मशास्त्रेषु ॥ गौ.ध. २-६-२९.

तदनुष्ठानवान् वा[1] । त्रिभिः मातृपित्राचार्यैः एत्य प्राप्य सन्धिं सन्धानं संबन्धम् । मात्राद्यनुशासनं यथावत् प्राप्य इत्येतत्[2] । तद् हि प्रामाण्यकारणं[3] श्रुत्यन्तरादवगम्यते 'यथा मातृमान् पितृमान्' (बृ. ४-१-२) इत्यादेः । वेदस्मृतिशिष्टैर्वा ; प्रत्यक्षानुमानागमैर्वा[4] । तेभ्यो हि विशुद्धिः प्रत्यक्षा[5] । त्रिकर्मकृत् इज्याध्ययनदानानां[6] कर्ता । तरति अतिक्रामति जन्ममृत्यू । किञ्च, ब्रह्मजज्ञम् । ब्रह्मणो हिरण्यगर्भात् जातो ब्रह्मजः ; ब्रह्मजश्च असौ ज्ञश्च इति ब्रह्मजज्ञः । सर्वज्ञो ह्यसौ[7] । तं देवं द्योतनात् ज्ञानादिगुणवन्तम्[8] । ईड्यम् स्तुत्यम् । विदित्वा शास्त्रतः, निचाय्य दृष्ट्वा चात्मभावेन[9] । इमां स्वबुद्धिप्रत्यक्षां[10] शान्तिम् उपरतिम्

---

1. 'तद्विज्ञानवान् वा' इत्येतावत् वा॥ ; अस्मिन् पाठे तदुपासक इत्यर्थः ॥

2. आदौ माता, उपनयनपर्यन्तं पिता, तस्मादूर्ध्वमासमावर्तनम् आचार्यः – इत्येवं मात्रादिभिरनुशासनं लब्ध्वा-इत्यर्थः ॥

3. मात्राद्यनुशासनेन शुद्धित्रयहेतुसंयुक्त आचार्यः कदाचिदपि प्रामाण्यान्न व्यभिचरतीति शैलिन्याद्युक्तवागादिब्रह्माणि प्रमाणवन्तीति हि तत्र श्रुतौ याज्ञवल्क्येनोक्तम् ॥

4. 'वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् । आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥' (मनु॰ २-६) ; 'प्रत्यक्षं चानुमानं च शास्त्रं च विविधागमम् । त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सता ॥' (मनु॰ १२-१०५) ; 'वेदो धर्ममूलम् । तद्विदां च स्मृतिशीले ।' (गौ॰ ध॰ १-१-१. २)-इत्यादिस्मृतयोऽत्रानुसंधेयाः ॥

5. विशुद्धिः प्रत्यक्षा-अनुभवसिद्धा इत्यर्थः ॥

6. इज्या यागः, अध्ययनं प्रसिद्धम्, दानं बहिर्वेदि दीयमानम् ॥

7. ब्रह्मा हिरण्यगर्भः, तज्जः विराट् । उपाधिभेदमात्रेण तयोर्भेद इति सोऽपि सर्वज्ञः । जातमात्रस्य द्वितीयाभावेन हेतुना भयविगमो हि श्रूयते तस्य ॥ (बृ॰ १-४-२)

8. ज्ञानवैराग्यैश्वर्यधर्माणां सहसिद्धिस्मृतेः ॥

9. साक्षात्कृत्य इत्यर्थः ॥　　10. स्वसंवेद्याम् ॥

अत्यन्तमेति अतिशयेन एति । वैराजं पदं ज्ञानकर्मसमुच्चयानुष्ठानेन प्राप्नोति–इत्यर्थः[1] ॥ १७ ॥

### अग्निविज्ञानप्रकरणोपसंहारः

**त्रिणाचिकेतस्त्रयमेतद् विदित्वा**
**य एवं विद्वाँश्चिनुते नाचिकेतम् ।**
**स मृत्युपाशान् पुरतः प्रणोद्य**
**शोकातिगो मोदते स्वर्गलोके ॥ १८ ॥**

**एष तेऽग्निर्नचिकेतः स्वर्ग्यो**
**यमवृणीथा द्वितीयेन वरेण ।**
**एतमग्निं तवैव प्रवक्ष्यन्ति जनास-**
**स्तृतीयं वरं नचिकेतो वृणीष्व ॥ १९ ॥**

फलोपसंहारः –

२१. इदानीम् अग्निविज्ञानचयनफलम्[2] उपसंहरति, प्रकरणं च[3]–

त्रिणाचिकेतः त्रयं यथोक्तम् 'या इष्टका यावतीर्वा यथा वा'[4] (१-१-१५) इति, एतद् विदित्वा अवगम्य । यश्च एवम् आत्मरूपेण[5]

---

1. ब्रह्मलोकप्राप्तिद्वारेण मुक्तिं भजते, सति तत्र ज्ञाने ; अन्यथा तु कल्पान्तस्थायिलोके शान्तिमेति – इत्यभिप्रायः । साक्षात्कारेण इहैवानुभूता शान्तिर्वैराजे लोकेऽपि अवतिष्ठते इति ज्ञेयम् ॥

2. उपासनं चयनकर्म चेत्येतयोः फलम् ॥ 3. द्वितीयवरप्रकरणं च ॥

4. विंशत्यधिकानि सप्तशतानि इष्टकानां संख्या ; संवत्सरस्याहोरात्राणि च तावत्संख्याकान्येव । संख्यासामान्यात् तैरिष्टकास्थानीयैश्चितोऽग्निरहम् इति आत्मभावेन ध्यात्वा ' इति (आ॥ गि॥) टीका ॥

5. 'आत्मस्वरूपेण ' वा॥ साक्षात्कृत्य इति च द्रष्टव्यम् । 'अवगम्य ', 'आत्मरूपेण विद्वान् ' इति भाष्यस्वारस्यात् । 'यस्य स्याद्द्धा' (छां· ३-१४-४) इति श्रुत्युक्तन्यायानुसरणाच्च ॥ सू· भा· ३-३-५९.

अग्निं विद्वान् चिनुते निर्वर्तयति[1] नाचिकेतमग्निं क्रतुम्। सः मृत्युपाशान् अधर्मज्ञानरागद्वेषादिलक्षणान् पुरतः अग्रतः। पूर्वमेव शरीरपातात्[2]— इत्यर्थः। प्रणोद्य अपहाय। शोकातिगः। मानसैर्दुःखैर्वर्जितः[3] इत्येतत्। मोदते स्वर्गलोके, वैराजे[4] विराडात्मस्वरूपप्रतिपत्त्या[5] ॥ १८ ॥

प्रकरणोपसंहारः —

२२. एषः ते तुभ्यम् अग्निः वरः हे नचिकेतः स्वर्ग्यः स्वर्गसाधनः। यम् अग्निं[6] वरम् अवृणीथाः[7] प्रार्थितवानसि द्वितीयेन वरेण, सोऽग्निर्वरो दत्तः इत्युक्तोपसंहारः। किञ्च एतं अग्निं तवैव नाम्ना प्रवक्ष्यन्ति जनासः। जनाः इत्येतत्। एष वरो दत्तो मया चतुर्थः तुष्टेन[8]। तृतीयं वरं नचिकेतः, वृणीष्व। तस्मिन् हि अदत्ते ऋणवानेवाहम् इत्यभिप्रायः ॥ १९ ॥

## तृतीयो वरः

उत्तरग्रन्थसंबन्धः —

२३. एतावद् हि अतिक्रान्तेन विधिप्रतिषेधार्थेन मन्त्रब्राह्मणेन अवगन्तव्यं यद् वरद्वयसूचितं वस्तु[9], नात्मतत्त्वविषययाथात्म्यविज्ञानम्।

---

1. अनुतिष्ठति कर्म चोपासनं च ॥ 2. एतद् दृष्टं फलम् ॥
3. 'विगतः' वा॥
4. एष लोकः परेणादित्यं वर्तते इति तै. ब्रा. ११-७-४.
5. यां यां देवतामुपास्ते तां ताम् इहैव साक्षात्कृत्य शरीरपातानन्तरं तां तामेव अपिगच्छतीति वेदवादः ॥ बृ. ४-१-२.
6. अग्निचयनम् तदुपासनं च इत्यर्थः ॥
7. एतस्यानन्तरं 'वृतवान्' इत्यधिकं वा॥
8. इत्युपसंहरति प्रकरणविच्छेदसूचनार्थम् इति भावः ॥
9. पितृसौमनस्यम्; अग्निचयनरूपं कर्म, अग्न्युपासनं च - इत्येतद् यद् वरद्वयम् तेन सूचितं वाचिककायिकमानसकर्मसाध्यं वस्तु यत्, तावदेव हि अतिक्रान्तेन विधिप्रतिषेधार्थेन कर्मकाण्डेन अवगन्तव्यम् - इत्युक्तमत्र। तेन कर्मकाण्डोक्तकर्मनिष्ठाफलस्य परिच्छिन्नत्वमुक्तं भवति- इत्यभिप्रायः ॥

अतो विधिप्रतिषेधार्थविषयस्य[1] आत्मनि क्रियाकारकफलाध्यारोपणलक्षणस्य स्वाभाविकस्याज्ञानस्य[2] संसारबीजस्य[3] निवृत्त्यर्थं तद्विपरीतब्रह्मात्मैकत्वविज्ञानं क्रियाकारकफलाध्यारोपणशून्यम्[4] आत्यन्तिकनिःश्रेयसप्रयोजनं[5] वक्तव्यम् इत्युत्तरो ग्रन्थ आरभ्यते । तमेतमर्थम्[6] द्वितीयवरप्राप्त्याप्यकृतार्थत्वं तृतीयवरगोचरम् आत्मज्ञानमन्तरेण—इत्याख्यायिकया प्रपञ्चयति । यतः पूर्वस्मात् कर्मगोचरात्, साध्यसाधनलक्षणात्[7] अनित्याद् विरक्तस्य[8] आत्मज्ञानेऽधिकारः इति तन्निन्दार्थं[9] पुत्राद्युपन्यासेन प्रलोभनं क्रियते ॥

1. विधिप्रतिषेधार्थविषयभूतं कर्म, तच्च क्रियाकारकफलाध्यारोपणलक्षणाज्ञानकृतम् इति अज्ञानमेव विधिप्रतिषेधार्थविषय इत्युक्तमिति ध्येयम् ॥

2. अविचारस्वभावादेव हि जने अज्ञानं वर्तते ॥

3. अज्ञानात् कामः, ततश्च कर्म तत्फलभोगश्चेत्यतः, अज्ञानमेव संसारबीजमिति भावः ॥

4. क्रियाकारकफलाध्यारोपणविपरीतं ब्रह्मात्मैकत्वविज्ञानम् । कथं तद्विपरीतं तत् ? इत्यत आह – क्रियाकारकफलाध्यारोपणशून्यम् इति । अत्र 'क्रियाकारकफलाध्यारोपणलक्षण' इति आ॥ पाठे लक्षणशब्दोऽधिकोऽनपेक्षितश्च ॥

5. यत्तु वैराजं पदमुक्तं फलत्वेन, न तदात्यन्तिकम् । कालपरिच्छेदवत्त्वात् (गी· भा· ८-१७, अव.) – इति भावः ॥

6. ननु कथमिदमवगम्यते यदनात्यन्तिकफलमतीतवरद्वयोपदिष्टं ज्ञानमिति ? तत्राह – 'तमेतमर्थम्' इति । आत्मनि क्रियाकारकफलाध्यारोपणेन पितापुत्रसंबन्धमूरीकृत्य पितृसौमनस्यं यद् वृतं नचिकेतसा, यच्च 'या इष्टका' इत्यादिना अग्निविज्ञानम्, तद् अनात्यन्तिकफलमेव, 'अनन्तलोकाप्तिम्', 'तरति जन्ममृत्यू' – इत्येवं संस्तुतमपीति यद् वयमवोचाम तमर्थम्, एतम् इदानीं तृतीयवरगोचरमात्मज्ञानं विना अकृतार्थत्वमेवेति प्रदर्शयिष्यमाणं बुद्धिसंनिहितम्, आख्यायिकया प्रपञ्चयति श्रुतिः–इत्यर्थः ॥

7. साधनानि पुत्रकर्मोपासनानि, साध्या मनुष्यपितृदेवलोकाः (बृ· १-५-१६) ॥ 8. मुं· भा· २-१-१२·

9. 'अन्यनिन्दा अन्यस्तुतये' इति न्यायेन आत्मज्ञानस्तुत्यर्थं विरक्तस्यैव तत्राधिकार इति प्रदर्शनार्थम् इत्यर्थः । तदेवं तन्निन्दार्थं प्रलोभनं क्रियते यतः, अतोऽवगम्यते यद् वरद्वयसूचितं वस्तु नात्यन्तिकनिःश्रेयसायेति–इति संबन्धः ॥

**येयं प्रेते विचिकित्सा मनुष्ये**
**अस्तीत्येके नायमस्तीति चैके ।**
**एतद् विद्यामनुशिष्टस्त्वयाहं**
**वराणामेष वरस्तृतीयः ॥ २० ॥**

आत्मज्ञानप्रार्थना –

२४. नचिकेता उवाच – 'तृतीयं वरं नचिकेतो वृणीष्व' इत्युक्तः सन् –

येयं विचिकित्सा संशयः[1] प्रेते मृते मनुष्ये अस्तीत्येके अस्ति शरीरेन्द्रियमनोबुद्धिव्यतिरिक्तो देहान्तरसंबन्धी आत्मा–इति एके[2] । नायमस्ति इति च एके नायम् एवंविधः अस्ति इति च एके । अतश्च[3] अस्माकं न प्रत्यक्षेण नापि अनुमानेन निर्णयविज्ञानम्[4] । एतद्विज्ञानाधीनो हि परः पुरुषार्थः[5] इत्यतः एतद् विद्यां विजानीयाम् अहम् अनुशिष्टः ज्ञापितः[6] त्वया । वराणामेष वरः तृतीयोऽवशिष्टः ॥ २० ॥

---

1. वादग्रस्तत्वात् । अत्र विप्रतिपत्तिरमुपदमेव प्रदर्शयिष्यते यतः ॥

2. 'एके' इत्यस्यानन्तरं 'मन्यन्ते' इत्यधिकं वा॥ ; अस्तीति नैयायिकमीमांसकादयः, नास्तीति बौद्धचार्वाकादयः ॥

3. विप्रतिपन्नत्वादेवेत्यर्थः । 'अत्र च' इति तु वा॥

4. न हि प्रत्यक्षगम्येऽर्थे विप्रतिपद्यते कश्चित् । अस्ति तु आत्मनि विप्रतिपत्तिः, अस्ति नास्तीति च । न च आत्मनो नियतसहचारिलिङ्गाभावे धूमाद् वह्नेरिव अनुमानप्रमाणेन विज्ञानं भवति ॥

5. यत् संदिग्धं सप्रयोजनं च तद् विजिज्ञास्यं भवति । अयमात्मा च संदिग्धः, तद्विज्ञानेन मुक्तिरूपः परमपुरुषार्थश्चास्ति ॥

6. आगमवता त्वया उपदिष्टः इत्यर्थः । एतच्च यथा, तथा अग्रे स्फुटीभविष्यति ॥

**देवैरत्रापि विचिकित्सितं पुरा**
**न हि सुज्ञेयमणुरेष धर्मः ।**
**अन्यं वरं नचिकेतो वृणीष्व**
**मा मोपरोत्सीरति मा सृजैनम् ॥ २१ ॥**

यमेन शिष्यबुद्धिविचालनम् –

२५. किमयम् एकान्ततो[1] निःश्रेयससाधनात्मज्ञानार्हः, न वा– इत्येतत्परीक्षणार्थम्[2] आह –

देवैरपि[3] अत्र एतस्मिन् वस्तुनि[4] विचिकित्सितं संशयितं पुरा पूर्वम् । न हि सुज्ञेयं[5] सुष्ठु विज्ञेयम्, श्रुतमपि[6] प्राकृतैर्जनैः[7] । यतः अणुः सूक्ष्मः[8] एषः आत्माख्यः **धर्मः**[9] । अतः अन्यम् असन्दिग्धफलं[10] वरं नचिकेतः, वृणीष्व । मा मां[11] मा उपरोत्सीः उपरोधं मा कार्षीः, अधमर्णम् इव उत्तमर्णः[12]। अतिसृज विमुञ्च एनं वरं मा मां प्रति ॥ २१ ॥

---

1. नियमतः । किं कुतूहलमात्रेण पृच्छति, किं वा आत्मज्ञानेनैवार्थी इति निर्धारणार्थं यमः प्राह इत्यर्थः ॥

2. अधिकारिणि हि प्रमितिजनक उपदेशः, इत्यतः किमयम् अधिकारी न वा इत्येतत्परीक्षणार्थम् । मुं भा॰ १-२-१३, प्र॰ भा. १-२॰

3. अपिशब्दो मूले भिन्नक्रम इति भावः ॥ 4. आत्मनि विषये ॥

5. ‘ सुविज्ञेयम् ’ इत्युपसर्गसहितं पाठान्तरं मूले भाष्ये च उत्तरमन्त्रे च ॥

6. ‘ असकृच्छ्रुतमपि ’ वा॥ 7. १-२-७.

8. अतीन्द्रियः ॥ सू॰ भा॰ २-३-२९ ; मुं॰ भा॰ ३-१-९.

9. वस्तु॰

10. सन्दिग्धफलस्तावदेष वरः, यतः शृण्वतापि न नियमेन लभ्यं ज्ञानम् ॥ 11. नास्त्येतत् पदं क्वचित् ॥

12. अधमर्णम् उत्तमर्णः यथा ऋणापकरणाय निर्बध्नाति तथा मां ज्ञानं वक्तुं निर्बन्धेन मा प्रयोजय । यद्यप्यहं तृतीयवरप्रदानेन ऋणवानस्मीत्यभिप्रायः ॥

**देवैरत्रापि विचिकित्सितं किल**
**त्वं च मृत्यो यन्न सुज्ञेयमात्थ ।**
**वक्ता चास्य त्वादृगन्यो न लभ्यो**
**नान्यो वरस्तुल्य एतस्य कश्चित् ॥ २२ ॥**

**नचिकेतसः स्थैर्यमात्मजिज्ञासायाम् –**

२६. एवमुक्तो नचिकेता आह – देवैः अत्रापि[1] विचिकित्सितं किल इति भवत एव नः श्रुतम् । त्वं च मृत्यो यत् यस्मात् न सुज्ञेयम् आत्मतत्त्वम् आत्थ कथयसि[2], अतः पण्डितैरपि अवेदनीयत्वात् । वक्ता च अस्य धर्मस्य त्वादृक् त्वत्तुल्यः अन्यः पण्डितश्च न लभ्यः, अन्विष्यमाणोऽपि[3] । अयं तु वरो निःश्रेयसप्राप्तिहेतुः[4] । अतः न अन्यः वरः तुल्यः सदृशः अस्ति एतस्य कश्चिदपि । अनित्यफलत्वात् अन्यस्य सर्वस्यैव– इत्यभिप्रायः ॥ २२ ॥

**शतायुषः पुत्रपौत्रान् वृणीष्व**
**बहून् पशून् हस्तिहिरण्यमश्वान् ।**
**भूमेर्महदायतनं वृणीष्व**
**स्वयं च जीव शरदो यावदिच्छसि ॥ २३ ॥**

---

1. अत्रापि । अपिशब्दो भिन्नक्रम इहापि पूर्ववत् । 'अस्मिन् वस्तुनि' इत्यधिकम् आ॥

2. यतस्त्वमपि देवः सन् एवं कथयसि ततो नूनम् अनर्घमस्य ज्ञानमिति भावः ॥

3. साक्षात्कृतपरतत्त्वो ह्यसि त्वमप्रतिहतज्ञानो देव इति भावः ॥

4. देवानामपि संदेहकारणम्, न सुविज्ञेयम्, परमपुरुषार्थप्रदं च – इत्यतो निरुपम एष वर इति निश्चीयत इति भावः ॥

एतत्तुल्यं यदि मन्यसे वरं
वृणीष्व वित्तं चिरजीविकां च ।
महाभूमौ नचिकेतस्त्वमेधि
कामानां त्वा कामभाजं करोमि ॥ २४ ॥

ये ये कामा दुर्लभा मर्त्यलोके
सर्वान् कामाꣳश्छन्दतः प्रार्थयस्व ।
इमा रामाः सरथा सतूर्या
न हीदृशा लम्भनीया मनुष्यैः ।
आभिर्मत्प्रत्ताभिः परिचारयस्व
नचिकेतो मरणं माऽनुप्राक्षीः ॥ २५ ॥

आत्मज्ञानफलतुल्यतया उपस्थापितानि कतिचित् फलानि –

२७. एवमुक्तोऽपि पुनः प्रलोभयन्नुवाच मृत्युः –

शतायुषः । शतं वर्षाणि आयूंषि येषां तान् शतायुषः पुत्रपौत्रान् वृणीष्व । किञ्च गवादिलक्षणान् बहून् पशून्, हस्तिहिरण्यम् । हस्ती च हिरण्यं च हस्तिहिरण्यम् । अश्वांश्च । किञ्च भूमेः पृथिव्याः महत् विस्तीर्णम् आयतनम् आश्रयं मण्डलं राज्यं[1] वृणीष्व । किञ्च सर्वमप्येतत् अनर्थकं स्वयं चेदल्पायुः, इत्यत आह – स्वयं च त्वं जीव धारय शरीरं समग्रेन्द्रियकलापं शरदः वर्षाणि यावत् इच्छसि जीवितुम् ॥ २३ ॥

एतत्तुल्यम् एतेन यथोपदिष्टेन सदृशम् अन्यमपि यदि मन्यसे वरम् तमपि वृणीष्व । किञ्च वित्तं प्रभूतं हिरण्यरत्नादि चिरजीविकां च

1. 'साम्राज्यम्' वा॥

सह वित्तेन । वृणीष्व इत्येतत् । किं बहुना ? महाभूमौ महत्यां भूमौ राजा नचिकेतः, त्वम् एधि भव । किं चान्यत् । कामानां दिव्यानां मानुषाणां च त्वा त्वां कामभाजं कामभागिनं कामार्हं करोमि । सत्यसङ्कल्पो ह्यहं देवः[1] ॥ २४ ॥

ये ये कामाः प्रार्थनीया दुर्लभाश्च मर्त्यलोके सर्वान् तान् कामान् छन्दतः इच्छातः प्रार्थयस्व । किञ्च, इमा दिव्याः अप्सरसः रमयन्ति पुरुषान् इति रामाः । सह रथैर्वर्तन्त इति सरथाः । सतूर्याः सवादित्राः । ताश्च न हि लम्भनीयाः प्रापणीयाः ईदृशाः एवंविधाः मनुष्यैः मर्त्यैः, अस्मदादिप्रसादमन्तरेण । आभिः मत्प्रत्ताभिः मया प्रदत्ताभिः परिचारिणीभिः[2] परिचारयस्व आत्मानम् । पादप्रक्षालनादिशुश्रूषां कारय आत्मनः—इत्यर्थः । हे नचिकेतः, मरणं मरणसंबद्धं प्रश्नम्, प्रेते अस्ति नास्तीति काकदन्तपरीक्षारूपं[3] मा अनुप्राक्षीः । मैवं प्रष्टुमर्हसि ॥ २५ ॥

**श्वोभावा मर्त्यस्य यदन्तकैतत्**
**सर्वेन्द्रियाणां जरयन्ति तेजः ।**
**अपि सर्वं जीवितमल्पमेव**
**तवैव वाहास्तव नृत्यगीते ॥ २६ ॥**

**न वित्तेन तर्पणीयो मनुष्यो**
**लप्स्यामहे वित्तमद्राक्ष्म चेत् त्वा ।**
**जीविष्यामो यावदीशिष्यसि त्वं**
**वरस्तु मे वरणीयः स एव ॥ २७ ॥**

1. अतः मत्संकल्पमात्रात् एतत्सर्वं तव भविता ॥
2. 'परिचारिकाभिः' वा॥
3. काकस्य कति वा दन्ताः इति परीक्षावत् निरर्थकम् इत्यर्थः ॥

अजीर्यताममृतानामुपेत्य
जीर्यन् मर्त्यः क्वधःस्थः प्रजानन् ।
अभिध्यायन् वर्णरतिप्रमोदा-
नतिदीर्घे जीविते को रमेत ॥ २८ ॥

नचिकेतसा सर्वकामोपभोगनिन्दा –

२८. एवं मृत्युना[1] प्रलोभ्यमानोऽपि नचिकेता महाह्रदवत्[2] अक्षोभ्य आह –

श्वोभावाः[3] । श्वो भविष्यन्ति न भविष्यन्ति[4] वा इति सन्दिह्यमान एव एषां भावो भवनं त्वया उपन्यस्तानां भोगानां ते श्वोभावाः । किञ्च, मर्त्यस्य मनुष्यस्य, अन्तक हे मृत्यो, यदेतत् सर्वेन्द्रियाणां तेजः तत् जरयन्ति अपक्षपयन्ति[5] । अप्सरःप्रभृतयो भोगाः । अनर्थायैव एते धर्मवीर्यप्रज्ञातेजोयशःप्रभृतीनां क्षपयितृत्वात्[6] । यां चापि दीर्घजीविकां त्वं दित्ससि तत्रापि श्रुणु । सर्वं यद् ब्रह्मणोऽपि जीवितम् आयुः अल्पमेव[7] किमुत अस्मदादिदीर्घजीविका । अतः तवैव तिष्ठन्तु वाहाः रथादयः तथा तव[8] नृत्यगीते च ॥ २६ ॥

किञ्च, न प्रभूतेन वित्तेन तर्पणीयो मनुष्यः । न हि लोके वित्तलाभः कस्यचित् तृप्तिकरो दृष्टः । यदि नाम अस्माकं वित्ततृष्णा स्यात्, लप्स्यामहे प्राप्स्यामहे वित्तम् इत्येतत्(?)[9] अद्राक्ष्म दृष्टवन्तो वयं चेत्

1. नास्त्येष शब्दः आ॥ वा॥ पाठे 'मृत्युना एवं' इति ॥
2. पल्वलश्चेत् सुखेन क्षुभ्येत, न तु महाह्रदः ॥
3. नास्त्येतत् पदं क्वचित् ॥ 4. नास्ति वा॥
5. 'अपक्षयन्ति' आ॥
6. छां. भा. ८-१४-१. (अदत्कम् इत्यस्य व्याख्या)
7. गी. भा. ८-१७. 8. नास्त्येतत् आ॥ 9. नास्ति वा॥

त्वा त्वाम् । जीवितमपि तथैव । जीविष्यामः यावत् याम्ये पदे त्वम् ईशिष्यसि[1] ईशिष्यसे । प्रभुः स्याः । कथं हि मर्त्यः त्वया समेत्य अल्पधनायुर्भवेत्[2] ? वरस्तु मे वरणीयः स एव । यदात्मविज्ञानम् ॥

यतश्च अजीर्यतां वयोहानिम् अप्राप्नुवताम् अमृतानां सकाशम् उपेत्य उपगम्य आत्मन उत्कृष्टं प्रयोजनान्तरं प्राप्तव्यं तेभ्यः प्रजानन् उपलभमानः, स्वयं तु जीर्यन् मर्त्यः जरामरणवान् कधःस्थः । कुः पृथिवी अधश्चासौ अन्तरिक्षादिलोकापेक्षया, तस्यां तिष्ठतीति कधःस्थः सन् । कथमेवम् अविवेकिभिः प्रार्थनीयं पुत्रवित्तादि[3] अस्थिरं वृणीते ? 'क तदास्थः' इति वा पाठान्तरम् । अस्मिन् पक्षे च एवम्[4] अक्षरयोजना— तेषु पुत्रादिषु आस्था आस्थितिः तात्पर्येण वर्तनं यस्य स तदास्थः । ततोऽधिकतरं पुरुषार्थं दुष्प्रापमपि प्रापिपयिषुः[5] क तदास्थो भवेत् ? न कश्चित् तदसारज्ञः तदर्थी स्यात् इत्यर्थः । सर्वो हि उपर्युपर्येव बुभूषति लोकः । तस्मात्, न पुत्रवित्तादिलोभैः[6] प्रलोभ्योऽहम् । किञ्च, अप्सरः-प्रमुखान् वर्णरतिप्रमोदान्[7] अनवस्थितरूपतया अभिध्यायन् निरूपयन् यथावत् अतिदीर्घे जीविते को विवेकी रमेत ? ॥ २८ ॥

## तृतीयवरप्रार्थनोपसंहारः

**यस्मिन्निदं विचिकित्सन्ति मृत्यो**
**यत् सांपराये महति ब्रूहि नस्तत् ।**

---

1. ईशिष्यसि स्वम् इति व्यत्ययेन क्वचित् ॥
2. तथा चैतत् प्राप्तमेवेति न पुनर्वरणीयमिति भावः ॥
3. 'हिरण्यादि' इति वा॥ 4. नास्तीदम् क्वा॥
5. 'अभिप्रेप्सुः' वा॥ 6. 'लाभैः' पाठान्तरम् ॥
7. वर्णाः प्रतीयमाना वस्तुगुणाः ; तेषु रत्या ये प्रमोदाः, तान् ॥

**योऽयं वरो गूढमनुप्रविष्टो**
**नान्यं तस्मान्नचिकेता वृणीते ॥ २९ ॥**

इति प्रथमाध्याये प्रथमा वल्ली ॥

**आत्मविज्ञानमेव मम वाञ्छितं नान्यदिति प्रतिज्ञा–**

२९. अतो विहाय अनित्यैः कामैः प्रलोभनम्, यन्मया प्रार्थितं यस्मिन् प्रेते इदं विचिकित्सनं[1] विचिकित्सन्ति 'अस्ति' 'नास्ति'– इत्येवंप्रकारम्, हे मृत्यो सांपराये परलोकविषये[2] महति महत्प्रयोजननिमित्ते[3] आत्मनो निर्णयविज्ञानं यत् तत् ब्रूहि कथय नः अस्मभ्यम्। किं बहुना ? योऽयं प्रकृत आत्मविषयः वरः गूढं गहनं दुर्विवेचनं प्राप्तः अनुप्रविष्टः, तस्मात् वरात् अन्यं अविवेकिभिः प्रार्थनीयम् अनित्यविषयं वरं नचिकेताः न वृणीते मनसापि–इति श्रुतेर्वचनमिति[4] ॥ २९ ॥

इति श्रीशङ्करभगवतः कृतौ काठकोपनिषत्प्रथमाध्याये प्रथमवल्लीभाष्यम् ॥

---

1. 'विचिकित्सितम्' इति पाठान्तरम् ॥

2. 'परलोकविषये' इति सांपराये इत्यस्य अक्षरार्थकथनम्, प्रकृतं तु देहाद्यतिरिक्तात्मविषयकमेव विज्ञानम्, न तु लोकान्तरगम्यम्। तदपि हि परो लोकः ॥

3. प्रयोजनस्य महत्त्वात् साधनस्यापि ज्ञानस्य महत्त्वमित्यभिप्रायः ॥

4. श्रुतेर्वचनम् नचिकेतसोऽधिकारिगुणवत्त्वं ख्यापयितुम् इत्यर्थः ॥ अत्र नचिकेता नान्यं वरं वृणीते, नाहमन्यं वृणे इत्यस्मिन्नर्थे नचिकेतस एवेदं वचनमित्यपि व्याख्यातुं शक्यत इति भाति ॥

# प्रथमाध्याये – द्वितीया वल्ली

## विद्याविद्ययोर्विद्याया एव श्रेयस्करत्वम्

अन्यच्छ्रेयोऽन्यदुतैव प्रेय-
स्ते उभे नानार्थे पुरुषꣳ सिनीतः ।
तयोः श्रेय आददानस्य साधु
भवति हीयतेऽर्थाद् य उ प्रेयो वृणीते ॥ १ ॥

श्रेयःसाधनमुपाददानस्यैव पुरुषार्थः –

३०. परीक्ष्य शिष्यं विद्यायोग्यतां चास्य[1] अवगम्य आह – अन्यत् पृथगेव श्रेयः निःश्रेयसम् तथा अन्यत् उतैव अपि च प्रेयः प्रियतरमपि । ते श्रेयःप्रेयसी उभे नानार्थे भिन्नप्रयोजने सती पुरुषम् अधिकृतं वर्णाश्रमादिविशिष्टं[2] सिनीतः बध्नीतः । ताभ्याम्[3] आत्मकर्तव्यतया प्रयुज्यते सर्वः पुरुषः । श्रेयःप्रेयसोर्हि अभ्युदयामृतत्वार्थी[4] पुरुषः प्रवर्तते । अतः श्रेयःप्रेयःप्रयोजनकर्तव्यतया ताभ्यां बद्ध इत्युच्यते सर्वः पुरुषः[5] । ते यद्यपि एकैकपुरुषार्थसंबन्धिनी विद्याविद्यारूपत्वात्

1. नास्त्येतत् पदं वा॥
2. वर्णाश्रमविहितकर्मणि अवश्यमधिकारी प्रवर्तते ॥
3. 'ताभ्याम्' इत्यस्यानन्तरम् 'विद्याविद्याभ्याम्' इत्यधिकं वा॥ ; तत्र श्रेयःप्रेयोभ्याम् इत्यस्यैव विस्पष्टकथनं तदिति व्याख्येयम् । श्रेयःप्रेयःसाधनयोर्हि अत्र स्वकर्तव्यतया पुरुषः प्रयुज्यते इत्युच्यते ॥
4. अमृतत्वार्थी मुमुक्षुः श्रेयःसाधने प्रवर्तते, स्वर्गाद्यभ्युदयार्थी प्रेयःसाधने प्रवर्तते ॥
5. सर्वस्यापि पुरुषस्य अधिकृतस्य पुरतः श्रेयःप्रेयसी यद्यपि भातः ॥

विरुद्धे[1] इति अन्यतरापरित्यागेन एकेन पुरुषेण सहानुष्ठातुम् अशक्यत्वात्, तयोः हित्वा अविद्यारूपं[2] प्रेयः, श्रेय एव केवलम् आददानस्य उपादानं कुर्वतः साधु शोभनं शिवं भवति । यस्तु अदूरदर्शी विमूढो[3] हीयते वियुज्यते अर्थात् पुरुषार्थात् पारमार्थिकात् प्रयोजनात् नित्यात् प्रच्यवते इत्यर्थः । कोऽसौ ? य उ प्रेयः वृणीते उपादत्ते इत्येतत् ॥ १ ॥

श्रेयश्च प्रेयश्च मनुष्यमेत-
स्तौ संपरीत्य विविनक्ति धीरः ।
श्रेयो हि धीरोऽभि प्रेयसो वृणीते
प्रेयो मन्दो योगक्षेमाद् वृणीते ॥ २ ॥

**विवेकिन एव श्रेयःसाधनं वृणते –**

३१. यदि उभे अपि कर्तुं स्वायत्ते पुरुषेण, किमर्थं प्रेय एव आदत्ते बाहुल्येन लोक इति ? उच्यते –

सत्यं स्वायत्ते ; तथापि साधनतः फलतश्च मन्दबुद्धीनां दुर्विवेकरूपे सती व्यामिश्रीभूते इव मनुष्यं पुरुषम् आ इतः प्राप्नुतः श्रेयश्च प्रेयश्च । अतो हंस इवाम्भसः पयः, तौ श्रेयःप्रेयःपदार्थौ संपरीत्य सम्यक्परिगम्य मनसा आलोच्य गुरुलाघवं[4] विविनक्ति पृथक्करोति धीरः धीमान् । विविच्य च श्रेयो हि श्रेय एव अभिवृणीते अभ्यर्हितत्वात् श्रेयसः[5] । कोऽसौ ?

---

1. न हि विद्याविद्ये एकस्मिन् पुरुषे सहसंभवतः, विरुद्धत्वात् तमःप्रकाशवत् ॥ गी. भा. ३-१.

2. अविद्यया हि प्रेयःसाधने प्रवर्तते ॥

3. फलेष्वासक्तत्वात् विविधं मूढः ॥

4. कस्य स्वीकारे अल्पसाधनेनैव अनन्तं फलं भवतीति साधनयोः गुरुत्वं लाघवं च कस्मिन्निति विविच्य-इत्यर्थः ॥

5. इदं पदं नास्ति अ॥

धीरः । यस्तु मन्दः अल्पबुद्धिः, स विवेकासामर्थ्यात्[1] योगक्षेमात् योगक्षेमनिमित्तं[2] शरीराद्युपचयरक्षणनिमित्तम् इत्येतत् । प्रेयः पशुपुत्रादिलक्षणं वृणीते ॥ २ ॥

## यमकृता नचिकेतसः प्रशंसा

स त्वं प्रियान् प्रियरूपांश्च कामा-
नभिध्यायन्नचिकेतोऽत्यस्राक्षीः ।
नैताꣳ सृङ्कां वित्तमयीमवाप्तो
यस्यां मज्जन्ति बहवो मनुष्याः ॥ ३ ॥

**नचिकेतसो वैराग्यम् –**

३२. स त्वं पुनःपुनर्मया प्रलोभ्यमानोऽपि प्रियान्[3] पुत्रादीन् प्रियरूपांश्च अप्सरःप्रभृतिलक्षणान् कामान् अभिध्यायन् चिन्तयन् तेषाम् अनित्यत्वासारत्वादिदोषान्, हे नचिकेतः, अत्यस्राक्षीः अतिसृष्टवान्, परित्यक्तवानसि । अहो बुद्धिमत्ता तव ! न एताम् अवाप्तवानसि सृङ्कां सृतिं कुत्सितां मूढजनप्रवृत्तिं[4] वित्तमयीं धनप्रायाम् । यस्यां सृतौ मज्जन्ति सीदन्ति बहवः अनेके मूढा मनुष्याः ॥ ३ ॥

दूरमेते विपरीते विषूची
अविद्या या च विद्येति ज्ञाता ।

1. सदसद्विवेकासामर्थ्यात् वा॥

2. ईप्सितस्य उपादानं योगः, उपात्तस्य रक्षणं क्षेमः । तन्निमित्तं तदर्थम् इत्यर्थः । योगक्षेमप्रधानस्य श्रेयसि प्रवृत्तिर्दुष्करेत्यभिप्रायः ॥ गी. भा. २–४५.

3. प्रियत्वेन अज्ञैर्विभाव्यमानान् इत्यर्थः । आत्मैव हि सर्वस्मात् प्रियः ॥ बृ. २-४-५.

4. 'मूढजनप्रवृत्ताम्' इति वा॥

विद्याभीप्सिनं नचिकेतसं मन्ये
न त्वा कामा बहवोऽलोलुपन्त ॥ ४ ॥

नचिकेतसो विवेकः –

३३. तयोः श्रेय आददानस्य साधु भवति, हीयतेऽर्थाद् य उ प्रेयो वृणीते ' (१-२-१) इत्युक्तम्[1] । तत् कस्मात् ? यतः–दूरं दूरेण महता अन्तरेण एते विपरीते अन्योन्यव्यावृत्तरूपे विवेकाविवेकात्मकत्वात्[2] । तमःप्रकाशाविव । विषूची विषूच्यौ[3] नानागती भिन्नफले[4] । संसारमोक्षहेतुत्वेन–इत्येतत् । के ते इति ? उच्यते । या च अविद्या प्रेयोविषया, विद्या इति च श्रेयोविषया ज्ञाता निर्ज्ञाता अवगता पण्डितैः । तत्र विद्याभीप्सिनं विद्यार्थिनं नचिकेतसं त्वाम् अहं मन्ये । कस्मात् ? यस्मात् अविद्वद्बुद्धिप्रलोभनाः[5] कामा अप्सरःप्रभृतयो बहवोऽपि त्वा त्वां न अलोलुपन्त न विच्छेदं कृतवन्तः श्रेयोमार्गात् आत्मोपभोगाभिवाञ्छासंपादनेन । अतो विद्यार्थिनं श्रेयोभाजनं मन्ये इत्यभिप्रायः ॥

अविद्यायामन्तरे वर्तमानाः
स्वयं धीराः पण्डितंमन्यमानाः ।
दन्द्रम्यमाणाः परियन्ति मूढा
अन्धेनैव नीयमाना यथान्धाः ॥ ५ ॥

---

1. ' इति ह्युक्तम् ' इति (वा॥) पाठे हिशब्दोऽनपेक्षितः ॥

2. सत्यानृतयोरितरेतराविवेकेन परस्परस्मिन्नध्यास एव ह्यविद्या तद्विवेकेन वस्तुस्वरूपनिर्धारणं तु विद्या ॥ सू. भा. अध्यासभाष्यम् ॥

3. विषूची इत्यत्र विभक्तिलोपश्छान्दस इति भावः ।

4. क्रियाकारकफलभेदबुद्धिरविद्या, आत्मैकत्वबुद्धिस्तु विद्या ; तयोर्भिन्नफलत्वं युक्तमेवेति भावः ॥ 5. ' प्रलोभिनः ' इति वा॥

न सांपरायः[1] प्रतिभाति बालं
प्रमाद्यन्तं वित्तमोहेन मूढम् ।
अयं लोको नास्ति पर इति मानी
पुनःपुनर्वशमापद्यते मे ॥ ६ ॥

अज्ञानां ध्रुवं संसारानर्थभाजनत्वम् –

३४. ये तु संसारभाजना:[1] अविद्यायाम् अन्तरे मध्ये घनीभूते इव तमसि वर्तमानाः वेष्ट्यमानाः पुत्रपश्वादितृष्णापाशशतैः । स्वयं[2] धीराः प्रज्ञावन्तः पण्डिताः शास्त्रकुशलाश्च इति मन्यमानाः[3]। ते दन्द्रम्यमाणाः[4] अत्यर्थं कुटिलाम् अनेकरूपां गतिं गच्छन्तः । जरामरणरोगादिदुःखैः परियन्ति परिगच्छन्ति मूढाः अविवेकिनः, अन्धेनैव दृष्टिविहीनेनैव[5] नीयमाना विषमे पथि यथा बहवः अन्धाः महान्तम् अनर्थम्[6] ऋच्छन्ति तद्वत् ॥ ५ ॥

अत एव मूढत्वात् न सांपरायः प्रतिभाति । संपरेयते इति संपरायः परलोकः, तत्प्राप्तिप्रयोजनः साधनविशेषः शास्त्रीयः सांपरायः ।

---

1. 'संसारभाजो जनाः' वा॥ 2. अतःपरं 'वयम्' इत्यधिकम् आ॥

3. साध्यसाधनसंबन्धज्ञानमात्राद् वयं पण्डिता इत्यात्मानं मन्यमाना इत्यर्थः । साधनसाध्यात् प्रजापतिलोकान्तात् परं नास्ति ; अतो वयमेतावतैव कृतार्था इति पण्डितमानित्वमेव प्रतिबन्धकं तेषामात्मज्ञानान्वेषणे-इत्युक्तं भवति ॥

4. मुण्डके (१-२-९) अयमेव मन्त्रः पठितः । तत्र तु 'जङ्घन्यमानाः' इत्येतत्स्थाने पाठः। द्रम गतौ इत्यस्माद्धातोः 'नित्यं कौटिल्ये गतौ' (पा. ३-१-२३) इति यङ् । तदाह – अत्यर्थं कुटिलाम् अनेकां गतिं गच्छन्त इति । अल्पीयस्यध्वनि यो गतागतानि करोति स हि कुटिलां गतिं संपादयति । तथा चायं संसारे परिच्छिन्ने करोतीति । क्रियासमभिहारे न यङ् भवितव्यमिति प्रामाणिकाः । भाष्ये तु इह 'अत्यर्थम्' इति कथञ्चित् समाधीयेत ; मुण्डके तु 'जङ्घन्यमानाः भृशं पीड्यमानाः' इति कथमित्यत्र तु वैयाकरणा एव शरणम् ॥

5. 'दृष्टिविकलेनैव' वा॥ 6. अनवरतसंसारप्राप्तिरूपम् ॥

स च बालम् अविवेकिनं प्रति न प्रतिभाति[1] न प्रकाशते । नोपतिष्ठते इत्येतत् । प्रमाद्यन्तं प्रमादं कुर्वन्तं पुत्रपश्वादिप्रयोजनेषु आसक्तमानसम्[2]। तथा वित्तमोहेन वित्तनिमित्तेन अविवेकेन मूढं तमसाच्छन्नं सन्तम्[3] । अयमेव लोकः योऽयं दृश्यमानः स्त्र्यन्नपानादिविशिष्टः; नास्ति परः अदृष्टो-लोकः[4] इति एवं मननशीलो मानी पुनःपुनः जनित्वा वशम् अधीनताम् आपद्यते मे मृत्योर्मम । जननमरणादिलक्षणदुःखप्रबन्धारूढ एव भवति इत्यर्थः । प्रायेण हि एवंविध एव लोकः[5] ॥ ६ ॥

**श्रवणायापि बहुभिर्यो न लभ्यः ।**
**शृण्वन्तोऽपि बहवो यं न विद्युः ।**
**आश्चर्यो वक्ता कुशलोऽस्य लब्धा**
**आश्चर्यो ज्ञाता कुशलानुशिष्टः ॥ ७ ॥**

**श्रेयोऽर्थी सुदुर्लभः –**

२५. यस्तु श्रेयोऽर्थी स सहस्रेषु कश्चिदेव[6] आत्मविद् भवति त्वद्विधः । यस्मात्–

श्रवणायापि श्रवणार्थं श्रोतुमपि यः न लभ्यः आत्मा बहुभिः अनेकैः[7] । शृण्वन्तोऽपि बहवः अनेके अन्ये यम् आत्मानं न विद्युः न

---

1. 'न भाति' इत्येवालमिति भाति ॥

2. पुत्राद्यासक्तिरेव परलोकविषयात् प्रमदने हेतुरित्यर्थः, 'मनसम्' इति वा॥ 3. अस्य स्थाने 'स तु' इत्युत्तरवाक्यान्तर्गतत्वेन वा॥

4. पूर्वस्मिन् मन्त्रे साध्यसाधनज्ञानमात्रात् कृतार्थताबुद्धिरात्मज्ञानप्रवेशे प्रतिबन्धिका इत्युक्तम् । इह तु बाह्यविषयासक्तिः परलोकविचारप्रवेशेऽपि प्रतिबन्धहेतुरित्युक्तम् इति विशेषः ॥ गी. भा. १६-८.

5. इदं वाक्यम् उत्तरमन्त्रभाष्यादौ आसञ्जितं वा॥; एवंबुद्धय एव बहवो जनाः, केचिदेव तु पारलौकिकसाधनमुपाददत । का कथा आत्मज्ञानप्रयत्नस्य ? इत्यभिप्रायः ॥ 6. गी. ७-३. 7. अत्रोक्तो हेतुः समनन्तरपूर्वमन्त्राभ्याम् ॥

विदन्ति अभागिनः असंस्कृतात्मानः[1] न विजानीयुः। किञ्च, अस्य वक्तापि आश्चर्यः अद्भुतवदेव अनेकेषु कश्चिदेव भवति। तथा श्रुत्वापि अस्य आत्मनः कुशलः निपुण एव अनेकेषु लब्धा कश्चिदेव भवति[2]। यस्मात्, आश्चर्यः ज्ञाता कश्चिदेव कुशलानुशिष्टः कुशलेन निपुणेन आचार्येण[3] अनुशिष्टः सन् ॥ ७ ॥

**न नरेणावरेण प्रोक्त एष**
**सुविज्ञेयो बहुधा चिन्त्यमानः।**
**अनन्यप्रोक्ते गतिरत्र ना-**
**स्त्यणीयान् ह्यतर्क्यमणुप्रमाणात् ॥ ८ ॥**

**आगमवता आचार्येण प्रोक्तमेव ज्ञानं सफलम् –**

३६. कस्मात्[4]? न हि नरेण मनुष्येण अवरेण प्रोक्तः। अवरेण हीनेन। प्राकृतबुद्धिना इत्येतत्। उक्तः[5] एष आत्मा यं त्वं मां पृच्छसि। (सुविज्ञेयः)[6] न हि सुष्ठु सम्यक् विज्ञेयः विज्ञातुं शक्यः। यस्मात् बहुधा अस्ति, नास्ति कर्ता अकर्ता, शुद्धः अशुद्धः–इत्याद्यनेकधा चिन्त्यमानः वादिभिः[7] ॥

कथं पुनः सुविज्ञेय इति? उच्यते – अनन्यप्रोक्ते अनन्येन अपृथग्दर्शिना आचार्येण प्रतिपाद्यब्रह्मात्मभूतेन प्रोक्ते उक्ते आत्मनि गतिः

---

1. पूर्वत्र प्रतिबन्धहेतुकत्वमात्मश्रवणानुत्पत्तेरुक्तम्; इदानीं तु चित्तसंस्काराभावहेतुकत्वमात्मज्ञानजन्माभावस्योक्तमिति विवेकः ॥

2. गी. भा. २–२९ श्लोकार्थोऽत्रानुसंधेयः ॥

3. नैपुण्यं वक्ष्यमाणमुत्तरमन्त्रे ॥

4. शृण्वन्तोऽपि न विद्युरिति कस्मात्?

5. 'प्रोक्तः' इत्यस्य व्यवहितत्वात् संबन्धज्ञापनाय स्यात् उक्तः इति पुनरुल्लेखः ॥

6. एतत्पदमत्र भाष्यस्थं त्रुटितमित्युन्नीयते ॥

7. ऐतरेयप्रथमाध्यायान्ते भाष्यचिन्तायामेवं विधा बहवो विकल्पा आत्मनि दर्शिताः ॥

अनेकधा अस्तिनास्तीत्यादिलक्षणा चिन्ता गतिः (?)[1] अत्र अस्मिन्नात्मनि नास्ति न विद्यते। सर्वविकल्पगति(?)प्रत्यस्तमितत्वादात्मनः[2]। अथवा स्वात्मभूते अनन्यस्मिन् आत्मनि प्रोक्ते अनन्यप्रोक्ते गतिः अत्र अन्यावगतिः नास्ति। ज्ञेयस्य अन्यस्य अभावात्। ज्ञानस्य हि एषा परा निष्ठा यदात्मैकत्वविज्ञानम्। अतः अवगन्तव्याभावात्[3] न गतिरत्र अवशिष्यते। संसारगतिर्वा[4] अत्र नास्ति अनन्ये आत्मनि प्रोक्ते। नान्तरीयकत्वात् तद्विज्ञानफलस्य मोक्षस्य। अथवा प्रोच्यमानब्रह्मात्मभूतेन आचार्येण अनन्यतया प्रोक्ते[5] आत्मनि अगतिः अनवबोधः अपरिज्ञानम्

1. (?) एवं चिह्नितस्थलयोर्गतिशब्दाभावेऽपि न क्षतिः स्यात्॥

2. निर्विकल्पत्वादात्मन इत्यर्थः। 'प्रत्यस्तमितरूपत्वात्' इति वा॥

3. 'गन्तव्याभावात्' इति (वा॥) पाठो न साधुः॥

4. आत्मनि विज्ञाते सर्वमिदं विज्ञातं भवतीति- तद्विज्ञानात् अपरं विज्ञेयं नावशिष्यते इत्यर्थः॥ मुं· १-१-३, छां· ६-१-३, बृ· १-४-७, २-४-५.

5. न हि तत्त्वदर्शिना प्रोक्ते आत्मनि पुनर्मोहावशेषः स्यादिति भावः। अत्र 'अनन्यप्रोक्ते गतिरत्र नास्ति' इत्येतद् वाक्यं चतुर्धा व्याख्यातम्॥

(१) अनन्यप्रोक्ते ब्रह्मात्मानुभववता आचार्येण प्रोक्ते अस्ति नास्तीत्यादि गतिः, विकल्पजालं, न विद्यते। प्रत्यस्तमितसर्वविकल्पत्वेन आत्मावबोधात् इति प्रथमं व्याख्यानम्;

(२) स्वात्मत्वेन आत्मनि आचार्येण प्रोक्ते एकोऽहमद्वितीय आत्मा इत्यवबोधस्य जातत्वात्, अत्र गतिः ज्ञानं नास्ति। ज्ञातव्यमन्यत् नावशिष्यते इति द्वितीयम्;

(३) अनन्यत्वेन श्रोतुरात्मत्वेन प्रोक्ते अद्वितीये आत्मनि गन्तव्याभावात् पुनः संसारगतिर्न विद्यते। असंसारिब्रह्मात्मभावरूपमोक्षस्य उपदेशजन्यावबोधनान्तरीयकत्वादिति तृतीयम्;

(४) अनन्यप्रोक्ते – अनन्यभूतेनाचार्येण स्वानन्यतया प्रोक्ते आत्मनि अगतिः – अनवगतिः – नास्ति: अवगतिरवश्यंभाविनी–इति चतुर्थम् इति॥

अस्मिन् चतुर्थे 'अगतिः' इति पदच्छेद इति विशेषः। सर्वथापि तु अनन्यभूतेन उपदेशक्रमसंप्रदायवता आचार्येण प्रोक्तः अवश्यं शिष्यस्य सुविज्ञेयः स्यादात्मेत्यर्थः॥ गी· भा· ४-३५; छां· भा· ६-१६-३॥

अत्र नास्ति । भवत्येव अवगतिस्तद्विषया श्रोतुः 'तदनन्योऽहम्'[1] इति आचार्यस्येव इत्यर्थः । एवं सुविज्ञेय[2] आत्मा **आगमवता**[3] आचार्येण अनन्यतया प्रोक्तः । इतरथा (हि)[4] अणीयान् अणुतरः[5] अणुप्रमाणादपि संपद्यते आत्मा । अतर्क्यम् अतर्क्यः[6] स्वबुद्ध्यभ्यूहेन केवलेन तर्केण[7] । तर्क्यमाणे अणुपरिमाणे केनचित् स्थापिते आत्मनि ततो हि अणुतरम् अन्योऽभ्यूहति, ततोऽप्यन्योऽणुतरम् इति । न हि तर्कस्य निष्ठा क्वचिद् विद्यते[8] ॥ ८ ॥

**नैषा तर्केण मतिरापनेया**
**प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ ।**
**यां त्वमापः सत्यधृतिर्बतासि**
**त्वादृङ् नो भूयान्नचिकेतः प्रष्टा ॥ ९ ॥**

---

1. 'तदस्म्यहम्' इति पाठेऽप्ययमेवार्थः ॥

2. अज्ञानसंशयज्ञानविपर्ययरहितं यथा तथा ज्ञातुं शक्य इत्यर्थः ॥

3. 'न केवलमाचार्येण, अपि स्वागमेनापि' इति केचित् ; 'अवगमवता' इति पाठः सुगम इति च ते कल्पयन्ति । तदुभयमपि असत् । आगमो हि नाम सांप्रदायिक उपदेशविशेषः, अनात्मविलक्षणत्वेन श्रोतुरात्मत्वेन च येनानुभवारूढः स्यात् । अत्र च अनन्यप्रोक्ते गतिरत्र नास्तीति तदेवोक्तमिति ॥

4. 'अणीयान् हि' इति मूलात् अत्र हिशब्दोऽपेक्षितः । अथवा इत एवाकृष्य आदावेव 'न हि नरेण' इति भाष्ये संयोजितः इति कल्प्यम् ॥

5. वा॥ पाठे ॥ 6. अतःपरं 'अणुप्रमाणो न तर्क्यः' इत्यधिकं वा॥

7. केवलस्तर्को नाम स्वाभ्यूहमात्रसिद्धः, न श्रुत्यनुगृहीतोऽनुभवाङ्गत्वेन । सू. भा. २-१-६.

8. सू. भा. २-१-११. अतोऽनुभवानुसारितर्कवशेन आगमवता आचार्येण बोधित एव सुविज्ञेय आत्मा-इत्यर्थः ॥

## तर्कमात्रेण आत्मज्ञानं नाप्यम् –

३७. अतः[1] अनन्यप्रोक्ते आत्मनि उत्पन्ना येयम् आगमप्रतिपाद्या आत्ममतिः[2], नैषा तर्केण स्वबुद्ध्यभ्यूहमात्रेण[3] आपनेया[4] न प्रापणीया इत्यर्थः । न अपनेतव्या वा, न हातव्या[5] । तार्किको हि अनागमज्ञः स्वबुद्धिपरिकल्पितं यत्किञ्चिदेव[6] कथयति[7] । अत एव च येयम् आगमप्रभूता मतिः अन्येनैव आगमाभिज्ञेन आचार्येणैव तार्किकात्[8], प्रोक्ता सती सुज्ञानाय भवति, हे प्रेष्ठ प्रियतम ॥

का पुनः सा तर्कागम्या मतिरिति ? उच्यते । यां त्वं मतिं मद्वरप्रदानेन आपः प्राप्तवानसि । (सत्यधृतिः)[9] । सत्या अवितथविषया धृतिः यस्य तव स त्वं सत्यधृतिः । 'बत' असि – इत्यनुकम्पयन्नाह मृत्युः नचिकेतसं वक्ष्यमाणविज्ञानस्तुतये[10] । त्वादृक् त्वत्तुल्यः न । अस्मभ्यं भूयात् भवतात् भवतु अन्यः पुत्रः शिष्यो वा[11] प्रष्टा । कीदृक् ? यादृक् त्वम् । हे नचिकेतः, प्रष्टा ॥ ९ ॥

---

1. यतोऽनन्यप्रोक्ते गतिरत्र नास्ति, यतश्च अन्यथा अतर्क्यमात्मतत्त्वम् अतः ॥ 2. 'आगमप्रभवा मतिः' वा॥

3. एष एव केवलतर्को नाम । श्रुत्यनुगृहीतस्तु परिगृहीतव्य एव, आगमोपपत्ती हि करतलामलकवत् तत्त्वं समर्पयतः ॥ मां· भा· ४–१, बृ· भा· ५–५–१ अव. 4. एतदनन्तरम् 'नापनीया' इति वा॥

5. 'नोपहन्तव्या' वा॥ कुतर्केण इयं नाप्तुं बाधितुं वा शक्या इत्युक्तं भवति ॥

6. नानुभवानुसारि । अतोऽनुभवपर्यन्ता इयं मतिः तेन बाध्या न भवति ॥ 7. 'कल्पयति' वा॥

8. तार्किकात् अन्येनैव इति संबन्धः ॥

9. अनेन पदेनेह भाव्यमिति भाति ॥

10. इत्थं च नचिकेतसः प्रशंसेयम् केवलतर्कम् अनागमज्ञोपन्यस्तं प्रविहाय आगमगम्यमेव अनुसर्तुमिच्छसि यतः, अतस्त्वं सत्यधृतिरसि । सात्त्विक्येव हि धृतिः, उच्छास्त्रमार्गप्रवृत्तेः मनआदीनि निवर्तयितुं शक्नोतीति ॥ गी· भा १८–३३. 11. मुं· २–१–१२.

जानाम्यहꣳ शेवधिरित्यनित्यं
न ह्यध्रुवैः प्राप्यते हि ध्रुवं तत् ।
ततो मया नाचिकेतश्चितोऽग्नि-
रनित्यैर्द्रव्यैः प्राप्तवानस्मि नित्यम् ॥ १० ॥

कामस्याप्तिं जगतः प्रतिष्ठां
क्रतोरनन्त्यमभयस्य पारम् ।
स्तोममहदुरुगायं प्रतिष्ठां दृष्ट्वा
धृत्या धीरो नचिकेतोऽत्यस्राक्षीः ॥ ११ ॥

मत्तोऽपि विरक्ततरस्त्वमिति यमेन नचिकेतसः प्रशंसा –

३८. पुनरपि तुष्ट आह –

जानामि अहं शेवधिः निधिः कर्मफललक्षणः निधिरिव प्रार्थ्यत इति[1] । असौ अनित्यम् अनित्य इति जानामि । न हि यस्मात् अनित्यैः अध्रुवैः नित्यं[2] ध्रुवं तत् प्राप्यते परमात्माख्यः शेवधिः । यस्त्व-नित्यसुखात्मकः शेवधिः स एवानित्यैर्द्रव्यैः प्राप्यते हि यतः[3], ततः तस्मात्[4] मया जानतापि नित्यं अनित्यसाधनैः न प्राप्यत इति[5] नाचिकेतः

1. यथा निधिशास्त्रेण अदृष्टो निधिः प्रापणीय इति प्रार्थ्यते, तथा कर्मणा फलं प्राप्यमिति अधिकारिभिः प्रार्थ्यत इत्यर्थः ॥

2. 'यन्नित्यं' वा॥ 'अध्रुवैः अनित्यैः ध्रुव नित्यं' इत्यपेक्ष्यते व्याख्येय-व्याख्यानयोरनुक्रमद्योतनार्थम् ; परं सर्वेष्वपि मुद्रितपुस्तकेषु अनित्यैः नित्यम् इति पदे पूर्वमेव निवेशिते उपलभ्येते ॥

3. अत्र 'यतः' इति व्याख्यानादपौनरुक्त्याय पूर्वं 'न हि नैव' इति व्याख्यानं युक्ततरं स्यात् । सर्वत्र तु कोशेषु यस्मादित्येवास्ति ॥

4. ततः तस्मात् इति । साध्यफलतृष्णापरिभूतत्वादेव-इत्यर्थः ॥

5. कूटस्थनित्यं फलम् न कर्मसाध्यमिति सोपपत्तिकं जानतापि मया कर्मफलतृष्णयैव अग्निश्चितः इत्यर्थः ॥

चितः अग्निः । अनित्यैः द्रव्यैः पश्वादिभिः स्वर्गसुखसाधनभूतोऽग्निः निर्वर्तित इत्यर्थः । तेन अहम् अधिकारापन्नो[1] नित्यं याम्यं स्थानं स्वर्गाख्यं नित्यम् आपेक्षिकं[2] प्राप्तवान् अस्मि ॥ १० ॥

त्वं तु कामस्य आप्तिं समाप्तिम् । अत्र हि[3] सर्वे कामाः परिसमाप्ताः । जगतः साध्यात्माधिभूताधिदैवादेः प्रतिष्ठाम्[4] आश्रयम् । सर्वात्मकत्वात्[5] । क्रतोः उपासनायाः फलं हैरण्यगर्भं पदम् अनन्त्यम् आनन्त्यम्[6] । अभयस्य च पारं परां निष्ठाम् । स्तोमं स्तुत्यम् । महत् अणिमाद्यैश्वर्याद्यनेकगुणसंहतम्[7] । स्तोमं च तत् महच्च निरतिशयत्वात् स्तोममहत् । उरुगायं विस्तीर्णां गतिम् । प्रतिष्ठां स्थितिम् आत्मनोऽनुत्तमामपि दृष्ट्वा[8] धृत्या धैर्येण धीरः धीमान् सन्[9] नचिकेतः अत्यस्राक्षीः । परमेव आकाङ्क्षन्[10] अतिसृष्टवानसि सर्वमेतत् संसारभोगजातम्[11] । अहो बत अनुत्तमगुणोऽसि ! ॥ ११ ॥

---

1. इदानीं तु परमात्मज्ञानं प्राप्तवता मया याम्याधिकारे नियुक्तत्वात् स्वाधिकारं चरित्वैव तत्कालावसाने मुक्तिं प्राप्तास्मीत्यर्थः । सू भा॰ ३-३-३२. अत्र मृत्योः पुण्यकर्मोद्भूतविविक्तकार्यकरणलाभादनुपदिष्टमेव ब्रह्मात्मैकत्वज्ञानमस्मिन्नेव पदे स्थितस्य जातमिति कल्पनीयम् (बृ॰ १-४-२) भाष्योक्तन्यायेन । अन्यथा ज्ञाने जातेऽपि तेन नाचिकेताग्निचयनं कृतमित्यनिष्टकल्पनाप्रसङ्गादिति ध्येयम् ॥

2. न ह्यध्रुवैः प्राप्यते ध्रुवमिति न्यायाविरोधाय एवं व्याख्येयमिति भावः ॥ 3. 'अत्रैव इहैव' (आ॥) इत्यतो वरमेष एवादृतः पाठः ॥

4. प्राक् (१-१-१४) उक्तमेवानूदितमत्र ॥

5. हिरण्यगर्भस्य इति शेषः ॥ 6. एतदपि प्रागुक्तमेव ॥

7. 'सहितम्' वा॥

8. मत्प्रत्ताग्निविद्याफलत्वेन सुलभामपि निरतिशयकामाभयैश्वर्यादिप्राप्तिं विज्ञायापीत्यर्थः ॥

9. 'धीरः नचिकेतः, धीमान् बुद्धिमान् सन्' इति वा॥

10. मत्तोऽपि विरक्तः, मोक्षैककाङ्क्षी च त्वमिति नचिकेतसः परविद्याधिकारित्वं स्तौति ॥ 11. इहामुत्रफलभोगजातमित्यर्थः ॥

वक्ष्यमाणज्ञानस्तुतिः

तं दुर्दर्शं गूढमनुप्रविष्टं
गुहाहितं गह्वरेष्ठं पुराणम् ।
अध्यात्मयोगाधिगमेन देवं
मत्वा धीरो हर्षशोकौ जहाति ॥ १२ ॥

आत्मज्ञानाद् द्वन्द्वात्ययः –

३९. यं त्वं ज्ञातुमिच्छसि आत्मानम्, तं दुर्दर्शम् । दुःखेन दर्शनम् अस्य इति दुर्दर्शः । अतिसूक्ष्मत्वात्, तम्[1] । गूढं गहनम् । अनुप्रविष्टम् प्राकृतविषयविज्ञानैः[2] प्रच्छन्नम् इत्येतत् । गुहाहितम् । गुहायां बुद्धौ हितं निहितं स्थितम् । तत्रोपलभ्यमानत्वात्[3] । गह्वरेष्ठं गह्वरे विषमे अनेकानर्थसङ्कटे तिष्ठति इति गह्वरेष्ठम् । यत एवं गूढमनुप्रविष्टः, गुहाहितश्च, अतो[4] गह्वरेष्ठः । अतो दुर्दर्शः[5] । तं पुराणं पुरातनम् । अध्यात्मयोगाधिगमेन । **विषयेभ्यः प्रतिसंहृत्य चेतस आत्मनि समाधानम् अध्यात्मयोगः**[6] । तस्य अधिगमः प्राप्तिः, तेन मत्वा देवम् आत्मानं धीरः धीमान्[7] हर्षशोकौ उत्कर्षापकर्षयोरभावात्[8] जहाति ॥

1. नास्त्येतद् बा॥ ; अपेक्षितं तु विग्रहवाक्यार्थपूरणार्थम् ॥
2. विषयापहृतबुद्धिरेवाच्छादनमात्मनः स्वयंप्रकाशस्यापीति भावः ॥
3. तै. २-१. 'यो वेद निहितं गुहायाम्' इत्यस्य भाष्यं द्रष्टव्यम् ॥
4. 'अतोऽसौ' वा॥
5. अनर्थहेतोरविद्यायाः प्रहाणेन कामाभावे सुदर्शः स्यात् इतिभावेनाह – अतो दुर्दर्श इति ॥ 6. योगश्चासौ उत्तरत्र (१-३-१३) विवरिष्यते ॥
7. 'धीमान्' इति क्वचिन्नास्ति ॥
8. स्थावरे अत्यन्तापकर्षः, हिरण्यगर्भे चात्यन्तोत्कर्षः । निरुपाधिके परस्मिंस्तु ब्रह्मणि तयोरुभयोरप्यभावः ॥

एतच्छ्रुत्वा संपरिगृह्य मर्त्यः
प्रवृह्य धर्म्यमणुमेतमाप्य ।
स मोदते मोदनीयꣳ हि लब्ध्वा
विवृतꣳ सद्म नचिकेतसं मन्ये ॥ १३ ॥

आत्मज्ञानादानन्दावाप्तिः –

४०. किञ्च, एतत् आत्मतत्त्वं यदहं वक्ष्यामि[1] तत् श्रुत्वा आचार्यसकाशात्[2] सम्यक् आत्मभावेन परिगृह्य[3] उपादाय मर्त्यः[4] मरणधर्मा धर्मादनपेतं धर्म्यं[5] प्रवृह्य उद्यम्य पृथक्कृत्य शरीरादेः अणुं सूक्ष्मम् एतम् आत्मानम् आप्य प्राप्य[6] स मर्त्यः विद्वान् मोदते मोदनीयं हि हर्षणीयम् आत्मानं लब्ध्वा । तदेतत् एवंविधं ब्रह्म सद्म भवनं नचिकेतसं त्वां प्रति अपावृतद्वारं विवृतम् अभिमुखीभूतं मन्ये[7]। मोक्षार्हं त्वां मन्ये इत्यभिप्रायः ॥ १३ ॥

आत्मयाथात्म्यविषयः प्रश्नः

अन्यत्र धर्मादन्यत्राधर्मा-
दन्यत्रास्मात् कृताकृतात् ।

---

1. अष्टादशमन्त्रात् प्रभृति ॥

2. 'आचार्यप्रसादात्' (आ॥) इत्यतः साधीयानयं पाठः ॥

3. स्वसंवेद्यतामापाद्येत्यर्थः ॥

4. प्रायेण मनुष्याधिकारत्वात् शास्त्रस्येति, अथवा अमरा अपि ज्ञान्यपेक्षया मर्त्या एवेति कृत्वा 'मर्त्यः' इत्युक्तिः ॥

5. ज्ञानवैराग्यलक्षणनिवृत्तिधर्मप्राप्यत्वात् ॥

6. अनात्मनो देहादेः पृथक्करणमेवात्मनः प्राप्तिरिह विवक्षिता । पृथक्करणं देहादेर्विविच्य ज्ञानमेव ॥

7. सर्वाधिकारलक्षणसंपन्नत्वादिति भावः ॥

अन्यत्र भूताच्च भव्याच्च
यत्तत्पश्यसि तद्वद ॥ १४ ॥

४१. एतच्छ्रुत्वा नचिकेताः पुनराह[1] – यद्यहं योग्यः प्रसन्नश्चासि भगवन्, मां प्रति,

अन्यत्र धर्मात् शास्त्रीयाद् धर्मानुष्ठानात्, तत्फलात् तत्कारकेभ्यश्च पृथग्भूतम् इत्यर्थः[2] । तथा अन्यत्र अधर्मात् विहिताकरणरूपात् पापात्[3] तथा अन्यत्र अस्मात् कृताकृतात् । कृतं कार्यम् अकृतं कारणम्; अस्मादन्यत्र । किञ्च, अन्यत्र भूताच्च अतिक्रान्तात् कालात् भव्याच्च भविष्यतश्च । तथा[4] वर्तमानात् । कालत्रयेण यत् न परिच्छिद्यते इत्यर्थः[5]। यदीदृशं वस्तु सर्वव्यवहारगोचरातीतं पश्यसि जानासि, तद् वद मह्यम्[6]॥

## ओंकारद्वारेण ब्रह्मोपदेशः

सर्वे वेदा यत्पदमामनन्ति
तपाꣳसि सर्वाणि च यद् वदन्ति ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति
तत् ते पदं संग्रहेण ब्रवीम्योमित्येतत् ॥ १५ ॥

---

1. नास्तीदं वाक्यम् आ॥
2. क्रियाकारकफलविभागरहितम् इति यावत् ॥
3. नास्तीदं वाक्यम् आ॥ ; यदि पठ्यते, निषिद्धकरणाच्च इत्यपि पठितव्यं भवेत् ॥
4. 'तथाऽन्यत्र' इति वा॥ पाठे अन्यत्रेत्यनपेक्षितम् ॥
5. कार्यकारणभावातीतत्वे हेतुः कालापरिच्छिन्नत्वम् ॥
6. नायमतिरिक्तः प्रश्नः, यस्यैवात्मनो देहादिव्यतिरिक्तस्य अस्तित्वं पूर्वं पृष्टम्, तस्यैवासंसारित्वमत्र पृच्छ्यत इति । तदेतदुपपादितं सूत्रभाष्ये (१-४-६)॥

ओंकारसाधनत्वं ब्रह्मप्राप्तेः –

४२. इत्येवं पृष्टवते मृत्युरुवाच पृष्टं वस्तु[1] विशेषणान्तरं[2] च विवक्षन् –

सर्वे वेदाः यत् पदं पदनीयं गमनीयम्, अविभागेन[3] आमनन्ति प्रतिपादयन्ति । तपांसि सर्वाणि च यद् वदन्ति । यत्प्राप्त्यर्थानि इत्यर्थः[4]। यदिच्छन्तो ब्रह्मचर्यं गुरुकुलवासलक्षणम्[5] अन्यद्[6] वा ब्रह्मप्राप्त्यर्थं चरन्ति । तत् ते तुभ्यं पदं यत् ज्ञातुमिच्छसि, संग्रहेण संक्षेपतः[7] ब्रवीमि ओमित्येतत् । तदेतत् पदं यद् बुभुत्सितं त्वया यदेतद् ओमिति । ओं-शब्दवाच्यम् ओंप्रतीकं च[8] ॥ १५ ॥

1. अन्यत्र धर्मादित्यादिना पृष्टं वस्तु ॥

2. विशेषणान्तरम् धर्माधर्माद्यगोचरत्वादिविशेषणत्रयाद् अन्यद् विशेषणम्, ओंकारद्वारेण वेद्यत्वं च इत्यर्थः ॥

3. अविभागेन सर्वे वेदाः यत् पदमामनन्ति, कर्मकाण्डज्ञानकाण्डविभागमकृत्वा अविशेषेण सर्वेऽपि वेदाः स्वाध्यायद्वारेण, तदुक्तकर्मज्ञाननिष्ठान्यतरानुसरणद्वारेण वा यत्प्राप्त्यर्थाः-इति यावत् । 'आमनन्ति' इत्यत्र यत् प्रकाशयन्तीति व्याख्याने न सर्वे वेदा गृहीताः स्युः । आरण्यकमात्रमेव हि तदा वेदः स्यादिति (बृ· भा. ४-४-२२)। तपोब्रह्मचर्यादिसाहचर्याच्च 'यत्प्राप्त्यर्थाः' इतिव्याख्यानमेव साध्विति उत्पश्यामः । 'अविरोधेन' इति क्वचित् पाठः । स त्वनपेक्षितः । अप्राप्तप्रतिषेधप्रसङ्गात् ॥

4. यथाश्रुतार्थस्य वदनस्य असंभवात्-इति भावः ॥

5. नैष्ठिकब्रह्मचर्यम् इत्यर्थः । उपकुर्वाणस्य गृहस्थेन सह 'सर्वे वेदा' इत्यनेनैव वेदग्रहणतदुक्तानुष्ठानार्थत्वेन गृहीतत्वात् ॥

6. ब्रह्मज्ञानार्थं क्रियमाणम् । प्राचीनशालादीनां ब्रह्मचर्यस्य ब्रह्मप्राप्त्यर्थता श्रुतिषु (छां. ८-१२-३ इत्यादिषु) प्रसिद्धा ॥

7. यत् सर्वसाधनैः पृथक्पृथगनुष्ठितैः प्राप्यम्, तत् सर्वमोङ्कारेणैव प्राप्यते इत्यभिप्रायेण 'संक्षेपतः' इत्युक्तम् । ओंकारोपासने सर्वेषां साधनानामुपसंग्रहणस्यावश्यकत्वात् ॥ प्र· भा ५-१·

8. मन्दधियां प्रतीकत्वेन, मध्यमधियां च वाचकत्वेन साधनमोङ्कारो ब्रह्मप्राप्तेः । गी· भा· ८-१३ अव.

एतद्ध्येवाक्षरं ब्रह्म
एतद्ध्येवाक्षरं परम् ।
एतद्ध्येवाक्षरं ज्ञात्वा
यो यदिच्छति तस्य तत् ॥ १६ ॥

एतदालम्बनꣳ श्रेष्ठ-
मेतदालम्बनं परम् ।
एतदालम्बनं ज्ञात्वा
ब्रह्मलोके महीयते ॥ १७ ॥

ओंकारस्य परब्रह्मालम्बनत्वम् –

४३. अतः एतत् हि[1] एव अक्षरं ब्रह्म अपरम् एतद् हि एव[2] अक्षरं परं च । तयोर्हि प्रतीकम्[3] एतदक्षरम् । एतत् हि एव अक्षरं ज्ञात्वा उपास्य[4] यो यदिच्छति परम् अपरं वा, तस्य तद् भवति । परं चेत् ज्ञातव्यम्[5], अपरं चेत् प्राप्तव्यम्[6] ॥ १६ ॥

---

1. हिकारद्वयम् प्रसिद्धिद्योतनार्थम् । प्रसिद्धं हि वेदान्तेषु ओंकारस्य ब्रह्मप्रतीकत्वम् ॥ (प्र. भा. ५-२ ; तै. भा. १-७.)

2. एवकारोऽन्यालम्बनापेक्षया एतस्य श्रेष्ठत्वस्योक्तस्य स्मारणार्थः ॥

3. हिकारद्वयस्य व्याख्या इयम् ॥

4. उपासनं हि प्रकृतमत्र मन्दमध्यमधियामिति भावः ॥

5. ब्रह्मलोकं गत्वा तत्र ज्ञातव्यम् ॥

6. समानेऽप्यायासे किमिति परमेव सर्वो नोपास्ते इति नाशङ्कनीयम् । ऐश्वर्यप्राप्तिवितृष्ण्यं विना परे ब्रह्मणि आस्थाया दुर्लभत्वात् ॥ सू. भा. ३-३-२२.

यत एवम्, अतः[1] एतत् ब्रह्मप्राप्त्यालम्बनानां[2] श्रेष्ठं प्रशस्यतमम्[3]। एतत् आलम्बनं परम्, अपरं च। परापरब्रह्मविषयत्वात्[4]। एतत् आलम्बनं ज्ञात्वा[5] ब्रह्मलोके[6] महीयते, परस्मिन् ब्रह्मणि अपरस्मिंश्च। ब्रह्मभूतो ब्रह्मवदुपास्यो भवति इत्यर्थः ॥ १७ ॥

## आत्मनः साक्षात् स्वरूपनिर्धारणम्

**न जायते म्रियते वा विपश्चि-**
**न्नायं कुतश्चिन्न बभूव कश्चित्।**
**अजो नित्यः शाश्वतोऽयं पुराणो**
**न हन्यते हन्यमाने शरीरे ॥ १८ ॥**

आत्मा सर्वविक्रियारहितः –

४४. 'अन्यत्र धर्मात्' (१–२–१४) पृष्टस्य आत्मनः अशेषविशेषरहितस्य आलम्बनत्वेन प्रतीकत्वेन[7](?) च ओंकारो निर्दिष्टः। अपरस्य च ब्रह्मणः, मन्दमध्यमप्रतिपत्तॄन्[8] प्रति। अथ इदानीं तस्य

1. 'अत एव' वा॥ 2. आकाशमनआदीनाम् ॥

3. नेदिष्ठवाचकत्वात् (बृ. भा. ५–१–१) ॥

4. अभिधानतन्त्रं हि अभिधेयमिति भावः ॥ 5. उपास्य ॥

6. ब्रह्मणो लोके, ब्रह्मण्येव परस्मिन् लोके वा क्रममुक्त्या–इत्यर्थः ॥

7. आलम्बनत्वेन इत्यस्यैव प्रतीकत्वेन इत्यर्थकत्वात् अयं लेखकप्रमाद इत्युन्नीयते। 'वाचकत्वेन च' इति तूचितं पठितम्। 'ओंशब्दवाच्यम् ओंप्रतीकं च' इति ह्युक्तं पञ्चदशमन्त्रभाष्ये ॥

8. मन्दप्रतिपत्तॄन् प्रति प्रतीकत्वेन, मध्यमप्रतिपत्तॄन् प्रति वाचकत्वेन इत्यर्थो ज्ञेयः। वाचकत्वपक्षे ब्रह्मस्वरूपचिन्तापि यथाशास्त्रम् आवश्यकी भवेत्, (गी.भा. ८-१३)। तत्र योऽशक्तः, स तु प्रतिमायां विष्णुबुद्धिमिव ओंकारे शब्दरूपे एव ब्रह्मबुद्धिं कुर्यादिति विभागः। अभिधानाभिधेयविलक्षण ओङ्कार इत्यनुभवारोपणं तु परमार्थदर्शनमिहैव ब्रह्मत्वापादकं माण्डूक्यश्रुतौ निर्दिष्टमित्यन्यदेतत् ॥

ओंकारालम्बनस्य आत्मनः साक्षात्[1] स्वरूपनिर्दिधारयिषया इदमुच्यते –

न जायते नोत्पद्यते, म्रियते वा न म्रियते च। उत्पत्तिमतो वस्तुनोऽनित्यस्य अनेका विक्रियाः। तासाम् आद्यन्ते जन्मविनाशलक्षणे विक्रिये इह आत्मनि प्रतिषिध्येते प्रथमम्, सर्वविक्रियाप्रतिषेधार्थम्[2] 'न जायते म्रियते वा' इति। विपश्चित् मेधावी। अपरिलुप्तचैतन्यस्वभावत्वात्[3]। किञ्च, नायम् आत्मा कुतश्चित् कारणान्तराद् बभूव न प्रभूतः[4]। अस्माच्च[5] आत्मनः न बभूव कश्चित् अर्थान्तरभूतः[6]। अतः अयमात्मा अजः नित्यः शाश्वतः अपक्षयविवर्जितः। यो हि अशाश्वतः, सोऽपक्षीयते। अयं तु शाश्वतः। अत एव पुराणः, पुरापि नव एवेति। यो हि अवयवोपचयद्वारेण अभिनिर्वर्त्यते, स इदानीं नवः। यथा कुम्भादिः[7]। तद्विपरीतस्तु आत्मा पुराणः वृद्धिविवर्जित इत्यर्थः। यत एवम्, अतः न हन्यते न हिंस्यते हन्यमाने शस्त्रादिभिः शरीरे तत्स्थोऽपि[8]; आकाशवदेव[9] ॥ १८ ॥

---

1. प्रतीकादिव्यवधानं विना इत्यर्थः ॥

2. अनुक्तानामपि विक्रियाणां यथा प्रतिषेधः सिध्येदिति-इत्यर्थः ॥

3. 'न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते' इति श्रुत्यन्तर-(बृ. ४-३-३०)सूचनमिदम् ॥

4. वा॥ पाठस्त्वयम्, नास्ति आ॥　　5. 'स्वस्माच्च' आ॥

6. यो हि अनात्मा आकाशादिरस्मात् जायत इव, स तु तत्त्वान्यत्वाभ्यामनिर्वचनीयः, आत्मस्वरूपापरित्यागेनैव मायया जायते इति नार्थान्तरभूतोऽस्मात् ॥ तै. भा. २-६.

7. 'कुड्यादिः' इति वा॥ पाठः कथमिति न विज्ञायते। दृष्टान्तत्वेन सुप्रसिद्धघटपदपर्यायस्तु कुम्भशब्दः ॥

8. शरीरे उपलभ्यत इति कृत्वा 'तत्स्थ' उच्यते ॥ प्र. भा. ६-२, गी. भा. १३-३१.

9. 'आकाश इव' इति क्वचित् पाठः। न हि आकाशः शरीरे स्थित इत्येतावता शस्त्रादिना देहे हन्यमाने हन्येत, असंसर्गित्वात्। एवमयमात्मापि-इत्यभिप्रायः ॥ सु. भा. १-२-८.

**हन्ता चेन्मन्यते हन्तुँ**
**हतश्चेन्मन्यते हतम् ।**
**उभौ तौ न विजानीतो**
**नायँ हन्ति न हन्यते ॥ १९ ॥**

आत्मनः सर्वक्रियाश्रयत्वविषयत्वाभावः –

४५. एवंभूतमपि आत्मानं शरीरमात्रात्मदृष्टिः, हन्ता चेत् यदि मन्यते चिन्तयति हन्तुम्[1] 'हनिष्यामि एनम्' इति, योऽपि अन्यो हतः सोऽपि चेत् मन्यते हतम् आत्मानम् 'हतोऽहम्' इति, उभावपि तौ न विजानीतः स्वम् आत्मानम् । यतः, नायं हन्ति । अविक्रियत्वादात्मनः । तथा न हन्यते । आकाशवदविक्रियत्वादेव[2] । अतो[3]ऽनात्मज्ञविषय एव धर्माधर्मादिलक्षणः संसारः, नात्मज्ञस्य[4] । श्रुतिप्रामाण्यात्[5], न्यायाच्च धर्माधर्माद्यनुपपत्तेः[6] ॥ १९ ॥

---

1. 'हन्तुमिच्छति' इति पाठान्तरम् 'इच्छति हन्तुम्' इति मूले लिखितं परिवर्तितं स्यात् वा॥

2. नायं हन्ति न हन्यते इत्युपलक्षणार्थं मन्त्रैकर्मकर्तृत्वविषयत्वप्रतिषेधस्य । पूर्वस्मिन् मन्त्रे जन्मादिविनाशान्तानां सर्वासामपि विक्रियाणां प्रतिषेधात्, धर्माधर्माद्यतीतं वस्तु यत् पृष्टं नचिकेतसा, तज्जीवाभिन्नम् इत्यवगम्यते ; न म्रियते इत्यनेनैव अस्तित्वप्रश्नस्योत्तरमप्येतदेवेति च । यदि हि आत्मनोऽन्यत् स्याद् धर्माधर्मवर्जितं ब्रह्म, तस्मिन् जन्मादेरसंभवात् तत्र न जायते इत्यादिरप्राप्तप्रतिषेध एव स्यादिति ॥

3. वस्तुवृत्तेन आत्मनः क्रियाकर्तृत्वाद्यभावात् ॥

4. अयं वा॥ पाठ एव 'न ब्रह्मज्ञस्य' इत्यतो वरीयान् ॥

5. श्रुतिर्हि सर्वक्रियाकर्तृत्वं तस्मिन् प्रतिषेधति ॥

6. अत्र न्यायः सूत्रभाष्ये (१-१-४) 'तत्कृतधर्माधर्मनिमित्तं सशरीरत्वम् इति चेत्' इत्यत ऊर्ध्वं द्रष्टव्यः । आदिशब्देन फलभोक्तृत्वं विवक्षितम् ॥

अणोरणीयान् महतो महीयान्
आत्मास्य जन्तोर्निहितो गुहायाम् ।
तमक्रतुः पश्यति वीतशोको
धातुप्रसादान्महिमानमात्मनः ॥ २० ॥

**अकाम एव आत्मानं पश्यति –**

४६. कथं पुनरात्मानं जानातीति ? उच्यते

अणोः सूक्ष्मात् अणीयान् श्यामाकादे[1]रणुतरः । महतो महत्परिमाणात् महीयान् महत्तरः, पृथिव्यादेः । अणु महद् वा यदस्ति लोके वस्तु, तत् तेनैव आत्मना नित्येन आत्मवत् संभवति । तदात्मना[2] विनिर्मुक्तम् असत् संपद्यते । तस्मात् असावेव आत्मा अणोरणीयान् महतो महीयान् । सर्वनामरूपवस्तूपाधिकत्वात्[3] । स च आत्मा अस्य जन्तोः ब्रह्मादिस्तम्बपर्यन्तस्य[4] प्राणिजातस्य गुहायां हृदये निहितः । आत्मभूतः स्थित इत्यर्थः[5] । तम् आत्मानं दर्शनश्रवणमननविज्ञानलिङ्गम्[6]

1. व्रीहियवादिग्रहणार्थम् आदिशब्दः ॥ छां. ३-१४-३.

2. तत् अणु महद् वा वस्तु इति वा; तदात्मना तेनात्मना इति वा व्याख्येयम् । पूर्वं तु न्याय्यम् । अनात्मनः सर्वस्याप्यात्मनैव सत्त्वस्य विवक्षितत्वात् ॥

3. अणुमहदादिसर्वपरिमाणवद्वस्तूपाधिमत्त्वात् अणीयान् महीयान्–इत्युच्यते । स्वतस्तु अपरिच्छिन्न एवेति भावः ॥

4. 'जन्तोः' इति जात्येकवचनम् इति भावः ॥

5. हृदये उपलभ्यमानत्वात्, तत्प्रत्यगात्मत्वाच्च तत्र निहित इत्युच्यते न हि आकाशवत् सर्वगतस्य अन्यथा क्वचित् स्थितिः स्यात् ॥ मुं. भा. २-२-७.

6. यो हि द्रष्टा श्रोता मन्ता विज्ञाता – इति लिङ्गैर्गम्यते तम् इत्यर्थः । (प्र. ४-९), ऐ. भा प्रथमाध्यायोपसंहारभाष्यम्, सू. भा. १-३-२० । यद्यपि दृष्ट्यादीनि नानुमाने लिङ्गानि धूमादिरिव वह्न्यादेः, तथापि 'अहमस्मि द्रष्टा श्रोता' इत्येवं जीव आत्मानं प्रत्यभिजानातीत्यर्थे लिङ्गानीत्युपचर्यन्ते । यत्तु केषाञ्चिद् व्याख्यानं दर्शनोद्देशेन विहितं श्रवणादिलिङ्गं साधनम्–इति तदनादेयम् । भाष्ये तद्गमकाभावात् ॥

अक्रतुः अकामः । दृष्टादृष्टबाह्यविषयेभ्य उपरतबुद्धिः – इत्यर्थः[1] । यदा चैवम्, तदा मनआदीनि करणानि धातवः – शरीरस्य धारणात्[2] – प्रसीदन्तीति एषां धातूनां प्रसादात् आत्मनो महिमानं कर्मनिमित्त-वृद्धिक्षयरहितं[3] पश्यति 'अयमहमस्मि' इति साक्षाद् विजानाति[4] । ततो वीतशोको[5] भवति ॥ २० ॥

**आसीनो दूरं व्रजति**
**शयानो याति सर्वतः ।**
**कस्तं मदामदं देवं**
**मदन्यो ज्ञातुमर्हति ॥ २१ ॥**

**विषयापहृतचित्तैर्दुर्विज्ञेय आत्मा –**

४७. अन्यथा दुर्विज्ञेयोऽयमात्मा कामिभिः प्राकृतपुरुषैः । यस्मात् –

आसीनः अवस्थितः अचल एव सन् दूरं व्रजति[6] । शयानो याति सर्वतः । एवमसौ आत्मा देवः, मदामदः समदोऽमदश्च, सहर्षोऽहर्षश्च विरुद्धधर्मवान्[7] । अतः अशक्यत्वात् ज्ञातुम्, कस्तं मदामदं देवं मदन्यः ज्ञातुमर्हति ? अस्मदादेरेव सूक्ष्मबुद्धेः पण्डितस्य सुविज्ञेयोऽयमात्मा ।

---

1. 'दृष्टादृष्टबाह्यविषयोपरतबुद्धिः' आ॥ ; न हि प्रत्यग्दृष्टिरहितानाम् आत्मदर्शनं संभवति ॥

2. धारणात् धातवः इति व्युत्पत्तिर्दर्शितात्र । यदा हि करणजातं लिङ्गेनैकीभूतमपसर्पति, तदा शरीरपात एव स्यादिति ॥ बृ. ४-४-२.

3. बृ. ४-४-२३. 4. तदा आत्मानुभवो जायत इत्यर्थः ॥

5. 'विगतशोकः' इति (वा॥) पाठे मूलं त्यक्तं स्यात् । अथवा वीतशोको विगतशोको भवतीति पठनीयम् ॥

6. मूलानुवाद एवैष तावत् । उपरिष्टात्तु विवरिष्यते ॥

7. 'विरुद्धधर्मवानिव' इति लुप्तेवशब्दोऽयं बोध्यः ॥

स्थितिगतिनित्यानित्यादिविरुद्धानेकधर्मोपाधिकत्वात् विरुद्धधर्मवान्[1] विश्वरूप इव चिन्तामणिवत्[2] अवभासते । अतो दुर्विज्ञेयत्वं दर्शयति 'कस्तं मदन्यो ज्ञातुमर्हति' इति । करणानाम् उपशमः शयनम् । करणजनितस्य एकदेशविज्ञानस्य[3] उपशमः शयानस्य भवति । यदा चैवम्, केवलसामान्यविज्ञानत्वात् सर्वतो यातीव[4] । यदा विशेषविज्ञानस्थः[5] स्वेन रूपेण स्थित एव सन् मनआदिगतिषु तदुपाधिकत्वाद् दूरं व्रजतीव[6] । स च[7] इहैव वर्तते ॥ २१ ॥

## आत्मविज्ञानफलम्, साधनं च

# अशरीरꣳ शरीरे-
# ष्वनवस्थेष्ववस्थितम् ।
# महान्तं विभुमात्मानं
# मत्वा धीरो न शोचति ॥ २२ ॥

---

1. 'विरुद्धधर्मवत्वात्' आ॥ ; अत्र इतस्तु वा॥

2. 'विश्वरूप इव चिन्तामणिवत् कस्यचिदवभासते' वा॥ ; विश्वरूपो मणिः नानारूपोऽवभासते, चिन्तामणिरपि तत्तच्चिन्तोपाधिकमेव अवभासते यथा –इति टीकाकारः । चिन्तामणिवत् विश्वरूप इवावभासते इत्येवालं व्याख्यातम्, चिन्तामणिर्यथा यथावस्थित एव तत्तच्चिन्त्यं सृजति, एवमयमपि तत्तदारोपित-धर्मोपाधिकत्वात् विश्वरूप इव, वस्तुतस्तु स्वयं निर्धर्मक एवेत्यर्थलाभात्–इति वयं युक्तमुत्पश्यामः ॥

3. परिच्छिन्नविज्ञानस्य, विशेषविज्ञानस्य इति यावत् ॥

4. सामान्यविज्ञानरूपस्य सर्वगतत्वात् सर्वतो यातीव इत्यर्थः ॥

5. यदा स्वप्नजागरितान्यतरोपाधिमान् इत्यर्थः ॥

6. 'तद्धावतोऽन्यानत्येति तिष्ठत्' इत्यस्य (ई. ४) भाष्यं द्रष्टव्यम् ॥

7. 'स तु' इत्यर्थे ॥

आत्मज्ञानस्य शोकराहित्यं फलम् –

४८. तद्विज्ञानाच्च शोकात्यय इत्यपि दर्शयति –

अशरीरः स्वेन रूपेण[1] आकाशकल्पः[2] आत्मा । तम् अशरीरम् । शरीरेषु देवपितृमनुष्यादिशरीरेषु[3] अनवस्थेषु अवस्थितिरहितेषु, अनित्येषु । अवस्थितं नित्यम् । अविकृतम् इत्येतत् । महान्तम् । महत्त्वस्य आपेक्षिकत्वशङ्कायाम् आह – विभुं व्यापिनम्[4] । आत्मानम् । आत्मग्रहणं स्वतोऽनन्यत्वप्रदर्शनार्थम् । **आत्मशब्दः प्रत्यगात्मविषय एव मुख्यः**[5] । तम् ईदृशम् आत्मानम् । मत्वा 'अयमहम्'[6] इति । धीरः धीमान् न शोचति । न हि एवंविधस्वात्मविदः[7] शोकोपपत्तिः ॥ २२ ॥

**नायमात्मा प्रवचनेन लभ्यो**
**न मेधया न बहुना श्रुतेन ।**
**यमेवैष वृणुते तेन लभ्य-**
**स्तस्यैष आत्मा विवृणुते तनूँ स्वाम् ॥ २३ ॥**

---

1. निरुपाधिकेन । मिथ्याभिमानकृतं तु सशरीरत्वम् इति भावः ॥ सू. भा. १-१-४.

2. सर्वगतः, नित्यश्च ॥

3. ब्रह्मादिस्तम्बपर्यन्तेषु इति यावत्, देवादिशरीरेण आधिक्यं वा॥, मनुष्यादिशरीरेण अवरत्वं वा तस्य नास्तीति भावः ॥ गौ. का. भा. ३-१०.

4. विभुत्वमेव हेतुरात्मनोऽशरीरत्वेऽविकृतत्वे च ॥

5. तटस्थेश्वरे वा, शरीरादिषु वा, न मुख्यः । प्रत्यगात्मन्येव तु निरुपपदस्य आत्मशब्दस्य गवादिशब्दवत् निरूढत्वम् (छां. भा. ६-८-७) । अतः 'आत्मानम्' इति स्वात्मतया मत्वा इत्येवार्थ इति भावः ॥

6. बृ. (४-४-१२) श्रुतिसूचनमिदम् ॥

7. 'एवंविधस्यात्मविदः' इति आ॥ ; धृतस्तु वा॥ मै॥,

एवंविधत्वं चात्मनः अशरीरत्वादिकम् । तद्विधस्य शोकानुपपत्तिः, सर्वस्यापि आत्मैकरूपेण संपन्नत्वात् ॥ ई. भा. ७ ; छां. भा. ७-१-३.

आत्मविज्ञानोपायः –

४९. यद्यपि दुर्विज्ञेयोऽयमात्मा, तथापि उपायेन सुविज्ञेय एव इत्याह –

नायमात्मा प्रवचनेन अनेकवेदस्वीकरणेन लभ्यः ज्ञेयः[1] । नापि मेधया ग्रन्थार्थधारणशक्त्या । न बहुना श्रुतेन[2] केवलेन । केन तर्हि लभ्य इति ? उच्यते । यमेव स्वमात्मानम् एष साधको वृणुते प्रार्थयते, तेनैव आत्मना वरित्रा[3] स्वयम् आत्मा लभ्यः । ज्ञायते इत्येतत् । निष्कामस्य आत्मानमेव प्रार्थयतः[4] आत्मनैव आत्मा लभ्यते इत्यर्थः । कथं लभ्यत इति ? उच्यते । तस्य आत्मकामस्य एष आत्मा विवृणुते प्रकाशयति पारमार्थिकीं तनूं[5] स्वां स्वकीयाम् । स्वयाथात्म्यम्[6] इत्यर्थः ॥ २३ ॥

> **नाविरतो दुश्चरिता-**
> **न्नाशान्तो नासमाहितः ।**
> **नाशान्तमानसो वापि**
> **प्रज्ञानेनैनमाप्नुयात् ॥ २४ ॥**

---

1. ज्ञानलाभयोरैक्यम् । आत्मनो ह्यलाभोऽज्ञानमेवेति ॥ बृ. भा. १-४-७,

2. एतदनन्तरं ' न बाहुश्रुत्येन ' इत्यधिकं वा॥

3. यमेव वृणुते तेनैव वरित्रमित्येनेत्यर्थः । मुण्डकभाष्ये तु (३-२-३) साधनं वक्तुं प्रवृत्तत्वात् तेन वरणेनेति व्याख्यातम् । उभयथापि तु परमात्मनः स्वात्मत्वेनानुसंधानमेव विवक्षितमिति ध्येयम् ॥

4. ' निष्कामश्चात्मानमेव प्रार्थयते ' इति (वा॥) पाठो न समीचीनः ॥

5. स्वरूपम् । मुण्डके तु ' तनुम् ' ; ' तनूम् ' इति तत्र पाठान्तरं च विद्यते ॥

6. परमात्मैव स्वरूपज्ञानप्रकाशेन वरितुरज्ञानं नाशयतीत्यर्थः ॥ गी. भा. १०-११.

आत्मविज्ञाने साधनान्तराणि –

५०. किं चान्यत् । न दुश्चरितात् प्रतिषिद्धात् श्रुतिस्मृत्यविहितात्[1] पापकर्मणः अविरतः अनुपरतः । नापि इन्द्रियलौल्यात् अशान्तः[2] अनुपरतः । नापि असमाहितः अनेकाग्रमनाः, विक्षिप्तचित्तः । समाहितचित्तोऽपि सन् समाधानफलार्थित्वात् । नापि अशान्तमानसः व्यापृतचित्तः । प्रज्ञानेन ब्रह्मविज्ञानेन एनं प्रकृतम् आत्मानम् आप्नुयात् । यस्तु दुश्चरितात् विरतः, इन्द्रियलौल्याच्च, समाहितचित्तः, समाधानफलादपि उपशान्तमानसश्च, आचार्यवान्[3] प्रज्ञानेन[4] यथोक्तमात्मानं प्राप्नोति इत्यर्थः ॥ २९ ॥

यस्य ब्रह्म च क्षत्रं च
उभे भवत ओदनः ।
मृत्युर्यस्योपसेचनं
क इत्था वेद यत्र सः ॥ २५ ॥

इति प्रथमाध्याये द्वितीया वल्ली ॥

साधनसंपत्तिरहितो नात्मानं विजानीयात् –

५१. यस्तु अनेवंभूतः[5] । यस्य आत्मनः ब्रह्म च क्षत्रं च[6] ब्रह्मक्षत्रे सर्वधर्मविधारके[7] अपि सर्वत्राणभूते[8] उभे ओदनः अशनं

1. हिंसादि सामान्यतः प्रतिषिद्धमपि श्रुत्यादिविहितं न पापमितिभावेनाह – श्रुतिस्मृत्यविहितात् इति ॥ 2. शमदमावुभावपि ग्राह्यावत्र ॥
3. 'प्रोक्तान्येनैव सुज्ञानाय' (१-२-९) इत्युपदिष्टगुणवदाचार्यवान् इत्यर्थः ॥ छां. ६-१४-२. 4. अस्यानन्तरम् 'एनम्' इत्यधिकं वा॥
5. निष्कामत्वदुश्चरितत्यागादिरहितः ॥
6. 'ब्रह्म च क्षत्रं च' इति भागस्त्रुटितः क्ष॥
7. ब्रह्मक्षत्रे हि धर्मविधारणेन जगत् परिपालयितुमलमिति । गी. भा. ४-१ ; बृ. भा. १-४-१४. अत्र तु ब्रह्मक्षत्रे इति सकलचराचरोपलक्षणार्थमित्युक्तम् सू. भा. १-२-९ ॥ 8. 'सर्वप्राणभूते' वा॥

भवतः स्याताम्। सर्वहरोऽपि[1] मृत्युः यस्य उपसेचनमिव ओदनस्य; अशनत्वेऽपि अपर्याप्तः। तं प्राकृतबुद्धिः यथोक्तसाधनरहितः[2] सन् क इत्था इत्थम् एवम्। यथोक्तसाधनवानिव इत्यर्थः। वेद विजानाति यत्र[3] स आत्मा इति ॥ २५ ॥

इति श्रीशङ्करभगवतः कृतौ काठकोपनिषत्प्रथमाध्याये द्वितीयवल्लीभाष्यम् ॥

---

1. प्राणहरः। गी. भा. १०-३४. मृत्योरप्युपसेचनत्वोक्तिः सूचयति सर्वसंहारकर्ता परमात्मैवात्र विवक्षित इति ॥ सू. भा. १-२-९.

2. 'यथोक्तसाधनानभियुक्तः' वा॥

3. स्वे महिम्नि, यत्स्वरूपे इत्यर्थः ॥

# प्रथमाध्याये – तृतीया वल्ली

तृतीयवल्लीसंबन्धः –

५२. 'ऋतं पिबन्तौ' इत्यस्या वल्ल्या संबन्धः। विद्याविद्ये नानाविरुद्धफले इत्युपन्यस्ते। न तु सफले ते यथावन्निर्णीते। तन्निर्णयार्था रथरूपककल्पना। तथा च प्रतिपत्तिसौकर्यम्[1]। एवं च प्राप्तृप्राप्य-गन्तृगन्तव्यविवेकार्थं[2] रथरूपकद्वारा[3] द्वौ आत्मानौ उपन्यस्येते –

हृदये स्थितं ब्रह्मद्वयम्

**ऋतं पिबन्तौ सुकृतस्य लोके**
**गुहां प्रविष्टौ परमे परार्धे।**
**छायातपौ ब्रह्मविदो वदन्ति**
**पञ्चाग्नयो ये च त्रिणाचिकेताः ॥ १ ॥**

द्वौ आत्मानौ हृदये स्तः –

५३. ऋतं सत्यम् अवश्यंभावित्वात्[4], कर्मफलं पिबन्तौ – एकस्तत्र कर्मफलं पिबति भुङ्क्ते, नेतरः[5]। तथापि पातृसंबन्धात् 'पिबन्तौ'

---

1. परमात्मप्रतिपत्तिः सुकरा भवतीत्यर्थः ॥

2. रज्जुसर्पयोर्विवेकवत्, न तिलतण्डुलयोरिव। कल्पितं हि जीवत्वं परमात्मनि रज्जौ सर्पादिवत् ॥ सू. भा. १-३-१९, १-४-६.

3. 'आत्मानं रथिनं विद्धि' (१-३-३) इत्यादिना ॥

4. कर्मफलं हि अवश्यंभावीति सत्यं न स्वर्ग्यमित्यरस्वरूपमिति। मुं. १-२-१.

5. नेश्वरः ॥ मुं. ३-१-१.

इत्युच्येते छत्रिन्यायेन[1] – सुकृतस्य स्वयंकृतस्य[2] कर्मणः – 'ऋतम्' इति पूर्वेण[3] संबन्धः – लोके अस्मिन् शरीरे[4]। गुहां गुहायां बुद्धौ प्रविष्टौ। परमे परार्धे। बाह्यपुरुषाकाशसंस्थानापेक्षया[5] परमम् परस्य ब्रह्मण अर्धं स्थानं परार्धं हार्दाकाशम्। तस्मिन् हि परं ब्रह्म उपलभ्यते[6]। अतः[7], तस्मिन् परमे परार्धे हार्दाकाशे प्रविष्टौ इत्यर्थः। तौ च छायातपाविव विलक्षणौ संसारित्वासंसारित्वेन[8] ब्रह्मविदो[9] वदन्ति कथयन्ति। न केवलम् अकर्मिण एव वदन्ति; पञ्चाग्नयः[10]

---

1. यथा ह्येकेनापि छत्रिणा संबन्धात् बहवोऽपि 'छत्रिणो गच्छन्ति' इति व्यपदिश्यन्ते तद्वत्। अत्र 'न्यायेन' इत्यतः परम्- 'न हि केवलस्यात्मनो' इत्यारभ्य 'नान्यथा' इत्यन्तं केनचिदधिकं लिखितम् आ॥; तत्तु चतुर्थमन्त्रभाष्यस्थमेवेति इहास्माभिरुपेक्षितम्॥

2. तै. भा. २-७ ('तस्मात् सुकृतमुच्यते' इत्यस्य भाष्यम्)

3. 'सुकृतस्य ऋतम्' इति संबन्धः, न तु सुकृतस्य लोके इति॥

4. लोक्यतेऽस्मिन् इति लोकः, तस्मिन्। भोगाधिष्ठानं हि शरीरमिति॥

5. छां. भा. ३-१२-७, ८, ९. तत्र हि एकस्याप्याकाशस्य बाह्याकाशः, अन्तः पुरुषे आकाशः, हृदये आकाशः – इति भेदान्वाख्येन हृदयाकाशस्य पूर्णत्वमविनाशित्वं चोक्तमिति; स इतराकाशद्वयापेक्षया परमः इत्यर्थः॥

6. विज्ञायते उपास्यते च। अतो ब्रह्मणः अर्धं स्थानम् इत्युच्यते इत्यर्थः॥

7. 'ततः' वा॥

8. अत्र संसारिरूपम् अनूद्य असंसारिब्रह्मरूपं ज्ञेयत्वेन, उपास्यत्वेन वा, उच्यते। सूत्रभाष्ये (१-२-११) ज्ञेयपरमात्मरूपमात्रं यद्यपि जीवविलक्षणत्वेन प्रतिपाद्यत इत्युक्तम्, तथापि वाक्यशेषबलादिह परापरब्रह्मणी द्वे अप्युल्लिखिते इति मन्तव्यम्॥

9. वस्तुतन्त्रब्रह्मज्ञानवन्तः, अकर्मिण इत्यर्थः॥

10. पञ्चाग्नयः। द्युपर्जन्यपृथिवीपुरुषयोषित्सु पञ्चसु अग्निदृष्टिश्चोदिता छान्दोग्ये (५-४-१ आरभ्य ५-९-२ पर्यन्तम्), बृहदारण्यके च (६-२-९ आरभ्य ६-२-१३ पर्यन्तम्)। पञ्चाग्नयोऽत्र तादृशपञ्चाग्निविद्याविशारदा विवक्षिताः। गार्हपत्यः, दक्षिणाग्निः, आहवनीयः, सभ्यः, आवसथ्यश्चेत्येते पञ्चाग्नयो येषां ते–इति केचित्। तन्न। तेषामपरब्रह्मवित्त्वेन व्यवहाराभावात्। पञ्चाग्निविद्या तु आत्मविद्येत्युपचर्यते इति सूत्रभाष्ये (३-१-७) इति विशेषः॥

गृहस्थाः, ये च त्रिणाचिकेताः । त्रिः कृत्वः नाचिकेताग्निश्चितः, यैस्ते त्रिणाचिकेताः[1] ॥ १ ॥

यः सेतुरीजानाना-
मक्षरं ब्रह्म यत् परम् ।
अभयं तितीर्षतां पारं
नाचिकेतꣳ शकेमहि ॥ २ ॥

वेद्यं ब्रह्मद्वयम् –

५४. यः सेतुरिव सेतुः ईजानानां यजमानानां कर्मिणाम् । दुःखसंतरणार्थत्वात् । नाचिकेतम् । नाचिकेतोऽग्निः तम् । वयं ज्ञातुं चेतुं च शकेमहि शक्नुवन्तः[2] । किञ्च यच्च अभयं भयशून्यं संसारस्य पारं तितीर्षतां तर्तुमिच्छताम्[3] । ब्रह्मविदां यत् परमाश्रयम् अक्षरम् आत्माख्यं ब्रह्म तच्च ज्ञातुं शकेमहि । परापरे ब्रह्मणी कर्मि[4]ब्रह्मविदाश्रये वेदितव्ये इति वाक्यार्थः । तयोरेव[5] हि उपन्यासः कृतः 'ऋतं पिबन्तौ' इति ॥ २ ॥

---

1. ये पूर्वत्रैवास्याम् उपनिषदि परामृष्टा अग्निविद्याविदः, त एते कर्मिणोऽपरं ब्रह्म हृदये उपास्यमिति मन्यन्ते कालान्तरमुक्तिफलकमुपासनमिति च-इत्येषोऽकर्मिभ्यः परब्रह्मविद्भ्य एषां विशेषः ॥

2. 'शक्तवन्तः' (?) वा॥ 3. 'तरितुमिच्छताम्' वा॥

4. कर्मिशब्देन अत्र नाचिकेताग्निविद् एव विवक्ष्यन्ते । तेषां हि अग्निः सेतुः, मनुष्यलोकदुःखात् संतरणात् । पञ्चाग्नयोऽपि पूर्वमन्त्रोक्ताः उपलक्षणीयाः । तेषामपि 'स एनान् ब्रह्म गमयति' (छां॰ ५-१०-२) इति ब्रह्मप्राप्तिश्रवणात् । केवलम् इष्टापूर्तदत्तपराणां कर्मिणां धूमादिमार्गेण चन्द्रगमनोक्तेश्च (छां॰ ५-१०-३, ४)

5. परापरब्रह्मणो हि 'गुहां प्रविष्टौ' इत्युपन्यासः कृतः ॥

## रथरथिरूपककल्पना

आत्मानꣳ रथिनं विद्धि
शरीरꣳ रथमेव तु ।
बुद्धिं तु सारथिं विद्धि
मनः प्रग्रहमेव च ॥ ३ ॥

इन्द्रियाणि हयानाहु-
र्विषयाꣳस्तेषु गोचरान् ।
आत्मेन्द्रियमनोयुक्तं
भोक्तेत्याहुर्मनीषिणः ॥ ४ ॥

### शरीरादीनां रथादित्वम् –

५५. तत्र य उपाधिकृतः[1] संसारी विद्याविद्ययोरधिकृतः[2] मोक्षगमनाय संसारगमनाय च[3], तस्य तदुभयगमने साधनो रथः कल्प्यते–

तत्र आत्मानम्[4] ऋतपं संसारिणं रथिनं रथस्वामिनं विद्धि जानीहि[5]। शरीरं रथमेव तु । रथबद्धहयस्थानीयैः इन्द्रियैराकृष्यमाणत्वात्[6] शरीरस्य । बुद्धिं तु अध्यवसायलक्षणां सारथिं विद्धि । बुद्धिनेतृप्रधानत्वात् शरीरस्य, सारथिनेतृप्रधान इव रथः । सर्वं हि देहगतं कार्यं बुद्धिकर्तव्यमेव

1. शरीरेन्द्रियमनःकृत इत्यर्थः ॥ गी· भा· १८-१४·
2. यदुक्तम् पूर्वम् १-२-४ इत्यादिना ॥
3. यदप्युक्तं पूर्वम् (१-२-२) ॥
4. तत्र जीवात्मपरमात्मनोर्मध्ये: जीवात्मानम् इत्यर्थः । 'ऋतं पिबन्तौ' इति यत्संबन्धात् ब्रह्मापि पिबदित्युक्तम् ॥
5. 'विजानीहि' वा॥ 6. विषयान् प्रति इति शेषः ॥

प्रायेण[1] । मनः संकल्पविकल्पादिलक्षणं प्रग्रहं रशनाम् एव च[2] विद्धि । मनसा हि प्रगृहीतानि श्रोत्रादीनि करणानि प्रवर्तन्ते[3] रशनया इव अश्वाः॥

इन्द्रियाणि चक्षुरादीनि हयानाहुः । रथकल्पनाकुशलाः । शरीररथाकर्षणसामान्यात् । तेषु[4] इन्द्रियेषु हयत्वेन परिकल्पितेषु गोचरान् मार्गान् रूपादीन् विषयान् विद्धि[5] । आत्मेन्द्रियमनोयुक्तं शरीरेन्द्रियमनोभिः सहितम्, संयुक्तम्[6] आत्मानं भोक्ता इति संसारीति आहुः, मनीषिणः विवेकिनः । न हि केवलस्य आत्मनो भोक्तृत्वमस्ति । बुद्ध्याद्युपाधिकृतमेव तस्य भोक्तृत्वम् । तथा च श्रुत्यन्तरं केवलस्य अभोक्तृत्वमेव दर्शयति 'ध्यायतीव लेलायतीव' (बृ. ४-३-७) इत्यादि[7] । एवं च सति वक्ष्यमाणरथकल्पनया (?)[8] वैष्णवस्य पदस्य आत्मतया प्रतिपत्तिरुपपद्यते नान्यथा । स्वभावानतिक्रमात्[9] ॥ ४ ॥

1. अनिच्छाकृतं निःश्वासोच्छ्वासादि, रागद्वेषफलमपि च कार्यमस्तीति कृत्वा आह 'प्रायेण' इति ॥

2. प्रग्रहं रशनां आ॥ 'प्रग्रहमेव च रशनामेव' वा॥

3. मनसोऽन्यत्र व्यापृतत्वे दर्शनादिवृत्त्यभावादित्यर्थः ॥ बृ. १-५-३.

4. 'तेष्वेव' (आ॥) इत्यत्र एवकारोऽधिकः ॥

5. विद्धि इति पूर्वमन्त्रस्थवासनया लिखितं स्यात् केनचित् । 'आहुः' इति तु न्याय्यम् ॥

6. 'संयुतम्' वा॥ 'संयुक्तं सहितम्' इत्येव मूले लिखितम् इत्थं व्यत्यस्तं लेखकेन इति शक्योहनम् । अत्र संयोगो न रज्ज्वेव घटस्य, नापि तन्तुभिरिव पटस्य संबन्धः ; किन्तु आत्मशरीरादेरन्योन्याध्यासलक्षणः, अभिमानरूप एव ॥ गी. भा. १३-२६ ; सू. भा. १-१-४ (शरीरित्वाभिमाननिमित्तं संसारित्वमिति निरूपणावसरे) २-३-२९.

7. ध्यानव्यापारवतीं बुद्धिमवभासयन् ध्यायतीव, करणेषु वायुषु च चलत्सु तदवभासकत्वात् लेलायतीव च ; वस्तुतस्तु न ध्यायति, नापि चलतीति श्रुतेरर्थः॥

8. वक्ष्यमाणरथकल्पनया इत्यसंगतम् । रथकल्पनाया उक्तत्वादेव । 'वक्ष्यमाणा रथिकल्पनया प्रतिपत्तिः' इति यदि पाठः स्यात् तर्हि कथञ्चित् व्याख्यायेत 'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्' (१-३-९) इति वक्ष्यमाणा विष्णुपदप्राप्तिरुपपद्यते सति भोक्तृत्वस्य औपाधिकत्वे, नान्यथा इतीत्यभिप्रायः ॥

9. न हि स्वभावः सन् भोक्तृत्वादिः जातुचिन्निवर्तेत, अग्नेरिव औष्ण्यम् इत्यभिप्रायः ॥

## विज्ञानवदविज्ञानवतोः फलभेदः

यस्त्वविज्ञानवान् भव-
त्ययुक्तेन मनसा सह ।
तस्येन्द्रियाण्यवश्यानि
दुष्टाश्वा इव सारथेः ॥ ५ ॥

यस्तु विज्ञानवान् भवति
युक्तेन मनसा सदा ।
तस्येन्द्रियाणि वश्यानि
सदश्वा इव सारथेः ॥ ६ ॥

सुबुद्धिमत एव वश्येन्द्रियत्वम्–

५६. तत्र एवं सति,[1] यस्तु बुद्ध्याख्यः सारथिः अविज्ञानवान् अनिपुणः, अविवेकी प्रवृत्तौ निवृत्तौ च[2] भवति – यथा इतरो[3] रथचर्यायाम् – अयुक्तेन अप्रगृहीतेन असमाहितेन मनसा प्रग्रहस्थानीयेन सदा युक्तो भवति, तस्य अकुशलस्य बुद्धिसारथेः इन्द्रियाणि अश्वस्थानीयानि अवश्यानि अशक्यनिवारणानि[4] दुष्टाश्वाः अदान्ताश्वा इव इतरसारथेः भवन्ति ॥ ५ ॥

---

1. पूर्वोपवर्णितविधया रथिरथसारथ्यादिकल्पनायां स्थितायाम् ॥

2. विहिते कर्मणि प्रवृत्तौ, निषिद्धाच्च कर्मणो निवृत्तौ ; अथवा मोक्षगतिमति प्रवृत्तौ संसारगतिमतश्च साधनान्निवृत्तौ ॥

3. दृष्टान्तगतः ॥

4. अशक्यानि अनिवारणीयानि (आ॥) इत्यतो परमेष एव गृहीतः पाठः ॥

यस्तु पुनः पूर्वोक्तविपरीतः सारथिर्भवति[1] विज्ञानवान्[2] प्रगृहीतमनाः समाहितचित्तः सदा, तस्य अश्वस्थानीयानि इन्द्रियाणि प्रवर्तयितुं निवर्तयितुं वा शक्यानि वश्यानि दान्ताः सदश्वा इव इतरसारथेः ॥ ६ ॥

विज्ञानवदविज्ञानवतोः फलम्

यस्त्वविज्ञानवान् भव-
त्यमनस्कः सदाऽशुचिः ।
न स तत्पदमाप्नोति
संसारं चाधिगच्छति ॥ ७ ॥

यस्तु विज्ञानवान् भवति
समनस्कः सदा शुचिः ।
स तु तत्पदमाप्नोति
यस्माद् भूयो न जायते ॥ ८ ॥

विज्ञानसारथिर्यस्तु
मनःप्रग्रहवान्नरः ।
सोऽध्वनः पारमाप्नोति
तद्विष्णोः परमं पदम् ॥ ९ ॥

1. 'तस्य फलमाह' इत्यधिकं पा॥ ; तदनन्तरं 'यस्तु' इति च ॥

2. 'विज्ञानवान् निपुणः विवेकवान् युक्तेन मनसा' इति पा ॥ वक्ष्यमाणाध्यात्मयोगस्तुत्यर्थम् अयं विज्ञानवदविज्ञानवतोः फलभेद उक्तः ॥

## अविज्ञानवतः संसारगतिः, विज्ञानवतो मोक्षश्च –

५७. तत्र[1] पूर्वोक्तस्य अविज्ञानवतो बुद्धिसारथेरिदं फलमाह–

यस्तु अविज्ञानवान् भवति । अमनस्कः अप्रगृहीतमनस्कः । स तत एव अशुचिः सदैव । न स रथी तत् पूर्वोक्तं अक्षरं[2] यत् परं पदम् आप्नोति, तेन सारथिना । न केवलं तन्नाप्नोति, संसारं च जन्ममरण-लक्षणम् अधिगच्छति ॥ ७ ॥

यस्तु द्वितीयो विज्ञानवान् भवति । विज्ञानवत्सारथ्युपेतो रथी । विद्वान् इत्येतत् । युक्तमनाः समनस्कः, स तत एव सदा शुचिः । स तु तत् पदमाप्नोति यस्मात् आप्तात् पदात् अप्रच्युतः सन् भूयः पुनः न जायते संसारे ॥ ८ ॥

किं तत् पदमिति ? आह –

विज्ञानसारथिर्यस्तु यो विवेकबुद्धिसारथिः पूर्वोक्तः, मनःप्रग्रहवान् प्रगृहीतमनाः समाहितचित्तः सन् शुचिर्नरः विद्वान्[3], सः अध्वनः संसारगतेः पारम् । परमेव[4] अधिगन्तव्यम् इत्येतत् । आप्नोति मुच्यते सर्वसंसारबन्धनैः । तद् विष्णोः व्यापनशीलस्य ब्रह्मणः परमात्मनो वासुदेवाख्यस्य परमं प्रकृष्टं पदं स्थानम् । सतत्त्वम्[5] इत्येतत् । यदसौ आप्नोति[6] विद्वान् ॥ ९ ॥

---

1. ‘तस्य’ (भा॥) इत्यतो वरमेष पाठो गृहीतः, विज्ञानवदविज्ञान-वतोर्मध्ये इत्यर्थः ॥ 2. १-३-२ (अक्षरम् ब्रह्म यत्परम्) ॥

3. विद्वानेव नर इति वक्तुमर्हं इति भावः ॥

4. परमेव पारम् । अथवा परमेव ब्रह्म ॥

5. सतत्त्वम् । तत्त्वमेव पदम् नान्यत् ॥

6. विज्ञानेन । न हि विष्णोः पदमासव्यं भवति । अविद्यामात्रव्यवहितत्वात् स्वरूपभूतस्य तस्य ॥ तै. भा. २-१ (दर्शनादर्शनापेक्षत्वाद्ब्रह्मण आप्त्यनाप्त्योः ।) ; बृ. भा. १-४-७ (आत्मनोऽलाभोऽविद्यामात्रव्यवधानम्) ॥

ब्रह्मणः परमसूक्ष्मत्वात् प्रत्यगात्मत्वम्

इन्द्रियेभ्यः परा ह्यर्था
अर्थेभ्यश्च परं मनः ।
मनसस्तु परा बुद्धि-
र्बुद्धेरात्मा महान् परः ॥ १० ॥

महतः परमव्यक्त-
मव्यक्तात् पुरुषः परः ।
पुरुषान्न परं किञ्चित्
सा काष्ठा सा परा गतिः ॥ ११ ॥

विष्णोः पदस्य प्रत्यगात्मत्वम् –

५८. अधुना यत् पदं गन्तव्यम्, तस्य इन्द्रियाणि स्थूलान्यारभ्य सूक्ष्मतारतम्यक्रमेण प्रत्यगात्मतया अधिगमः कर्तव्यः–इत्येवमर्थम् इदमारभ्यते –

स्थूलानि[1] तावदिन्द्रियाणि । तानि यैः[2]रर्थैरात्मप्रकाशनाय आरब्धानि[3] तेभ्यः इन्द्रियेभ्यः स्वकार्येभ्यः ते परा हि अर्थाः । सूक्ष्माः, महान्तश्च, प्रत्यगात्मभूताश्च[4] । तेभ्योऽपि अर्थेभ्यश्च परं सूक्ष्मतरं महत्

1. वक्ष्यमाणार्थाद्यपेक्षया स्थूलत्वम् । कार्यत्वात् ॥

2. 'यैः परैः' वा॥

3. कारणानि । विषयस्यैव स्वात्मग्राहकत्वेन संस्थानान्तरं करणम् इति भावः ॥ बृ. भा. २-४-११.

4. सर्वत्र परशब्दस्य सूक्ष्मत्वं व्यापित्वं प्रत्यक्स्वरूपत्वं च विवक्षितम्, यथा पटात् तन्तूनां परत्वमित्यभिप्रायः । अत्र न बाह्यार्थाः परत्वेन विवक्षिताः, किन्तु आध्यात्मिका इन्द्रियकारणभूता एवेति मन्तव्यम् । अन्यथा परत्वोक्तिव्याघातादिति ॥

प्रत्यगात्मभूतं च मनः । मनःशब्दवाच्यं मनस आरम्भकं भूतसूक्ष्मम्[1] । सङ्कल्पविकल्पाद्यारम्भकत्वात् । मनसोऽपि परा सूक्ष्मतरा महत्तरा प्रत्यगात्मभूता च बुद्धिः[2] । बुद्धिशब्दवाच्यम् अध्यवसायाद्यारम्भकं भूतसूक्ष्मम् । बुद्धेः आत्मा सर्वप्राणिबुद्धीनां प्रत्यगात्मभूतत्वात् आत्मा ; महान् सर्वमहत्त्वात् । अव्यक्ताद् यत् प्रथमं जातं[3] हैरण्यगर्भं तत्त्वं बोधाबोधात्मकम्[4] महान् आत्मा बुद्धेः परः इत्युच्यते ॥ १० ॥

महतोऽपि[5] परं सूक्ष्मतरं प्रत्यगात्मभूतं सर्वमहत्तरं च **अव्यक्तम्** **सर्वस्य जगतो बीजभूतम् अव्याकृतनामरूपसतत्त्वं[6] सर्वकार्यकारणशक्तिसमाहाररूपम्[7] अव्यक्ता[8]व्याकृताकाशादिनामवाच्यं[9]**

---

1. मनोबुद्ध्यादिशब्दैः तत्तदारम्भकभूतसूक्ष्माण्येव विवक्षितानि । आरम्भकत्वं तु उपादानकारणत्वमेव, न तु वैशेषिकसंमतम् । तस्य सूत्रभाष्ये (२-२-१२...१७) निरस्तत्वात् इति ज्ञेयम् । भूतसूक्ष्मशब्देन च भूतानां सूक्ष्मस्थितिरुच्यते । अव्यक्तस्यापि भूतसूक्ष्मत्वाभ्युपगमात् ॥ सू. भा. १-३-२.

2. त्रुटितमेतत् पदम् आ॥

3. अव्यक्तात् प्रथमं सर्वस्रष्टृ हैरण्यगर्भं जायते ॥ बृ. ५-४-१, ५-५-१.

4. ज्ञानक्रियाशक्तिद्वययुतम् इत्यर्थः । अथवा चेतनाचेतनात्मकजगतः प्रथमं कारणम् इत्यर्थः ॥

5. महतोऽपि आत्मनः, हिरण्यगर्भादपीत्यर्थः । महत्तत्त्वं सर्वबुद्धीनामुपादानं महानात्मा इत्युच्यते इतीह व्याख्यातम् । महानात्मा जीवः – इत्यपि व्याख्यातं सूत्रभाष्ये (१-४-१) ॥

6. 'नामरूपं सतत्त्वम्' इति (वा॥) न शुद्धः पाठः । नामरूपपरमार्थरूपम् ; तस्यैव हि व्याकृतं रूपम् महदादीत्यर्थः । एवम् 'अव्यक्तमव्याकृताकाशादि' इति (वा॥) पाठात् 'अव्यक्ताव्याकृताकाशादि' इति (आ॥) समासपाठ एव वरीयान् ॥

7. आकाशवाय्वादयः कार्यकारणभावेन स्थिताः । तत्स्थितशक्तीनां समाहारः, शक्तिसामान्यरूपेण स्थितम् अव्यक्तम् ॥

8. अव्यक्तम् इति व्यस्तपाठः – वा॥

9. अव्यक्तम्, अव्याकृतम्, आकाशम्, बीजम्, शक्तिः, माया, प्रकृतिः – इत्यादिशब्दैर्व्यपदेश्यम् ॥ सू. भा. १-४-३, १-४-९, २-१-१४. अव्यक्तशब्देन अविद्याप्युच्यते यदा जीवो महान् आत्मा इति व्याख्यातं सूत्रभाष्ये (१-४-१) । अत्र भूमिका द्रष्टव्या ॥

9

परमात्मनि ओतप्रोतभावेन समाश्रितं[1] वटकणिकायामिव वटवृक्षशक्तिः[2] । तस्मात् अव्यक्तात् परः सूक्ष्मतरः सर्वकारणकारणत्वात्[3] प्रत्यगात्मत्वाच्च, महांश्च । अत एव पुरुषः । सर्वपूरणात्[4] । ततोऽन्यस्य परस्य प्रसङ्गं निवारयन्नाह – पुरुषान्न परं किञ्चिदिति । यस्मात् नास्ति पुरुषात् चिन्मात्रघनात्[5] परं किञ्चिदपि वस्त्वन्तरम्, तस्मात् सूक्ष्मत्वमहत्त्वप्रत्यगात्मत्वानां सा काष्ठा निष्ठा, पर्यवसानम् । अत्र हि इन्द्रियेभ्य आरभ्य सूक्ष्मत्वादि परिसमाप्तम्[6] । अत एव च गन्तॄणां सर्वगतिमतां संसारिणां सा परा प्रकृष्टा गतिः । 'यद् गत्वा न निवर्तन्ते' (गी. १५-६) इति स्मृतेः[7] ॥ ११ ॥

एष सर्वेषु भूतेषु
गूढोऽऽत्मा न प्रकाशते ।
दृश्यते त्वग्र्यया बुद्ध्या
सूक्ष्मया सूक्ष्मदर्शिभिः ॥ १२ ॥

**सर्वस्यापि प्रत्यगात्मायं परमात्मा –**

५९. ननु गतिश्चेत् आगत्यापि भवितव्यम् । कथं 'यस्माद् भूयो न जायते' (१-३-८) इति ? नैष दोषः । सर्वस्य प्रत्यगात्म-

1. कार्यं हि कारणे ओतं च प्रोतं च । परमकारणं च ब्रह्म ॥ बृ. ३-८-३ प्रभृति ३-८-८ पर्यन्तम् ।

2. तन्त्वादिष्विव पटादिकमित्युक्ते, पटप्रतीतिरिव कार्यस्यापि अव्यक्तादेर्विविक्ततया प्रतीतिराशङ्क्येत । तथा मा शङ्कीत्याह-वटकणिकायामिव वटवृक्षशक्तिरिति । वृक्षशक्तिर्हि वटकणिकायामनुमीयते, न तूपलभ्यते इति ॥ छां. ६-१२-१, २.

3. अत्र कारणत्वं च सर्वविकल्पास्पदत्वम्, न त्ववयवविन्यासान्तरेण विपरिणामवत्त्वम् ॥ 4. व्यापनात् ॥

5. घनशब्दो जात्यन्तरप्रतिषेधार्थः । यथा सुवर्णघन इति । बृ. भा. २-४-१२ (विज्ञानघनशब्दव्याख्यानं द्रष्टव्यम्) ॥

6. 'सूक्ष्मत्वादिपरिसमाप्तिः' आ॥

7. अनावृत्तिपर्यवसाना गतिरेवात्र 'परा गतिः' इत्युच्यत इति भावः ॥

त्वात् अवगतिरेव गतिरित्युपचर्यते[1]। प्रत्यगात्मत्वं च दर्शितम् इन्द्रियमनोबुद्धिपरत्वेन[2]। यो हि गन्ता सोऽगतम्[3] अप्रत्यग्रूपं[4] गच्छति अनात्मभूतम्, न विपर्ययेण[5]। तथा च श्रुतिः 'अनध्वगा अध्वसु पारयिष्णवः' (?) इत्याद्या[6]। तथा च दर्शयति[7] प्रत्यगात्मत्वं सर्वस्य –

एष पुरुषः सर्वेषु ब्रह्मादिस्तम्बपर्यन्तेषु भूतेषु गूढः संवृतः दर्शनश्रवणादिकर्मा अविद्यामायाच्छन्नः[8]। अत एव[9] न प्रकाशते आत्मत्वेन

1. न हि प्रत्यगात्मा गन्तव्यः इत्यतोऽवगतिरेव गतिः। द्र. १-१-८ (गतिरत्र नास्ति)॥

2. बुद्धेरपि स्वकार्यभूतसर्वप्रत्यग्रूपायाः परत्वात् मुख्यवृत्त्या प्रत्यगात्मा इति दर्शितम्॥

3. 'सोऽयम्' इत्यतो वरमेतद् गृहीतम्॥

4. 'सोऽयमप्रत्यग्रूपं पुरुषं गच्छति अनात्मभूतं न विन्दति स्वरूपेण' इति (वा॥) पाठतोऽयमेव ज्यायान्। अगतं गच्छति, अप्रत्यग्रूपपराग्रूपं च गच्छति॥

5. 'न विन्दति स्वरूपेण' इति (वा॥) न शुद्धः पाठः। न तद्विपर्ययेण गतमेव प्रत्यग्रूपं स्वात्मभूतं गच्छति–इति ह्यभिप्रेतम्॥

6. इयं श्रुतिः मुण्डकेऽपि (३-२-६) उदाहृता। कुत्रत्येति तु न विज्ञायते। अध्वानम् अगत्वैव अध्वनः पारमाप्तुं शक्नुवाना इत्यर्थः॥

7. अयं मन्त्रोऽपीति शेषः॥

8. देहेन्द्रियादिषु अहंममाभिमानवतः द्रष्टृत्वादिकं प्रातीतिकम्। तस्य पारमार्थिकं तु स्वरूपं सर्वसाक्षित्वम् आत्मानात्मनोरितरेतराध्यासोऽविद्या. तत्कल्पितं नामरूपं माया। ताभ्यामविद्यामायाभ्यां छन्न इव छन्नः। प्राकृतजनदृष्ट्या, घनच्छन्नदृष्टीनामर्क इव घनच्छन्नवत् प्रतिभासमानः। अविद्याकल्पितमायाच्छन्न इति वा। अविद्याकल्पिते हि नामरूपे तदासक्तबुद्धीनां स्वात्मनि वस्तुसत्तां दर्शयेते। सू. भा. २-१-१४ (सर्वज्ञस्येश्वरस्य माया, शक्तिः......)। अविद्येति ज्ञाननिरस्यत्वमुच्यते मायेति मिथ्यात्वम्–इत्यविद्यामाययोरेकत्वं वदन्तो भाष्यबहिर्भूताः। 'जीवस्य प्रकाशत्वे ब्रह्मात्मत्वे सत्यपि योऽयं ब्रह्मस्वरूपानवभासः, स केनापि प्रतिबन्धेन कृत इति कल्प्यते' इत्यविद्याम् अध्यासव्यतिरिक्ताम् अनुमिमाना अपि तथैवेति ज्ञेयम्॥

9. मायाच्छन्नत्वादेवेत्यर्थः। 'अत एव आत्मा' इति वा॥

कस्यचित् । अहो अतिगम्भीरा दुरवगाह्या विचित्रा चेयं माया[1], यदयं सर्वो जन्तुः परमार्थतः परमार्थसतत्त्वोऽपि[2] एवं बोध्यमानः 'अहं परमात्मा' इति न गृह्णाति ; अनात्मानं देहेन्द्रियादिसंघातम् आत्मनो दृश्यमानमपि घटादिवत्[3] आत्मत्वेन 'अहममुष्य पुत्रः' इति अनुच्यमानोऽपि गृह्णाति । नूनं परस्यैव मायया मोमुह्यमानः[4] सर्वो लोको बंभ्रमीति । तथा च स्मरणम् 'नाहं प्रकाशः सर्वस्य योगमायासमावृतः[5]' (गी. ७-२५) इत्यादि ॥

ननु विरुद्धमिदमुच्यते 'मत्वा धीरो न शोचति' (१-२-२२), 'न प्रकाशते' (१-३-१२) इति च । नैतदेवम् । असंस्कृतबुद्धेरविज्ञेयत्वात्[6] 'न प्रकाशते' इत्युक्तम् । दृश्यते तु[7] संस्कृतया अग्र्यया ।

---

1. दुरवगाह्या स्वरूपेण मिथ्येत्यविज्ञायमानत्वात्, विचित्रा च गुणमयत्वेन विचित्रकार्यं प्रदर्श्य व्यामोहकत्वात् मूढानां चित्ताकर्षकत्वाच्च, गी. भा. ७-१३, १४. 'विचित्रा माया चेयम्' इति तु आ॥

2. 'परमार्थसतत्त्वोऽपि' इत्येष 'परमात्मसतत्त्वोऽपि' इत्यस्य परिवर्तनेन लिखित इत्यूह्यते । वस्तुतः परमात्मस्वरूपोऽपि हि शास्त्रैर्विद्वद्भिश्च बोध्यमानोऽपि न तथा गृह्णाति ॥

3. न हि घटादिर्दृश्यः दृग्रूपो भवेत्, एवं संघातोऽप्यनात्मा भवितुमर्हति, दृश्यमानत्वादित्यर्थः ॥

4. माया त्रिगुणात्मिका । गुणानेव तु विकारात्मकान् आत्मत्वेन गृह्णाति, रागादिभावैर्मोहितः । गी. भा. ७-१३.

5. अजमव्ययं मां लोको नाभिजानाति । यतो योगमायया-योगमाया गुणानां युक्तिर्घटनम् ; तया-मायया संछन्न इवाहम् इत्यर्थः ॥

6. शमदमादिसंस्काररहितबुद्धेः पुरुषस्य न प्रकाशत इव । वस्तुतः स्वयं मायामपि प्रकाशयति हि सर्वस्यात्मायमिति ॥

7. वक्ष्यमाणयोगेन एकाग्रतामापादितया बुद्ध्या दृश्यते । संस्कृतबुद्धीनां तदात्मत्वेनावभासते इति 'दृश्यते' इत्युक्तम्, न तु दर्शनविषयतां गच्छतीति । अतो न दोषः । "निदिध्यासनप्रचयेनैकाग्र्यमापन्नमन्तःकरणं यदा सहकारि संपाद्यते तदा तत्सहकृतात् महावाक्यात् 'अहं ब्रह्मास्मि' इति या बुद्धिरुत्पद्यते तस्यामभिव्यक्तो ब्रह्मभाव इति दृश्यत्वमुपचर्यते" इति व्याख्यातारः केचित् । तत्र भाष्यप्रमाणं न पश्यामः ॥

अग्रमिवाग्र्या तया । एकाग्रतयोपेतया इत्येतत् । सूक्ष्मया सूक्ष्मवस्तु-निरूपणपरया । कैः सूक्ष्मदर्शिभिः । 'इन्द्रियेभ्यः परा ह्यर्थाः' इत्यादि-प्रकारेण सूक्ष्मतापारम्पर्यदर्शनेन परं सूक्ष्मं[1] द्रष्टुं शीलं येषां ते सूक्ष्म-दर्शिनः । तैः सूक्ष्मदर्शिभिः । पण्डितैः—इत्येतत् ॥ १२ ॥

## सूक्ष्मस्यात्मनो दर्शनार्थं योगः

यच्छेद् वाङ्मनसी प्राज्ञ-
स्तद् यच्छेज्ज्ञान आत्मनि ।
ज्ञानमात्मनि महति नियच्छेत्
तद् यच्छेच्छान्त आत्मनि ॥ १३ ॥

इन्द्रियादिप्रविलयनयोगः –

६०. तत्प्रतिपत्त्युपायमाह –

यच्छेत् नियच्छेत् उपसंहरेत्[2] प्राज्ञः विवेकी । किम्? वाक् वाचम् । वागत्र उपलक्षणार्था सर्वेषाम् इन्द्रियाणाम् । क? मनसी मनसि[3] । छान्दसं दैर्घ्यम् । तच्च मनः, यच्छेत् ज्ञाने प्रकाशस्वरूपे बुद्धौ

---

1. पर एवात्मा सूक्ष्मः । तद्दर्शनशीलैः इति यथाश्रुतार्थः । बुद्धेरात्म-समनैर्मल्याद्युपपत्तेः आत्मचैतन्याकाराभासत्वोपपत्तिः । एतदेव दर्शनमित्युप-चर्यते । अविद्याध्यारोपितबाह्याकारभेदवृत्तिनिवृत्तिरेव तु अत्र कारणं नात्मविषयकं दर्शनमप्यवश्यम् । अत्यन्तप्रसिद्धत्वादात्मन इति ज्ञेयम् ॥ गी. भा. १८–५०.

2. प्रविलापयेत् इत्यर्थः ॥

3. नास्ति 'मनसि' इति आ॥ वागादिबाह्येन्द्रियव्यापारमुत्सृज्य मनोमात्रेण अवतिष्ठेत् । मन एव हीन्द्रियाणां सर्वेषां सतत्त्वमिति विवेचनेन तन्मात्रस्तिष्ठेत्–इत्यर्थः ॥

आत्मनि । बुद्धि हिं मनआदिकरणानि आप्नोतीति आत्मा, प्रत्यक्[1] तेषाम् । ज्ञानं बुद्धिम् आत्मनि महति प्रथमजे नियच्छेत् । प्रथमजवत् स्वच्छस्वभावम् आत्मनो विज्ञानमापादयेन्[2] इत्यर्थः । तं च महान्तम् आत्मानं यच्छेत् शान्ते सर्वविशेषप्रत्यस्तमितस्वरूपे, अविक्रिये, सर्वान्तरे, सर्वबुद्धिप्रत्ययसाक्षिणि मुख्ये आत्मनि[3] ॥ १३ ॥

उत्तिष्ठत जाग्रत
प्राप्य वरान् निबोधत ।
क्षुरस्य धारा निशिता दुरत्यया
दुर्गं पथस्तत् कवयो वदन्ति ॥ १४ ॥

आत्मदर्शनयत्नकर्तव्यतोपदेशः –

६१. एवं पुरुषे आत्मनि सर्वं प्रविलाप्य नामरूपकर्मत्रयं[4] यन् मिथ्याज्ञानविजृम्भितं[5] क्रियाकारकफललक्षणं स्वात्मयाथात्म्यज्ञानेन

---

1. विकल्पदोषदर्शनेन बुद्धौ धारयेत् । तत्र प्रविलापयेत् इत्यर्थः । सर्वत्र तत्तत्प्रत्यगात्मत्वेन तत्तद्विज्ञाय तदात्मना तिष्ठेदित्यभिप्रायेण 'प्रत्यक् तेषाम्' इत्युक्तम् । आप्नोतीति तद्व्यापकत्वात् तदात्मत्वमिति च । 'प्रत्यक् च' इति (वा॥) पाठे चोऽधिकः ॥

2. स्वच्छस्वभावतापादनेन बुद्धेर्महत्यात्मनि प्रविलय इत्यभिप्रायः । जीवे महत्यात्मनि प्रविलापयेत् । तद्व्यतिरेकेण तदभावदर्शनेनेति वा अर्थः ॥ सू भा· १-४-१·

3. अव्यक्तप्रविलापनद्वारेणेति शेषः । 'महतः परमव्यक्तम्' (१-२-५) इति ह्युक्तम् । प्रत्यगात्मब्रह्मावगतिर्हीह विवक्षिता, अशेषानात्मप्रविलयनोपदेशमुखेन, नार्थादीनां ततस्ततः परत्वेन प्रतिपादनम् । योगश्चायं न स्वप्रधानत्वेनोपदिष्टः, किं तु सम्यग्दर्शनार्थमेवेति ॥ सू· भा· ३-३-१४, १५·

4. नामरूपकर्मात्मकं हीदं व्याकृताव्याकृतात्मकं सर्वम् ॥ बृ भा· १-६-१·

5. विद्यमानमेवेदं प्रविलापयितव्यमिति न भ्रमितव्यम्, न हि तच्छक्यं केनापि कर्तुमिति सूचयन्नाह–मिथ्याज्ञानविजृम्भितम् इति । सू· भा· ३-२-२१ (प्रपञ्चप्रविलयवादविमर्शः) ॥

मरीच्युदकरज्जुसर्पगगनमलानीव[1] मरीचिरज्जुगगनस्वरूपदर्शनेनेव, स्वस्थः[2] प्रशान्तात्मा[3] कृतकृत्यो भवति यतः, अतः तद्दर्शनार्थम् अनाद्यविद्या-प्रसुप्ताः[4] उत्तिष्ठत, हे जन्तवः आत्मज्ञानाभिमुखा भवत । जाग्रत अज्ञान-निद्रायाः घोररूपायाः सर्वानर्थबीजभूतायाः[5] क्षयं कुरुत । कथम् ? प्राप्य उपगम्य वरान् प्रकृष्टान् आचार्यान् तत्त्वविदः[6], तदुपदिष्टं सर्वान्तरमात्मानम् 'अहमस्मि' इति निबोधत अवगच्छत[7] । न हि उपेक्षितव्यम् इति श्रुतिः अनुकम्पया आह मातृवत् । अतिसूक्ष्मबुद्धि-विषयत्वात् ज्ञेयस्य ॥

किमिव सूक्ष्म(क्ष्मा ?)बुद्धिरिति ? उच्यते –

क्षुरस्य धारा अग्रं निशिता तीक्ष्णीकृता दुरत्यया दुःखेन अत्ययो यस्याः सा दुरत्यया यथा सा पद्भ्यां दुर्गमनीया, तथा दुर्गं

---

1. 'मलानीव .... स्वरूपदर्शनेनेव' इत्यत्र एक इवकारोऽतिरिच्यते । 'दर्शनेनैव' इति (आ॥ वा॥) पाठे एवकारोऽनर्थकः, दर्शनेन प्रविलाप्येत्युक्तेऽपि विवक्षितार्थलाभात् ॥

2. द्वैतप्रशमनेन, रोगार्तस्येव रोगनिवृत्तौ इत्यर्थः ॥ मां. भा. अव.

3. शान्तान्तःकरणः । गी. भा. ६-१४ ; 'प्रशान्तः' इति वा॥

4. अनाद्यविद्यया तत्त्वाप्रतिबोधरूपेण, अन्यथाग्रहणलक्षणेन चानादि-कालप्रवृत्तया विविधान् स्वप्नान् पश्यन्तः जागरितस्वप्नयोः प्रसुप्ता इत्यर्थः ॥ गौ. का. भा. १-१६.

5. अविद्या हि सर्वानर्थबीजभूता, कामकर्माङ्कुरद्वारेणेति भावः । अत्र बीजशब्देनोपादानकारणं गृह्णन्तः, 'मिथ्याज्ञानविजृम्भितम्' इत्यत्र मिथ्या च तदज्ञानं च इति विगृह्य मिथ्याध्यारोपव्यतिरिक्तमज्ञानं कल्पयन्तश्च मरीच्युदकादि-दृष्टान्तादानभाष्येणैव परास्ता वेदितव्याः ॥

6. 'तद्विदः' इति आ॥ तत्त्वविदुपसत्तिपूर्वकं संपादिता हि विद्या अविद्यानिद्रापनोदनक्षमा नान्येति । गी. भा. ४-३४ ; छां. ४-९-३.

7. 'अव्यक्तात् पुरुषः परः' (१-२-५) इत्युक्तम् । सर्वान्तर एव हि परमार्थतो नः प्रत्यगात्मा (बृ. भा. ३-७) । निबोधत इति अनुभवपर्यवसानं ज्ञानं संपादयत इत्यर्थ इत्याह – 'अवगच्छत' इति ॥

दुःसंपाद्यम्[1] इत्येतत् । पथः पन्थानं तत् तं ज्ञानलक्षणं मार्गं कवयः मेधाविनः वदन्ति । ज्ञेयस्य अतिसूक्ष्मत्वात् तद्विषयस्य[2] ज्ञानमार्गस्य दुःसंपाद्यत्वं वदन्ति—इत्यभिप्रायः ॥ १४ ॥

**अशब्दमस्पर्शमरूपमव्ययं**
**तथारसं नित्यमगन्धवच्च यत् ।**
**अनाद्यनन्तं महतः परं ध्रुवं**
**निचाय्य तन्मृत्युमुखात् प्रमुच्यते ॥ १५ ॥**

**निरतिशयसूक्ष्मत्वाद्युपपत्तिर्ब्रह्मणः –**

६२. तत् कथम् अतिसूक्ष्मत्वं ज्ञेयस्येति ? उच्यते । स्थूला तावदियं मेदिनी शब्दस्पर्शरूपरसगन्धोपचिता सर्वेन्द्रियविषयभूता । तथा शरीरम्[3] । तत्र एकैकगुणापकर्षेण गन्धादीनां सूक्ष्मत्वमहत्त्वविशुद्धत्व-नित्यत्वादितारतम्यं दृष्टम् अबादिषु यावदाकाशम् इति, ते गन्धादयः स्थूलत्वादिकारणाः[4] शब्दान्ता यत्र न सन्ति किमु तस्य सूक्ष्मत्वादि-निरतिशयत्वं वक्तव्यम् ! इत्येतद् दर्शयति श्रुतिः –

---

1. यथा तीक्ष्णीकृता क्षुरस्य धारा पद्भ्यां दुर्गमनीया, एवं स पन्था ज्ञानमार्गः दुःसंपाद्यः सूक्ष्मबुद्धिं विना । अतः सूक्ष्मयैव बुद्ध्या दृश्यते इत्युक्तम् इत्यभिप्रायः । पथः इति छान्दसो वचनव्यत्ययः ॥ बृ. भा. ४-४-८.

2. ब्रह्मणः सूक्ष्मत्वाद्, सूक्ष्मदर्शिभिरेव तद्दर्शनमार्गः शक्यानुसरण इत्यर्थः । एतच्चोक्तम् उत्तरमन्त्रार्थावतरणार्थम् ॥

3. सर्वभूतारब्धत्वात् इति भावः ॥

4. 'स्थूलत्वाद्विकाराः' इत्येव आ॥ वा॥ ; स्थूलत्वाल्पत्वाशुद्धत्वा-नित्यत्वादिकारणाः शब्दादयः इत्यर्थलाभात् अयमेव (गो॥ व्याख्यानादृतः) पाठः स्वीकृतोऽस्माभिः ॥

'अशब्दमस्पर्शमरूपमव्ययं तथा अरसं नित्यमगन्धवच्च यत्' एतद् व्याख्यातं[1] ब्रह्म अव्ययम्। यद् हि शब्दादिमत्, तद् व्येति। इदं तु अशब्दादिमत्त्वात्[2] अव्ययम्, न व्येति, न क्षीयते। अत एव च नित्यम्। यद् हि व्येति तदनित्यम्; इदं तु न व्येति, अतो नित्यम्। इतश्च नित्यम्। अनादि। अविद्यमानः आदिः कारणम् अस्य; तदिदम् अनादि। यद् हि[3] आदिमत्, तत् कार्यत्वात् अनित्यं कारणे प्रलीयते। यथा पृथिव्यादि[4]। इदं तु सर्वकारणत्वात्[5] अकार्यम्। अकार्यत्वात् नित्यम्। न तस्य कारणमस्ति यस्मिन् प्रलीयेत[6]। तथा अनन्तम्। अविद्यमानः अन्तः कार्यम् अस्य; तदिदम् अनन्तम्। यथा कदल्यादेः फलादिकार्योत्पादनेनापि अनित्यत्वं दृष्टम्, न च तथापि अन्तवत्त्वं ब्रह्मणः; अतोऽपि नित्यम्। महतः महत्तत्त्वाद् बुद्ध्याख्यात्[7] परं विलक्षणम्। नित्यविज्ञप्तिस्वरूपत्वात्। सर्वसाक्षि हि सर्वभूतात्मत्वात्[8] ब्रह्म। उक्तं हि 'एष सर्वेषु भूतेषु' (१-३-१२) इत्यादि। ध्रुवं च कूटस्थं नित्यम्, न पृथिव्यादिवत् आपेक्षिकं नित्यम्[9]। तत् एवंभूतं ब्रह्म आत्मानं निचाय्य अवगम्य[10] तम् आत्मानम्, मृत्युमुखात् मृत्युगोचरात् अविद्याकामकर्मलक्षणात्[11] प्रमुच्यते वियुज्यते ॥ १५ ॥

---

1. 'दृश्यते त्वग्र्यया बुद्ध्या' इत्येतत्पर्यन्तं व्याख्यातं ब्रह्म – इत्यर्थः। यद् वा 'अशब्दमस्पर्शम्' इत्यादिवाक्यं श्रुत्यवतरणिकाभाष्येणैव व्याख्यातप्रायम् इत्यर्थः ॥ 2. गुणापकर्षेण हि व्ययः। इदं तु निर्गुणम् ॥

3. 'यच्च' वा॥ 4. पृथिवी अप्सु, आपस्तेजसि – इत्याद्यूह्यम् ॥

5. सर्वविकल्पास्पदत्वात् इत्यर्थः ॥ 6. 'प्रलीयते' आ॥

7. समष्टिबुद्धेः ॥

8. अतः बुद्धिप्रत्ययानाम् आगमापायसाक्षित्वात् ततः परम् ॥

9. 'नित्यत्वम्' इत्यस्य स्थाने लिखितमस्माभिरिदम्। यस्मिन् विक्रियमाणेऽपि तदेवेदमिति बुद्धिर्न विहन्यते, यथा पृथिव्यादिजगन्नित्यत्ववादिनाम्, यथा च सांख्यानां गुणाः। तदितरापेक्षया नित्यमित्युच्यते ॥ सू. भा. १-१-४.

10. आत्मत्वेन अनुभूय ॥

11. संसारात्। अविद्याकामकर्माण्येव हि संसाररूपस्य मृत्योः पिण्डितं रूपम् ॥

आत्मविज्ञानस्तुतिः

नाचिकेतमुपाख्यानं
मृत्युप्रोक्तꣳ सनातनम् ।
उक्त्वा श्रुत्वा च मेधावी
ब्रह्मलोके महीयते ॥ १६ ॥

य इमं परमं गुह्यं
श्रावयेद् ब्रह्मसंसदि ।
प्रयतः श्राद्धकाले वा
तदानन्त्याय कल्पते
तदानन्त्याय कल्पत इति ॥ १७ ॥

इति प्रथमाध्याये तृतीया वल्ली । अध्यायश्च समाप्तः ॥

आख्यानश्रोतुर्विज्ञातुश्च ब्रह्मसायुज्यं फलम् –

६३. प्रस्तुतविज्ञानस्तुत्यर्थमाह श्रुतिः –

नाचिकेतं नचिकेतसा प्राप्तं नाचिकेतम् । मृत्युना प्रोक्तं मृत्युप्रोक्तम्, इदम् आख्यानम् उपाख्यानं[1] वल्लीत्रयलक्षणम्, सनातनं चिरन्तनम् । वैदिकत्वात्[2] । उक्त्वा ब्राह्मणेभ्यः श्रुत्वा च[3] आचार्येभ्यः (ब्रह्मलोके ।) ब्रह्मैव लोको ब्रह्मलोकः, तस्मिन् । महीयते आत्मभूतः उपास्यो भवति इत्यर्थः[4] ॥ १६ ॥

1. उपाख्यानम् इत्यस्यैवार्थः आख्यानमिति ॥ 2. नित्यो हि वेदः ॥
3. नास्ति च शब्दः आ॥
4. ब्रह्मात्मभावेन ब्रह्मवदेव सर्वोपास्यो भवति ॥

श्राद्धकाले श्रावणेन अनन्तफलवत्त्वं कर्मणः –

६४. यः कश्चित् इमं ग्रन्थं परमं प्रकृष्टं गुह्यं गोप्यं श्रावयेत् ग्रन्थतः, अर्थतश्च ब्राह्मणानां संसदि ब्रह्मसंसदि । प्रयतः शुचिर्भूत्वा श्राद्धकाले वा श्रावयेत् भुञ्जानानाम्[1], तत् श्राद्धम् अस्य आनन्त्याय अनन्तफलाय[2] कल्पते संपद्यते[3]। द्विर्वचनम् अध्यायपरिसमाप्त्यर्थम् ॥

इति श्रीशङ्करभगवतः कृतौ काठकोपनिषत्प्रथमाध्याये तृतीयवल्लीभाष्यम् ॥

समाप्तं च प्रथमाध्यायभाष्यम् ॥

---

1. 'ब्राह्मणानाम्' इत्यस्य विशेषणमिदम् । 'भुञ्जानान्' इति तु वा॥
2. श्राद्धकाले श्रवणात् कर्मसाद्गुण्यम्, आपेक्षिकमनन्तफलं च तस्य ॥
3. 'समर्थ्यते' इति (वा॥) न शुद्धमिति भाति ॥

# द्वितीयाध्याये – प्रथमा वल्ली

### काम एव आत्मज्ञानस्य प्रतिबन्धः

पराञ्चि खानि व्यतृणत् स्वयम्भू-
स्तस्मात् पराङ् पश्यति नान्तरात्मन् ।
कश्चिद् धीरः प्रत्यगात्मानमैक्ष-
दावृत्तचक्षुरमृतत्वमिच्छन् ॥ १ ॥

**उत्तरवल्लीसंबन्धः –**

६५. 'एष सर्वेषु भूतेषु गूढोऽऽत्मा न प्रकाशते । दृश्यते त्वग्र्यया बुद्ध्या ' (१–३–१२) इत्युक्तम् । कः पुनः प्रतिबन्धोऽग्र्याया बुद्धेः, येन तदभिभवात्[1] आत्मा न दृश्यत इति ? तद्दर्शन[2]कारण-प्रदर्शनार्था वल्ली आरभ्यते । विज्ञाते हि प्रतिबन्धकारणे तदपनयनाय यत्न आरब्धुं शक्यते नान्यथा–इति ॥

**पराग्दृष्टिः स्वभावो लोकस्य, प्रत्यग्दृष्टिस्तु कस्यचिदेव –**

६६. पराञ्चि पराक् अञ्चन्ति गच्छन्तीति । खानि–खोप-लक्षितानि[3] श्रोत्रादीनि इन्द्रियाणि 'खानि' इत्युच्यन्ते । तानि–पराञ्च्येव

---

1. 'तदभावात्' इति मुद्रितपुस्तकेष्वादृतोऽपि पाठो न युक्तः । येन प्रतिबन्धेन तदभिभवात् अग्र्यबुद्ध्यभिभवात् आत्मा न दृश्यते, स प्रतिबन्धः कः ?–इति खलु प्रश्नः । 'तदभावात् आत्मा दृश्यते' इति पाठस्तु प्रकृतानुपयोगी, प्रतिबन्धस्यैव विजिज्ञासितत्वात् प्रकृते ॥

2. 'तद्दर्शनकारणप्रदर्शनार्था' इत्यपपाठ इति वाक्यशेषान्निर्णीयते ॥

3. 'तदुपलक्षितानि' आ॥

शब्दादिविषयप्रकाशनाय प्रवर्तन्ते । यस्मात् एवंस्वभावकानि[1] तानि व्यतृणत् हिंसितवान् हननं कृतवान् इत्यर्थः । कोऽसौ ? स्वयम्भूः परमेश्वरः । स्वयमेव स्वतन्त्रो[2] भवति सर्वदा न परतन्त्र इति । तस्मात् पराङ् पराग्रूपान् अनात्मभूतान् शब्दादीन् पश्यति उपलभते उपलब्धा, नान्तरात्मन् नान्तरात्मानम् इत्यर्थः ॥

एवं स्वभावेऽपि[3] सति लोकस्य, कश्चित्, नद्याः प्रतिस्रोतः-प्रवर्तनमिव[4] धीरः धीमान् विवेकी प्रत्यगात्मानम् । प्रत्यक्च असौ आत्मा च-इति प्रत्यगात्मा । प्रतीच्येव आत्मशब्दो रूढो[5] लोके नान्यस्मिन्[6] । व्युत्पत्तिपक्षेऽपि तत्रैवात्मशब्दो वर्तते । 'यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह । यच्चास्य सन्ततोभावस्तस्मादात्मेति कीर्त्यते ॥' (?) इत्यात्मशब्दव्युत्पत्तिस्मरणात्[7] । तं प्रत्यगात्मानं स्वं स्वभावम्[8] ऐक्षत् अपश्यत् । पश्यति-इत्यर्थः । छन्दसि कालानियमात् । कथं पश्यतीति ? उच्यते । आवृत्तचक्षुः-आवृत्तं व्यावृत्तं चक्षुः श्रोत्रादिकम् इन्द्रियजातम्[9]

---

1. 'एवं स्वाभाविकानि' इत्यतोऽयमेव साधीयान् पाठः ॥

2. स्वयमेवेत्यस्य व्याख्या । न परायत्तसत्त्व इत्यर्थः ॥

3. 'लोकस्य स्वभावे एवं सत्यपि' इति योजना । अथवा 'एवं-स्वभावेऽपि इति समस्तं पदम् । एवंस्वभावकत्वेऽपीत्यर्थः ॥

4. 'इन्द्रियप्रत्याहरणं कृत्वा' इति शेषपूरणपूर्वकम् अस्य योजना कर्तव्या ॥

5. गवादिशब्दवत् तस्मिन्नेव निरूढ इत्यर्थः ॥ छां॰ भा॰ ६-८-७.

6. 'नान्यत्र' वा॥

7. आप्नोति व्याप्नोति अनात्मानं सर्वं चैतन्येन आदत्ते स्वात्मसात् करोति, सुषुप्ताद्यवस्थासु । अत्ति द्रष्ट्रादिरूपः सन्, विषयानुपलभते । संततो विज्ञानघनश्च भवति । वस्त्वन्तरस्य अन्तरालेऽभावात्-इति व्युत्पत्त्या तत्रैवात्म-शब्दः समञ्जसः ॥

8. 'स्वस्वभावम्' वा॥ 'पराग्दर्शनं स्वभावो लोकस्य' इत्यत्राविचार-सिद्ध इत्यर्थः ; 'प्रत्यगात्मा स्वस्य स्वभावः' इत्यत्र तु पारमार्थिकं स्वरूपमिति स्वभावशब्दार्थः ॥

9. चक्षुरित्युपलक्षणं सर्वेषामपीन्द्रियाणामिति भावः ॥

अशेषविषयात् यस्य स आवृत्तचक्षुः । स एवं संस्कृतः, प्रत्यगात्मानं पश्यति । न हि बाह्यविषयालोचनपरत्वं प्रत्यगात्मेक्षणं च एकस्य संभवति[1] । किमर्थं[2] पुनरित्थं महता प्रयासेन स्वभावप्रवृत्तिनिरोधं[3] कृत्वा धीरः प्रत्यगात्मानं पश्यतीति ? उच्यते — अमृतत्वम् अमरणधर्मत्वं नित्यस्वभावताम्[4] इच्छन् आत्मनः इत्यर्थः ॥ १ ॥

**पराचः कामाननुयन्ति बाला-**
**स्ते मृत्योर्यन्ति विततस्य पाशम् ।**
**अथ धीरा अमृतत्वं विदित्वा**
**ध्रुवमध्रुवेष्विह न प्रार्थयन्ते ॥ २ ॥**

**अविवेकिनामेव विषयविषयः कामः, न विवेकिनाम् –**

६७. यत् तावत् स्वाभाविकं परागेवानात्मदर्शनम्, तदात्मदर्शनस्य प्रतिबन्धकारणम् **अविद्या,** तत्प्रतिकूलत्वात्[5], या च पराक्ष्वेव अविद्योपप्रदर्शितेषु दृष्टादृष्टेषु भोगेषु तृष्णा[6]—ताभ्याम् अविद्यातृष्णाभ्यां प्रतिबद्धात्मदर्शनाः । पराचः बहिर्गतानेव कामान् काम्यान् विषयान् अनुयन्ति अनुगच्छन्ति[7] बालाः अल्पप्रज्ञाः, ते तेन कारणेन मृत्योः

1. पूर्वपश्चिमसमुद्रमार्गवत् परस्परविरुद्धदिक्कत्वात् ॥
2. ‘किमिच्छन्’ वा॥
3. अविद्यास्वभावेन या प्रवृत्तिः, सैवात्र स्वभावप्रवृत्तिरित्युच्यते ॥
4. अमृतत्वमात्मनः स्वभावः, मर्त्यत्वं त्वौपाधिकम् ॥
5. विद्याविद्ययोः परस्परप्रतिकूलत्वं दर्शितम् प्राक् (१-२-४); अविद्याकृतमायासंछन्नो न प्रकाशत आत्मा - इत्युक्तम् (१-३-१२) । तया प्रतिबद्धम् आत्मदर्शनम् ॥
6. अविद्याप्रदर्शितेषु तृष्णा कामः । तेन च बहिरपकर्षणाद् बुद्धेः प्रतिबद्धं दर्शनम् ॥ 7. अनुगमनं नाम तत्प्राप्त्यर्थं कर्मसु प्रवृत्तिः ॥

अविद्याकामकर्मसमुदायस्य[1] यन्ति गच्छन्ति विततस्य विस्तीर्णस्य सर्वतो व्याप्तस्य पाशं पाश्यते बध्यते येन तं पाशं देहेन्द्रियादिसंयोगवियोगलक्षणम्। अनवरतं जन्ममरणजरारोगाद्यनेकानर्थव्रातं प्रतिपद्यन्ते – इत्यर्थः। यत एवम्, अथ तस्मात् धीराः विवेकिनः प्रत्यगात्मस्वरूपावस्थानलक्षणम्[2] अमृतत्वं ध्रुवं विदित्वा। देवाद्यमृतत्वं हि अध्रुवम्। इदं तु प्रत्यगात्मस्वरूपावस्थानलक्षणं[3] 'न कर्मणा वर्धते नो कनीयान्' (बृ. ४-४-२३) इति ध्रुवम्[4]। तत् एवंभूतं कूटस्थमविचाल्यममृतत्वं[5] विदित्वा अध्रुवेषु सर्वपदार्थेषु अनित्येषु निर्धार्य ब्राह्मणा इह संसारे अनर्थप्राये न प्रार्थयन्ते किञ्चिदपि। प्रत्यगात्मदर्शनप्रतिकूलत्वात्। पुत्रवित्तलोकैषणाभ्यो[6] व्युत्तिष्ठन्त्येव इत्यभिप्रायः॥ २॥

## आत्माधिगमप्रकारः

**येन रूपं रसं गन्धं**
**शब्दान् स्पर्शांश्च मैथुनान्।**
**एतेनैव विजानाति**
**किमत्र परिशिष्यते। एतद्वै तत्॥ ३॥**

---

1. अविद्याकामकर्माण्येव हि कारणं मर्त्यत्वे॥

2. स्वात्मन्यवस्थानमेव हि अमृतत्वम्। तै. भा. अव.; स्वात्मप्रतिष्ठा (मुं. भा. १-१-१), स्वरूपावस्थानम् (सू. भा. ४-३-१४, गी. भा. १८-६६) इति च व्यपदिश्यमानमेतदेव॥

3. अस्यानन्तरवाक्यम् – ध्रुवम् 'न कर्मणा वर्धते नो कनीयान्' इति श्रुतेः–इति वा॥; यथाद्दतपाठे तु श्रुत्यर्थानुवादोऽयम्॥

4. निरपेक्षममृतत्वम्, नेतरवत् सापेक्षम्॥

5. 'कूटस्थमविचाल्यमृतत्वम्' इत्येव मूले लिखितं स्यात् इत्युन्नीयते, अविचाल्यम् इति लेखकेन परिवर्तितम् इति च॥

6. बृ. ३ ५-१; मनुष्यपितृदेवलोकसाधनं हीदमेषणात्रयम्॥

यद् बाह्याध्यात्मिकरूपाद्यवभासकं तदेव प्रकृतं ब्रह्म –

६८. यद्विज्ञानान्न किञ्चिदन्यत् प्रार्थयन्ते ब्राह्मणाः, कथं तदधिगम इति ? उच्यते –

येन विज्ञानस्वभावेन आत्मना रूपं रसं गन्धं शब्दान् स्पर्शांश्च मैथुनान् मैथुननिमित्तान् सुखप्रत्ययान् विजानाति विस्पष्टं जानाति सर्वो लोकः । ननु नैवं प्रसिद्धिर्लोकस्य 'आत्मना देहादिविलक्षणेन अहं विजानामि' इति ; 'देहादिसंघातोऽहं विजानामि' इति तु सर्वो लोकोऽवगच्छति । न त्वेवम्[1] । देहादिसंघातस्यापि शब्दादिस्वरूपत्वाविशेषात्, विज्ञेयत्वाविशेषाच्च न युक्तं विज्ञातृत्वम् । यदि हि देहादिसंघातो रूपाद्यात्मकः सन् रूपादीन् विजानीयात्, तर्हि बाह्या अपि रूपादयः, अन्योन्यं स्वं स्वं रूपं च विजानीयुः । न चैतदस्ति ॥

तस्मात्, देहादिलक्षणांश्च रूपादीन् एतेनैव देहादिव्यतिरिक्तेनैव विज्ञानस्वभावेन आत्मना विजानाति लोकः । यथा 'येन लोहो दहति सोऽग्निः' इति, तद्वत् । आत्मनो विज्ञेयं किम् अत्र अस्मिन् लोके परिशिष्यते ? न किञ्चित् परिशिष्यते । सर्वमेव तु आत्मना विज्ञेयम् । यस्यात्मनो विज्ञेयं न किञ्चित् परिशिष्यते, स आत्मा सर्वज्ञः[2] । एतद् वै तत् । किं तत् ? यन्नचिकेतसा पृष्टम्, देवादिभिरपि विचिकित्सितम्[3], धर्मादिभ्योऽन्यत्[4], परमं पदम्[5], यस्मात् परं नास्ति[6] तद् वै एतत् अधिगतम् इत्यर्थः ॥ ३ ॥

---

1. 'ननु' इति (वा॥) न शुद्धः पाठः ; 'नैवम्' इत्येतावदेवालमिति भाति ॥

2. सर्वं हि आत्मस्वरूपभूतेन चैतन्येन जानाति प्रकाशयति । मुं· भा· १-१-९ ; तै· भा· २-१ (यत्तु ब्रह्मणो विज्ञानम्, .... सर्वज्ञं ब्रह्म) ॥

3. १-१-२१. 4. १-२-१४.

5. १-३-९. 6. १-३-११.

स्वप्नान्तं जागरितान्तं
चोभौ येनानुपश्यति ।
महान्तं विभुमात्मानं
मत्वा धीरो न शोचति ॥ ४ ॥

यज्जाग्रत्स्वप्नसाक्षि, तदेव प्रकृतमात्मतत्त्वम् –

६९. अतिसूक्ष्मत्वात् दुर्विज्ञेयम् इति मत्वा एतमेवार्थं पुनः पुनराह[1] –

स्वप्नान्तं स्वप्नमध्यम् । स्वप्नविज्ञेयम् इत्येतत् । तथा जागरितान्तं च जागरितमध्यं जागरितविज्ञेयं च । उभौ स्वप्नजागरितान्तौ । येन आत्मना अनुपश्यति लोकः इति सर्वं पूर्ववत्[2] । तं महान्तं विभुम् आत्मानं मत्वा अवगम्य आत्मभावेन साक्षात् 'अहमस्मि परमात्मा' इति[3] धीरो न शोचति[4] ॥ ४ ॥

---

1. अधिगतं चेत् किमिति पुनरुच्यते ? इत्याशङ्क्याह – अतिसूक्ष्मत्वात् इति । कथं नु नामेदं परमसूक्ष्मं तत्त्वं मुमुक्षूणां बुद्धिगोचरतापन्नं संसारनिवृत्तये स्यादिति श्रुति, पुनः पुनः प्रकारान्तरेण तदेव निरूपयति–इत्यर्थः ॥

2. आक्षेपः समाधानं चेति सर्वं पूर्वमन्त्रभाष्योक्तविधयैव ज्ञेयम् । न हि मनसा, अहंप्रत्ययगम्येन वा स्वप्नजागरितस्थं विज्ञेयं पश्यति लोकः, तादृश-वेदितृस्वरूपस्यापि विज्ञेयत्वात् । येन तु पर्यायेण स्थानद्वयमनुपश्यति, 'योऽहं स्वप्नमद्राक्षम् सोऽहमेव जागरितविज्ञेयं पश्यामि' इत्यनुसंधत्ते च यद्बलात्, तेनैव तु तत्साक्षिचैतन्येन सर्वावस्थाविलक्षणेन पश्यति । 'स एव च ममात्मा' इति ज्ञेयम् इति वाक्यार्थः ॥

3. महान्तं विभुम् अवस्थाद्वयस्यापि व्यापकं चैतन्यस्वरूपम् अयमहमस्मीति अवगम्य ॥

4. कृतार्थबुद्धिर्भवतीत्यर्थः ॥ छां. भा. ७-१-३.

य इमं मध्वदं वेद
आत्मानं जीवमन्तिकात् ।
ईशानं भूतभव्यस्य
न ततो विजुगुप्सते । एतद् वै तत् ॥ ५ ॥

**जीवं कालत्रयातीतपरमात्मत्वेन विदुषः फलम् –**

७०. किञ्च, यः कश्चित् इमं मध्वदं कर्मफलभुजम्[1], जीवं प्राणादिकलापस्य धारयितारम्[2] आत्मानं वेद विजानाति अन्तिकात् अन्तिके,[3] समीपे ईशानम् ईशितारं भूतभव्यस्य कालत्रयस्य[4] ततः तद्विज्ञानादूर्ध्वं आत्मानं न विजुगुप्सते न गोपायितुमिच्छति[5] । अभयप्राप्तत्वात् । यावद् हि भयमध्यस्थः[6], अनित्यमात्मानं मन्यते, तावद् गोपायितुमिच्छत्यात्मानम् । यदा तु नित्यम् अद्वैतमात्मानं विजानाति तदा कः किं कुतो वा गोपायितुमिच्छेत् ? 'एतद् वै तत्' इति पूर्ववत्[7] ॥ ५ ॥

---

1. 'ऋतं पिबन्तौ' (१-३-१) इत्युक्तम् । मधुशब्दस्य कर्मफलाभिधायित्वे ऋ. सं. १-२२-१६४-२२. 2. जीवधातोस्तत्कर्मत्वात् ॥

3. ई. ५ ; मुं. ३-१-७ ; सर्वान्तरात्मत्वात् समीपतरमित्यर्थः ॥

4. 'अन्यत्र भूताच्च भव्याच्च' इति (१-२-१४) नचिकेतसा पृष्टं परमार्थतत्त्वम् । तत्र हि भूतभव्ययोर्ग्रहणेनैव तदन्तरालस्य वर्तमानस्यापि ग्रहणं कृतं भवति ॥ 5. 'न घृणां करोति' इति ई. भा. ६.

6. संसारस्थितस्य भयमध्यस्थत्वम् (छां. भा. १-३-१), अद्वैतात्मनि स्थितस्य तु अभयप्राप्तिरित्यर्थः । छां भा. ६-८-६ (तेजः परस्यां देवतायाम् इत्यस्य भा.) । तै. भा. २-७.

7. एतदेव नचिकेतसा पृष्टम् अन्यत्र भूताच्च भव्याच्चेतीति व्याख्येयमिति भावः ॥

## प्रत्यगात्मब्रह्मणः सर्वात्मत्वम्

**यः पूर्वं तपसो जात-**
**मद्भ्यः पूर्वमजायत ।**
**गुहां प्रविश्य तिष्ठन्तं**
**यो भूतेभिर्व्यपश्यत । एतद् वै तत् ॥ ६ ॥**

**हिरण्यगर्भः प्रकृतब्रह्मणोऽनन्यः –**

७१. यः प्रत्यगात्मा ईश्वरभावेन निर्दिष्टः, स सर्वात्मा इत्येतद् दर्शयति –

यः कश्चिन् मुमुक्षुः पूर्वं प्रथमं तपसः ज्ञानादिलक्षणात्[1]। ब्रह्मणः[2] इत्येतत् । जातम् उत्पन्नं हिरण्यगर्भम् । किमपेक्ष्य पूर्वमिति ? आह – अद्भ्यः पूर्वम् । अप्सहितेभ्यः पञ्चभूतेभ्यः, न केवलाभ्योऽद्भ्य इत्यभिप्रायः[3]। अजायत उत्पन्नो यः, तं प्रथमजं देवादिशरीराण्युत्पाद्य[4] सर्वप्राणिगुहां हृदयाकाशं प्रविश्य तिष्ठन्तं शब्दादीन् उपलभमानम्[5] । भूतेभिः भूतैः

---

1. मुं॰ भा॰ १-१-९ ; तै॰ भा॰ २-६ (स तपोऽतप्यत इत्यस्य भा॰), ज्ञानलक्षणात् इत्येव अलम् इति भाति ; 'आदि' इति लेखकेन केनचित् अधिकावापः कृत इति च ॥

2. श्वे॰ ६-८ ; ब्रह्मणो जातत्वाद् ब्रह्मानन्यत्वं सिध्यतीति भावः ॥

3. ऐ॰ भा॰ १-१-३, बृ॰ भा॰ ५-५-१, सू॰ भा॰ ३-१-२—एतेषु अप्शब्दव्याख्यानं द्रष्टव्यम् । हिरण्यगर्भाद्धि पञ्चभूतोत्पत्तिराम्नायते । बृ॰ १-२-१॰

4. हिरण्यगर्भो विराजमसृजत्, स च देवान् इत्यभिप्रायेणैतदुक्तम् । बृ॰ भा॰ ५-५-१ ; बृ॰ भा॰ १-२-२॰

5. स हि सर्वकरणात्मा सर्वभूतेषु द्रष्टा श्रोता मन्ता विज्ञाता च । मुं॰ भा॰ २-१-४, तै॰ भा॰ १-६ (मनोमयः), सू॰ भा॰ १-२-२३॰

कार्यकरणलक्षणैः[1] सह तिष्ठन्तं यो व्यपश्यत । यः पश्यति इत्येतत् । य एवं पश्यति, स एतदेव पश्यति, यत् तत् प्रकृतं ब्रह्म[2] ॥ ६ ॥

**या प्राणेन संभव-**
**त्यदितिर्देवतामयी ।**
**गुहां प्रविश्य तिष्ठन्तीं**
**या भूतेभिर्व्यजायत । एतद् वै तत् ॥ ७ ॥**

हिरण्यगर्भस्य सर्वभूतात्मत्वम् –

७२. किञ्च, या देवतामयी[3] सर्वदेवतात्मिका प्राणेन हिरण्यगर्भरूपेण परस्माद् ब्रह्मणः संभवति शब्दादीनाम् अदनात् अदितिः । तां पूर्ववद्[4] गुहां प्रविश्य तिष्ठन्तीम् अदितिम् । तामेव विशिनष्टि–या भूतेभिः भूतैः समन्विता व्यजायत उत्पन्ना इत्येतत्[5] ॥ ७ ॥

**अरण्योर्निहितो जातवेदा**
**गर्भ इव सुभृतो गर्भिणीभिः ।**
**दिवे दिव ईड्यो जागृवद्भि-**
**र्हविष्मद्भिर्मनुष्येभिरग्निः । एतद् वै तत् ॥ ८ ॥**

---

1. भूतानि कार्यकरणलक्षणानीह विवक्षितानि न जीवलक्षणानि । जीवतादात्म्यविवक्षया ह्यत्र हिरण्यगर्भस्य गुहाप्रवेशकथनमिति ॥

2. हिरण्यगर्भस्यापि सर्वेतरकारणभूतस्य कारणं प्रकृतं ब्रह्म । तस्मात् तदनन्यत्वन्यायेन हिरण्यगर्भदर्शनं यत् , तत् प्रकृतब्रह्मदर्शनमेवेत्यभिप्रायः ॥

3. ' सर्वदेवतामयी ' इति मुद्रितपाठे सर्वशब्दोऽधिकः ॥

4. देवादिशरीराण्युत्पाद्य प्रविष्टं शब्दादीनुपलभमानम् इति पूर्वमन्त्रभाष्ये इव संयोजनीयमिहापीत्यर्थः ॥

5. तां पश्यन् एतद् वै तत् प्रकृतं पश्यतीति शेषपूरणेन वाक्यार्थो बोध्यः ॥

अग्निरूपेण स्थितो विराडपि ब्रह्मैव –

७३. किञ्च, योऽधियज्ञम् उत्तराधरारण्योः निहितः स्थितः जातवेदाः अग्निः पुनः सर्वहविषां भोक्ता, अध्यात्मं[1] च योगिभिः, गर्भ इव गर्भिणीभिः अन्तर्वत्नीभिः अगर्हितान्नभोजनादिना यथा गर्भः सुभृतः सुष्ठु सम्यक् भृतो लोके इव इत्थमेव ऋत्विग्भिः योगिभिश्च सुभृत इत्येतत् । किञ्च, दिवे दिवे अहन्यहनि ईड्यः स्तुत्यो वन्द्यश्च कर्मिभिः, योगिभिश्च ; अध्वरे हृदये च । जागृवद्भिः जागरणशीलैः । अप्रमत्तैरित्येतत् । हविष्मद्भिः आज्यादिमद्भिः ध्यानभावनावद्भिश्च । मनुष्येभिः मनुष्यैः अग्निः । एतद् वै तत् । तदेव प्रकृतं ब्रह्म[2] ॥ ८ ॥

**यतश्चोदेति सूर्योऽ-**
**स्तं यत्र च गच्छति ।**
**तं देवाः सर्वे अर्पिता-**
**स्तदु नात्येति कश्चन । एतद् वै तत् ॥ ९ ॥**

प्राणस्य सर्वदेवतामयत्वम् –

७४. किञ्च, यतश्च यस्मात् प्राणात् उदेति उत्तिष्ठति सूर्यः । अस्तं निम्लोचनं तिरोधानं[3] यत्र यस्मिन्नेव च प्राणे अहन्यहनि गच्छति,

---

1. यद्यपि ऋग्वेदेऽपि (३-२-२९-२) इयम् ऋक् पठ्यते, तथापि तत्राग्निस्तोत्रमात्रं दृश्यते । इह तु एतद् वै तत् इति वाक्यशेषबलात्, प्रकरणाच्च अध्यात्मोपासनापि गृह्यते इति विशेषः ॥

2. यत् प्रक्रान्तमादौ अग्नेश्चयनमुपासनं च तत्फलमपि ब्रह्मज्ञानफले अन्तर्भवति, ब्रह्मणोऽनन्यत्वादेव विराज इत्यभिप्रायः ॥

3. नास्त्येतत् पदम् भा॥

तं प्राणम् आत्मानं देवा:[1] – अग्न्यादय: अधिदैवम्, वागादयश्च अध्यात्मम्[2] – सर्वे विश्वे अरा इव रथनाभौ[3] अर्पिता: संप्रवेशिता: स्थितिकाले। सोऽपि[4] ब्रह्मैव। तत् एतत् सर्वात्मकं ब्रह्म[5] उ नात्येति नातीत्य तदात्मतां तदात्मकतां तदन्यत्वं[6] गच्छति कश्चन कश्चिदपि[7]। एतद् वै तत् ॥ ९ ॥

यदेवेह तदमुत्र
यदमुत्र तदन्विह ।
मृत्योः स मृत्युमाप्नोति
य इह नानेव पश्यति ॥ १० ॥

सर्वेषामपि संसारिणां ब्रह्मणाऽनन्यत्वम् -

७५. यद् ब्रह्मादिस्थावरान्तेषु वर्तमानं तत्तदुपाधित्वात् अब्रह्मवदवभासमानं संसारि[8], अन्यत् परस्माद् ब्रह्मण इति मा भूत् कस्यचिदाशङ्का इति, इदमाह –

---

1. अस्यानन्तरं 'सर्वे' इति वा॥; अनपेक्षितं तु तत्। उत्तरत्र पठिष्यमाणत्वात् ॥ 2. बृ. १-५-२३. 3. प्र. २-६.

4. सर्वदेवात्मक: प्राणोऽपि ॥ 5. यस्मादनन्य: प्राणोऽपि ॥

6. सुषुप्तौ प्राधान्येन तदात्मकतां जाग्रत्स्वप्नयोस्तत्संबन्धितां च गच्छति सर्वोऽपि। अथवा फलार्थी हिरण्यगर्भात्मकतां गच्छति। ज्ञानी तु तदात्मकतां गच्छतीति व्याचक्षिरे केचित्। परमार्थतो हिरण्यगर्भ:, तत्सृष्टा देवादयश्च एतस्मादनन्या: – इति तु प्रकृतानुगुणम् ॥

7. अथर्ववेदे १०-४-८-१६ किञ्चिद्रूपभेदेनायं मन्त्र: पठित:; बृहदारण्यके च मन्त्रोऽयं व्याख्यात:। न प्राणादन्यत्र किञ्चिदस्ति। सर्वदेवात्मकत्वात् तस्य। स चैतदेव प्रकृतं ब्रह्म परमार्थत: इति पिण्डितार्थ: ॥

8. अत्र एक: तच्छब्दोऽपेक्षित 'इति भाति ॥

यदेवेह कार्यकरणोपाधि[1]समन्वितं संसारधर्मवदवभासमानम्[2] अविवेकिनाम्, तदेव स्वात्मस्थम्[3] अमुत्र नित्यविज्ञानघनस्वभावम् सर्वसंसारधर्मवर्जितं ब्रह्म । यच्च अमुत्र अमुष्मिन् आत्मनि स्थितम्, तदन्विह तदेव इह कार्यकरणनामरूपोपाधिम् अनु विभाव्यमानम्, नान्यत् । तत्र एवं सति उपाधिस्वभावभेददृष्टिलक्षणया अविद्यया मोहितः सन् य इह ब्रह्मणि अनानाभूते 'परस्मादन्योऽहम् मत्तोऽन्यत् परं ब्रह्म' इति नानेव भिन्नमिव पश्यति उपलभते, सः मृत्योः मरणात् मृत्युं मरणं पुनःपुनर्जननमरणभावम् आप्नोति प्रतिपद्यते । तस्मात्, तथा न पश्येत् 'विज्ञानैकरसं नैरन्तर्येण आकाशवत्[4] परिपूर्णं ब्रह्मैवाहमस्मि' इति पश्येत्, इति वाक्यार्थः ॥ १० ॥

### ब्रह्मात्मैकत्वज्ञानात् सर्वानर्थप्रहाणिः

**मनसैवेदमाप्तव्यं**
**नेह नानास्ति किञ्चन ।**
**मृत्योः स मृत्युं गच्छति**
**य इह नानेव पश्यति ॥ ११ ॥**

---

1. 'कार्यकरणोपाधि' इत्येव साधीयान् पाठः, 'कार्यकारणोपाधि' इति मुद्रितात् । सू. भा. १-२-२०, २-१-१४ - इत्यादिभाष्यसंवादात् ॥

2. अवभासकालेऽपि परमात्मना अनन्यत् इति भावः ॥

3. स्वात्मरूपेण निरुपाधिकेन स्थितम् ॥

4. यथा घटाकाशादीनि घटकरकापवरकादिभिरुपाधिभिर्भिन्नत्वेन विभाव्यमानान्यपि निरुपाधिकमहाकाशादभिन्नान्येव परमार्थतः, एक एव तु महाकाशः - एवम् इत्यर्थः ॥ गौ. का. ३-६.

अविद्ययैव ब्रह्मणि नानात्वं भासते –

७६. प्रागेकत्वविज्ञानात् आचार्यागमसंस्कृतेन मनसैव[1] इदं ब्रह्म एकरसं आप्तव्यम् 'आत्मैव, नान्यदस्ति' इति[2]। आप्ते च नानात्वप्रत्युपस्थापिकाया अविद्याया निवृत्तत्वात्[3] इह ब्रह्मणि नाना नास्ति किञ्चन अणुमात्रमपि[4]। यस्तु पुनः, अविद्यातिमिरदृष्टिं[5] न मुञ्चति इह ब्रह्मणि नाना इव पश्यति सः मृत्योर्मृत्युं गच्छत्येव स्वल्पमपि[6] भेदम् अध्यारोपयन् इत्यर्थः ॥ ११ ॥

**अङ्गुष्ठमात्रः पुरुषो**
**मध्य आत्मनि तिष्ठति।**
**ईशानं भूतभव्यस्य**
**न ततो विजुगुप्सते। एतद् वै तत् ॥१२॥**

---

1. मनसैव इतीन्द्रियव्यवच्छेदार्थम्। सर्वेषां मनसि ब्रह्मास्फुरणात् 'आचार्यागमसंस्कृतेन' इति विशेषणम्। शमदमाद्युपलक्षणार्थं चैतत् ॥ गी. भा. २-२१.

2. एवमाप्तव्यः, न तु विषयीकरणेन। मनसोऽप्यविषयत्वादात्मनः। के. १-६.

3. असंस्कृतमनसो येन प्रत्ययेन नानात्वं प्रत्युपस्थाप्यते, सैवाविद्या। शास्त्राचार्योपदेशसंस्कृतमनसस्तु अविद्यानिवृत्तिरात्मसत्यानुबोधेन। गौ. का. ३-३२ ॥

4. मनसोऽप्यमनस्त्वापत्तेः इत्यर्थः। गौ. का. ३-३२ ; तदानीं हि प्रमाता अहमेवेदं ब्रह्मेति प्रतिपद्यते सू. भा. १-१-४. (अन्विष्टः स्यात् प्रमातैव....)

5. मनसो दोषे निवृत्ते, संसारण तिमिरेऽपनीते द्वितीयचन्द्रादर्शनवत् नानात्वदर्शनं न भवति। अविद्यादृष्ट्या प्रमात्रादिभेदे एव सत्यत्वेनाभिनिविशमानस्तु संसारानर्थमवश्यम् ऋच्छतीत्यभिप्रायेण 'अविद्यातिमिरदृष्टिम्' इति वाचो युक्तिः ॥

6. तै. भा. २-७ (उदरमन्तरं कुरुते) ॥

अङ्गुष्ठमात्रः पुरुषो
ज्योतिरिवाधूमकः ।
ईशानो भूतभव्यस्य
स एवाद्य स उ श्वः । एतद् वै तत् ॥ १३ ॥

**हृदयावच्छिन्नत्वेन विभाव्यमान आत्मा ब्रह्मैव –**

७७. पुनरपि तदेव प्रकृतं[1] ब्रह्म आह –

अङ्गुष्ठमात्रः अङ्गुष्ठपरिमाणः । अङ्गुष्ठपरिमाणं हृदयपुण्डरीकम् । तच्छिद्रवर्त्यन्तःकरणोपाधिः अङ्गुष्ठमात्रः । अङ्गुष्ठमात्रवंशपर्वमध्यवर्त्यम्बरवत्[2] । पुरुषः पूर्णमनेन सर्वम् इति[3] । मध्ये आत्मनि शरीरे तिष्ठति यः, तम् आत्मानम् ईशानं भूतभव्यस्य विदित्वा 'न ततः' इत्यादि पूर्ववत्[4] ॥ १२ ॥

किञ्च अङ्गुष्ठमात्रः पुरुषः ज्योतिरिव अधूमकः । 'अधूमकम्' इति युक्तम्, ज्योतिःपरत्वात्[5] । यस्तु एवं लक्षितो योगिभिर्हृदये[6],

---

1. सर्वात्मकं ब्रह्मेत्यर्थः ॥

2. शास्त्रस्य प्रायेण मनुष्याधिकारत्वमुपेत्य अङ्गुष्ठमात्रत्वमुक्तम् इति सू. भा. १-३-२५.

3. विज्ञानात्मनः पूर्णेन परमात्मनैकत्वमुपदिश्यते नाङ्गुष्ठमात्रत्वं कस्यचिदिति निर्णीतम् ॥ सू. भा. १-३-२५.

4. प्राक् (२-१-५) वर्णितरीत्या 'य एवं वेद, ततस्तद्विज्ञानात् आत्मानं न गोपायितुमिच्छति, अभयप्राप्तत्वात्' इति व्याख्येयम् इत्यर्थः ॥

5. 'ज्योतिष्परत्वात्' भा॥

6. एवम् इति अधूमकज्योतिरिव प्रततचैतन्यैकस्वरूपः, ईशानो भूतभव्यस्य– इति च लक्षितः इत्यर्थः । अत्र योगिनः सम्यग्दर्शिनो विवक्षिताः ॥

ईशानो भूतभव्यस्य । स एव नित्यः कूटस्थः अद्य इदानीं प्राणिषु वर्तमानः स उ श्वोऽपि वर्तिष्यते । नान्यस्तत्समोऽन्यश्च जनिष्यते' इत्यर्थः । अनेन 'नायमस्तीति चैके' (१-१-२०) इत्ययं पक्षो न्यायतोऽप्राप्तोऽपि[2] स्ववचनेन श्रुत्या प्रत्युक्तः ; तथा क्षणभङ्गवादश्च ॥

ज्ञानाज्ञानफलोपसंहारः

**यथोदकं दुर्गे वृष्टं**
**पर्वतेषु विधावति**
**एवं धर्मान् पृथक्पश्यं-**
**स्तानेवानुविधावति ॥ १४ ॥**

**अज्ञानिनः सातत्येन संसारः –**

७८. पुनरपि भेददर्शनापवादं ब्रह्मण आह[3] –

यथा उदकं दुर्गे दुर्गमे देशे उच्छ्रिते वृष्टं सिक्तं पर्वतेषु पर्ववत्सु[4] निम्नप्रदेशेषु विधावति विकीर्णं सद् विनश्यति एवं धर्मान् आत्मनः भिन्नान्[5] पृथक्[6] पश्यन् पृथगेव प्रतिशरीरं पश्यन् तानेव शरीरभेदानु-

---

1. यथाहुर्विज्ञानवादिन इति शेषः ॥

2. अकृताभ्यागमकृतविप्रणाशदोषग्रस्तत्वात् नायमस्तीति पक्षो न्यायतोऽप्राप्तः । कालस्यापि साक्षितया आत्मनः क्षणभङ्गित्वमपि न न्यायतः प्राप्तमिति भावः ॥

3. ज्ञानफलोपसंहारार्थमिति शेषः ॥

4. 'पर्वतवत्सु' आ॥ 5. 'अभिन्नान्' इति वा॥ पाठो न युक्तः ॥

6. 'पृथक् भिन्नान्' इत्यनुक्रमोऽत्रापेक्ष्यते मूलमूलिभावद्योतनाय । यथा न्यस्तमेव मुद्रापितं सर्वेषु पुस्तकेषु । अथवा 'अभिन्नान्' इति (वा॥) पाठं स्वीकृत्य, परमार्थतोऽभिन्नानेव सतः पृथक् पश्यन् इति कथञ्चिद् व्याख्येयम् ॥

वर्तिनः अनुविधावति । शरीरभेदमेव पृथक्[1] पुनःपुनः प्रतिपद्यते इत्यर्थः ॥

**यथोदकं शुद्धे शुद्ध-**
**मासिक्तं तादृगेव भवति ।**
**एवं मुनेर्विजानत**
**आत्मा भवति गौतम ॥ १५ ॥**

इति द्वितीयाध्याये प्रथमा वल्ली ।

## ज्ञानिन आत्मा परमात्मनः सकाशात् सर्वथा दुर्विवेचनः

७९. अस्य[2] पुनर्विद्यावतो विध्वस्तोपाधिकृतभेददर्शनस्य विशुद्धविज्ञानघनैकरसम् अद्वयमात्मानं पश्यतो विजानतो मुनेः मननशीलस्य[3] आत्मस्वरूपं कथं संभवतीति[4] ? उच्यते –

यथा उदकं शुद्धे प्रसन्ने शुद्धं प्रसन्नम् आसिक्तं प्रक्षिप्तम् एकरसमेव नान्यथा, तादृगेव भवति आत्माप्येवमेव भवति, एकत्वं विजानतो[5]

---

1. इदं पदमत्रानपेक्षितमिति भाति । न ह्युपनिषद्युपलभ्यत इति ॥

2. 'यस्य' भा॥

3. 'विजानतो मुनेर्मननशीलस्य' इत्यधिकं केनचिल्लेखकेनागामिभाष्यत आकृष्य लिखितं प्रमादादिति भाति ॥

4. उपसर्गवियुक्तं 'भवतीति' इत्येवालमिति भाति । अवतरणिकावाक्यस्यास्याद्यन्तं विमर्शनमावश्यकं ग्रन्थविमर्शकैरित्यस्माकं मतिः ॥

5. अत्र शुद्धे आसिक्तस्य शुद्धोदकस्येव प्रत्यगात्मनो ब्रह्मणि वास्तविक एव संमिलनम् इति मा भूत् कस्यचिदपि मतिरित्याह–'विजानतः' इति । उपाधिकृतभ्रान्तिमात्रव्यवहितं हि ब्रह्मण्यैक्यमात्मनः इति । अतो ज्ञानात् परं ब्रह्मात्मनोः पृथक्त्वेन दुर्विवेचनत्वमेव दृष्टान्ते विवक्षितांश इति भावः ॥

मुनेः मननशीलस्य[1], हे गौतम। तस्मात् कुतार्किकभेददृष्टिं नास्तिककुदृष्टिं[2] च उज्झित्वा मातृपितृसहस्रेभ्योऽपि हितैषिणा वेदेनोपदिष्टम् आत्मैकत्वं शान्तदर्पै[3]रादरणीयम् इत्यर्थः ॥ १५ ॥

इति श्रीशङ्करभगवतः कृतौ काठकोपनिषद्द्वितीयाध्याये प्रथमवल्लीभाष्यम् ॥

---

1. 'मुनेर्विजानतः' इति मूलानुक्रमानुरोधात् मननादनु विजानतः इति व्याख्येयम्। विज्ञानानन्तरं कर्तव्यस्यानवशेषात् ॥

2. कुतार्किकाः सांख्यवैशेषकादयः। नास्तिकास्तु चार्वाकविज्ञानशून्यवादिनः। वेदविरुद्धत्वात्तेषां दृष्टिः कुदृष्टिः। मनु. १२-९५ ॥

3. दर्पो हि विद्याद्यभिमानकृत आत्मदर्शनप्रतिबन्धक इति ॥

# द्वितीयाध्याये – द्वितीया वल्ली

## ब्रह्मतत्त्वनिर्धारणे प्रकारान्तरम्

**पुरमेकादशद्वार-**
**मजस्यावक्रचेतसः ।**
**अनुष्ठाय न शोचति**
**विमुक्तश्च विमुच्यते । एतद्वै तत् ॥१॥**

**शरीररचनासमालोचनेन तदसंहतात्माधिगमः–**

८०. पुनरपि प्रकारान्तरेण ब्रह्मतत्त्वनिर्धारणार्थोऽयमारम्भः, दुर्विज्ञेयत्वाद् ब्रह्मणः ॥

पुरं पुरमिव पुरम् । द्वारद्वारपालाधिष्ठात्राद्यनेकपुरोपकरणसंपत्तिदर्शनात्[1] शरीरं पुरम् । पुरं च सोपकरणं स्वात्मना संहतस्वतन्त्रस्वाम्यर्थं दृष्टम् । तथेदं पुरसामान्यात् अनेकोपकरणसंहतं शरीरं स्वात्मना असंहतराजस्थानीयस्वाम्यर्थं भवितुमर्हति[2] । तच्चेदं शरीराख्यं पुरम् एकादशद्वारम् । एकादशद्वाराण्यस्य । सप्त शीर्षण्यानि, नाभ्या सहार्वाञ्चि त्रीणि

1. द्वाराणि- इन्द्रियस्थानानि ; द्वारपालाः–इन्द्रियाणि, विषयप्रवणात्मप्राप्तेर्निवारणात् ; तेषामधिष्ठातारो देवता आदित्यादयः । आदिशब्देन मनआदिरूपमन्त्र्यादयो ग्राह्याः । शरीरस्य पुरत्वरूपकं द्रष्टव्यम् ऐ. भा. ३-११ "स ईक्षत कथं न्विदं मदृते स्यात्' इत्यत्र) ॥

2. संहतस्य परार्थत्वादित्यर्थः । इदं च सामान्यतो दृष्टं न तार्किकसंमतानुमानसमर्पकम्, किं तु अनुभवाङ्गभूततर्कमात्रम् । एवमग्रेऽप्यूह्यम् ॥

शिरसि एकम् । तैरेकादशद्वारं पुरम्[1] । कस्य ? अजस्य जन्मादिविक्रियारहितस्य[2] आत्मनः । राजस्थानीयस्य पुरधर्मविलक्षणस्य । अवक्रचेतसः, अवक्रं अकुटिलम् आदित्यप्रकाशवन्नित्यमेवावस्थितम्[3] एकरूपं चेतः, विज्ञानम् अस्य इत्यवक्रचेताः । तस्य अवक्रचेतसः राजस्थानीयस्य ब्रह्मणः । यस्येदं पुरं तं परमेश्वरं पुरस्वामिनम्[4] अनुष्ठाय ध्यात्वा— ध्यानं हि तस्यानुष्ठानं सम्यग्विज्ञानपूर्वकम्[5] । तं सर्वैषणाविनिर्मुक्तः[6] सन् समं सर्वभूतस्थं ध्यात्वा — न शोचति । तद्विज्ञानादभयप्राप्तेः शोकावसराभावात् कुतो भयेक्षा[7] ? इहैव अविद्याकृतकामकर्मबन्धनैर्विमुक्तो भवति[8] । विमुक्तश्च सन् विमुच्यते । पुनः शरीरं न गृह्णाति इत्यर्थः[9] ॥

---

1. इदं न प्राणसंख्यानिर्धारणार्थम्, किं तु श्रुताया द्वारसंख्यायाः संख्येयप्रदर्शनार्थमेव । सू. भा. २-४-५, ६.

2. जनिमतो हि वृद्ध्यादिविक्रियाः संभाव्यन्त इति जन्मनिषेधेन तौ अपि निषिध्यन्ते इति भावः ॥

3. यथा विषयाकारेण परिणममाना अन्तःकरणवृत्तिर्नानारूपधारिणी भवति न तथास्य विज्ञानम्, किं तु यथावस्थितमेव सत् सर्वप्रकाशकमित्येतद् 'अवक्रचेतसः' – इति विशेषणस्य फलमिति भावः ॥

4. यद्यपि जीवस्येदं पुरं शरीरम् तत्कर्मार्जितत्वात् । तथापि परस्य उपलब्ध्यधिष्ठानत्वात्, तस्यैव च स्वातन्त्र्येण सर्वपुरेष्वात्मत्वेनोपलब्धेः (प्र. ५-५, बृ. २-५-१८), तत्स्वामिकत्वेनेदं पुरम् इत्युच्यते ॥ सू. भा. १-३-१४.

5. 'विज्ञानपूर्वकं ध्यानम्' इत्यत्र विज्ञानम् अनुभवः, ध्यानं त्वर्थप्राप्तात्मचिन्ता, न त्वात्मविज्ञानानन्तरमपि कर्तव्यतया विवक्षितं ध्यानम् । विज्ञानव्यतिरेकेण कर्तव्यान्तरानवशेषात् ॥ बृ भा. १-४-७ (न । अर्थान्तराभावात् ....)

6. बृ. ३-५-१ (तमात्मानं विदित्वा ....)

7. शोकमोहभयायासादिदुःखनिवर्तकत्वाद्धर्थप्राप्तत्वात् तद्ध्यानस्य । बृ.भा. १-४-७ (पारिशेष्यात् आत्मैकत्वविज्ञानस्मृतिसन्ततेरर्थत एव भावात् ... ) ॥

8. एषैव सद्योमुक्तिर्जीवन्मुक्तिश्चेति व्यपदिश्यमाना ॥ गी. भा. ५-२४, ६-२५, ८-२४.

9. इयं विदेहमुक्तिः, परमात्मन्येवावस्थितिः शरीरान्तराग्रहणं च । ये नु विदेहमुक्तिरेव मुख्या जीवन्मुक्तिस्तु गौणीति मन्यन्ते तेषां भाष्यविरुद्धं मतम् । द्रष्टव्यं बृ भा. ४-४-६ (न हि विदुषो मृतस्य भावान्तरापत्तिः....) ॥

**हंसः शुचिषद् वसुरन्तरिक्षसद्**
**होता वेदिषदतिथिर्दुरोणसत् ।**
**नृषद् वरसदृतसद् व्योमस-**
**दब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥ ७ ॥**

ब्रह्मणः सर्वेष्वपि शरीरेष्वेकत्वम् –

८१. स तु नैकपुरवर्त्येव आत्मा, किं तर्हि सर्वपुरवर्ती[1] । कथम् ?– हंसः हन्ति गच्छतीति । शुचिषत् शुचौ दिवि आदित्यात्मना सीदतीति । वसुः वासयति सर्वान् इति । वाय्वात्मना अन्तरिक्षे सीदतीति अन्तरिक्षसत् । होता अग्निः । 'अग्निर्वै होता' ( ? ) इति श्रुतेः । वेद्यां पृथिव्यां सीदतीति वेदिषत् । 'इयं वेदिः परोऽन्तः पृथिव्याः' (ऋ. १-२२-१६४-३५) इति मन्त्रवर्णात् । अतिथिः सोमः सन् दुरोणे कलशे सीदतीति दुरोणसत् । ब्राह्मणोऽतिथिरूपेण वा दुरोणेषु गृहेषु सीदतीति (दुरोणसत्[2]) । नृषत् नृषु मनुष्येषु सीदतीति नृषत् । वरसत् वरेषु देवेषु सीदतीति (वरसत्) । ऋतसत् ऋते सत्ये यज्ञे वा, तस्मिन् सीदतीति (ऋतसत्) । व्योमसत् व्योम्नि आकाशे सीदतीति (व्योमसत्) । अब्जा, अप्सु शङ्खशुक्तिमकरादिरूपेण जायत इति (अब्जाः) । गोजा गवि पृथिव्यां व्रीहियवादिरूपेण जायत इति (गोजाः) । ऋतजाः यज्ञाङ्गरूपेण जायत इति (ऋतजाः) अद्रिजाः पर्वतेभ्यो नद्यादिरूपेण जायते इति (अद्रिजाः) । सर्वात्मापि सन् ऋतम्, अवितथस्वभाव एव[3] ।

1. अतः 'पुरस्थः' इति पूर्वमन्त्रोक्तं सर्वपुरपरं वेदितव्यमिति भावः ॥

2. अत्र सर्वत्र धनुश्चिह्नान्तर्भावितशब्दाः क्वचिन्मुद्रितपुस्तकेषूपलभ्यन्ते क्वचिन्न । एकरूप एव तु पाठोऽत्र ग्राह्य इति सर्वत्राऽत्र त्यक्तेऽप्यन्तिमपदे न काचित् क्षतिरिति भाति ॥ 3. अव्यभिचारितस्वरूप एवावतिष्ठते ॥

बृहत् महान् । सर्वकारणत्वात्[1] । यदाप्यादित्य एव मन्त्रेणोच्यते तदापि आत्मस्वरूपत्वमादित्यस्याङ्गीकृतमिति[2] ब्राह्मणव्याख्यानेऽप्यविरोधः[3] । सर्वथापि[4] एक एवाऽऽत्मा जगतः, नात्मभेद इति मन्त्रार्थः ॥ २ ॥

ऊर्ध्वं प्राणमुन्नय-
त्यपानं प्रत्यगस्यति ।
मध्ये वामनमासीनं
विश्वे देवा उपासते ॥ ३ ॥

अस्य विस्रंसमानस्य
शरीरस्थस्य देहिनः ।
देहाद् विमुच्यमानस्य
किमत्र परिशिष्यते । एतद्वै तत् ॥ ४ ॥

न प्राणेन नापानेन
मर्त्यो जीवति कश्चन ।
इतरेण तु जीवन्ति
यस्मिन्नेतावुपाश्रितौ ॥ ५ ॥

---

1. सर्वव्यापकत्वात् बृहत् इत्युच्यत इत्यर्थः ॥

2. न ह्यात्मरूपताङ्गीकारं विना केवलस्यादित्यस्य सर्वात्मतास्तीति भावः ॥

3. 'ब्रह्मणि' इत्यपपाठः । ब्राह्मणे आदित्यपरतया व्याख्यानम् तदङ्गीकारेऽपि न विरोध इत्यर्थः ॥

4. साक्षात् परमात्मपरत्वेन व्याख्याने, ब्राह्मणानुसारेण परमात्मानन्यत्वेन आदित्यपरत्वेन व्याख्याने वा, उभयथापि एकात्मत्वमेव मन्त्रस्य विवक्षितोऽर्थः इत्यभिप्रायः ॥

**वायुकरणव्यापारलिङ्गेनात्माधिगमः –**

८२. आत्मनः स्वरूपाधिगमे लिङ्गमुच्यते –

ऊर्ध्वं हृदयात् प्राणं प्राणवृत्तिं वायुम् उन्नयति ऊर्ध्वं गमयति। तथा अपानं प्रत्यक् अधः अस्यति क्षिपति। यः इति वाक्यशेषः। तं मध्ये हृदयपुण्डरीकाकाशे[1] आसीनम् बुद्धावभिव्यक्तं विज्ञानप्रकाशं[2] वामनं वननीयं संभजनीयं विश्वे सर्वे देवाः चक्षुरादयः प्राणाः[3] रूपादिविज्ञानं बलिम्[4] उपहरन्तो विश इव राजानम्[5] उपासते तादर्थ्येन अनुपरतव्यापारा भवन्ति इत्यर्थः। यदर्था यत्प्रयुक्ताश्च सर्वे वायुकरणव्यापारा सोऽन्यः सिद्ध इति वाक्यार्थः ॥ ३ ॥

**यस्य विगमे कार्यकरणसंघातो हतबलो भवति स आत्मा –**

८३. किं च अस्य शरीरस्थस्य आत्मनः विस्रंसमानस्य भ्रंश्यमानस्य देहिनः देहवतः। विस्रंसनशब्दार्थमाह -- देहाद् विमुच्यमानस्य इति। किमत्र परिशिष्यते? प्राणादिकलापे न किञ्चन परिशिष्यते अत्र देहे। पुरस्वामिविद्रवणे इव पुरवासिनां यस्यात्मनोऽपगमे[6] क्षणमात्रात् कार्यकरणकलापरूपं सर्वमिदं हतबलं विध्वस्तं भवति विनष्टं भवति, सोऽन्यः सिद्धः आत्मा ॥ ४ ॥

**प्राणादिकरणसमूहस्य आत्मार्थत्वम्–**

८४. स्यान्मतम् – प्राणापानाद्यपगमादेवेदं विध्वस्तं भवति न तु तद्व्यतिरिक्तात्मापगमात्। प्राणादिभिरेव हि[7] मर्त्यो जीवतीति ॥

---

1. तै. भा. २-१ ('परमे व्योमन्' इत्यस्य भाष्यम्) ॥
2. विज्ञानप्रकाशनम् इति (वा॥) पाठो न समीचीनः ॥
3. तै. भा. २-५ ( देवाः ) ॥
4. सर्वस्य हि करणस्य विज्ञानम् आत्मार्थमेव ॥ ऐ. भा. २-११.
5. संहतस्य परार्थत्वात्। तै. भा. २-७ (यदर्थाः करणप्राणनादिचेष्टाः॥)
6. जीववियोगात् कार्यकरणसंघातस्य हतबलत्वं जीवस्य देहाद्देहान्तरगमनं व्यावहारिकमवलम्ब्यैव प्रकाश्यते युक्त्या न तु परमार्थात्मन आगमापायित्वमस्तीति ॥ 7. 'हि' इत्यस्य स्थाने 'इह' इति वा॥

नैतदस्ति । न प्राणेन नापानेन चक्षुरादिना वा मर्त्यः मनुष्यो देहवान् कश्चन जीवति, न कोऽपि जीवति । न ह्येषां परार्थानां संहत्यकारित्वात् जीवनहेतुत्वमुपपद्यते । स्वार्थेन, असंहतेन परेण[1] केनचिदप्रयुक्तं संहतानाम् अवस्थानं न दृष्टं गृहादीनां लोके ; तथा प्राणादीनामपि संहतत्वाद् भवितुमर्हति । अत[2] इतरेणैव संहतप्राणादिविलक्षणेन तु सर्वे संहताः सन्तो जीवन्ति प्राणान् धारयन्ति । यस्मिन् संहतविलक्षणे आत्मनि सति परस्मिन् एतौ प्राणापानौ चक्षुरादिभिः संहतौ उपाश्रितौ ; यस्य असंहतस्यार्थे प्राणापानादिः स्वव्यापारं[3] कुर्वन् वर्तते संहतः सन्, स ततोऽन्यः सिद्धः इत्यभिप्रायः ॥ ५ ॥

### ब्रह्मात्मनोरेकत्वम्

हन्त त इदं प्रवक्ष्यामि
गुह्यं ब्रह्म सनातनम् ।
यथा च मरणं प्राप्य
आत्मा भवति गौतम ॥ ६ ॥

योनिमन्ये प्रपद्यन्ते
शरीरत्वाय देहिनः ।
स्थाणुमन्येऽनुसंयन्ति
यथाकर्म यथाश्रुतम् ॥ ७ ॥

1. परेण इत्यस्यानन्तरं " संहतानामवस्थानं न दृष्टं केनचिदप्रयुक्तं यथा " इति (वा।) पाठे 'केनचित्' इत्यस्य 'परेण' इति व्यवहितेन संबन्धः ॥

2. एतदनन्तरं 'इतरेण तु' इति मूलानुसारिप्रतीकम् गृहीतम् वा॥

3. 'सर्वं व्यापारम्' इति (वा॥) पाठतो वरीयानयम् ॥

**य एषु सुप्तेषु जागर्ति**
**कामं कामं पुरुषो निर्मिमाणः ।**
**तदेव शुक्रं तद् ब्रह्म**
**तदेवामृतमुच्यते ।**
**तस्मिँल्लोकाः श्रिताः सर्वे**
**तदु नात्येति कश्चन । एतद्वै तत् ॥ ८ ॥**

आत्मनोऽज्ञानान्मनुष्यादिस्थावरान्ता गतिः–

८५. हन्त इदानीं पुनरपि ते तुभ्यम् इदं गुह्यं गोप्यं ब्रह्म सनातनं चिरन्तनं प्रवक्ष्यामि[1] । यद्विज्ञानात् सर्वसंसारोपरमो भवति[2], अविज्ञानाच्च यस्य मरणं प्राप्य यथा च[3] आत्मा भवति यथा[4] संसरति तथा शृणु, हे गौतम ॥ ६ ॥

योनिं योनिद्वारं शुक्रबीजसमन्विताः सन्तः अन्ये केचित् अविद्यावन्तो मूढाः प्रपद्यन्ते शरीरत्वाय शरीरग्रहणार्थं देहिनः देहवन्तः[5] । योनिं प्रविशन्ति इत्यर्थः । स्थाणुं वृक्षादिस्थावरभावम् अन्ये अत्यन्ताधमाः[6] मरणं प्राप्य अनुसंयन्ति अनुगच्छन्ति यथाकर्म यद् यस्य कर्म तद् यथाकर्म । यैर्यादृशं कर्म इह जन्मनि कृतं तद्वशेन इत्येतत् ।

1. ननु प्रष्टुः संदेह आसीत् परलोकास्तित्वेऽपि तन्निवृत्त्यर्थमयं मन्त्र इति केचित् । तन्न । आत्मस्वरूपविज्ञापनप्रकरणस्थत्वान्मन्त्रस्य । ब्रह्म प्रवक्ष्यामि इति प्रतिज्ञादर्शनाच्च ॥ 2. २-२-१.

3. 'च' इति नास्ति भा॥ ; अपेक्षितं तु ॥

4. एतदनन्तरं 'आत्मा' इत्यधिकं गृहीतम् (वा॥ पाठे) अन्वयप्रदर्शनार्थं इति भाति ॥

5. आत्माज्ञानाद् देहवत्त्वाभिमानिनः ॥ सू. भा. १-१-४ (सशरीरत्वस्य मिथ्याज्ञाननिमित्तत्वात् ) ॥

6. महापाप्मान आसुरभावाः ॥ गी. भा. १६-२०.

तथा[1] यथाश्रुतम् । यादृशं च विज्ञानम्[2] उपार्जितं तदनुरूपमेव शरीरं प्रतिपद्यन्ते इत्यर्थः । 'यथाप्रज्ञं हि संभवाः' (ऐ. आ. २-३-२) इति श्रुत्यन्तरात् ॥ ७ ॥

आत्मनोऽनन्यद् ब्रह्म –

८६. यत् प्रतिज्ञातं 'गुह्यं ब्रह्म प्रवक्ष्यामि' इति, तदाह– य एष सुप्तेषु प्राणादिषु[3] जागर्ति न स्वपिति । कथम्? कामं कामं तं तम् अभिप्रेतं स्त्र्याद्यर्थम् अविद्यया निर्मिमाणः[4] निष्पादयन् जागर्ति पुरुषः यः, तदेव शुक्रं शुभ्रं शुद्धम् तद् ब्रह्म नान्यद्[5] गुह्यं ब्रह्मास्ति । तदेव अमृतम् अविनाशि उच्यते सर्वशास्त्रेषु[6] । किञ्च, पृथिव्यादयो लोकाः तस्मिन्नेव सर्वे ब्रह्मणि श्रिताः आश्रिताः सर्वलोककारणत्वात्[7] तस्य । 'तदु नात्येति कश्चन' इत्यादि पूर्ववदेव[8] ॥ ८ ॥

---

1. 'तथा च' इति मुद्रितपाठे चोऽधिकः ॥

2. कर्मणा समुद्भाव्यमानेन वासनात्मकविशेषविज्ञानेनोद्भासितं हि देहमनुगच्छति बृ. भा. ४-४-२ ('सविज्ञानो भवति' इत्यस्य व्याख्यानम् ) ॥

3. प्राणकरणेषु ॥

4. तत्तत्कामवासनारूपान्तःकरणवृत्तिः कर्मानुसारेण तत्तद्रूपतां भजते । तदेतदुच्यते 'निर्मिमाणः' इत्यनेन । अविद्यया इति तादृशी वृत्तिरेवोच्यते । तत्तन्निर्मिमाणः इति जीवस्य कामनिर्मातृत्वं तत्तन्निमित्तमोदत्रासादिदर्शनात्, तन्निमित्तसुकृतदुष्कृतकर्तृत्वेनोपचर्यते । तस्य जीवभावं व्यावृत्य 'तदेव शुक्रं ब्रह्म' इति ब्रह्मभाव उपदिश्यते इति बोध्यम् ॥ सू. भा. ३-२-४.

5. यो जागर्ति अन्तःकरणवृत्तीरवभासयन् स्वप्ने, तदेव ब्रह्म, न तस्मादन्यद् ब्रह्मास्तीत्यर्थः । बृ. भा. ४-३-९. (स्वेन भासा स्वेन ज्योतिषा ) ॥

6. अतोऽन्यदार्तं विनाशि ॥ बृ. भा. ३-४-२, ३-७-२३.

7. इतरत् सर्वं तत्त्वान्यत्वाभ्यामनिर्वचनीयं तदाश्रित्यैव हि स्वसत्तां लभते ॥

8. तदात्मकतामतीत्य कश्चन तदन्यत्वं न गच्छति, एतद्वै तत् नचिकेतसा पृष्टमिति समनन्तरपूर्ववल्लीस्थनवममन्त्रगतवाक्यवदेव व्याख्येयमित्यभिप्रायः ॥

## आत्मैकत्वे दृष्टान्तौ

अग्निर्यथैको भुवनं प्रविष्टो
रूपं रूपं प्रतिरूपो बभूव ।
एकस्तथा सर्वभूतान्तरात्मा
रूपं रूपं प्रतिरूपो बहिश्च ॥ ९ ॥

वायुर्यथैको भुवनं प्रविष्टो
रूपं रूपं प्रतिरूपो बभूव ।
एकस्तथा सर्वभूतान्तरात्मा
रूपं रूपं प्रतिरूपो बहिश्च ॥ १० ॥

एकस्यैवानेकत्वेन विभाव्यमानत्वे दृष्टान्तद्वयम् –

८७. अनेककुतार्किकबुद्धि[1] विचालितान्तःकरणानां प्रमाणोपपन्नमपि[2] आत्मैकत्वविज्ञानम् असकृदुच्यमानमपि अनृजुबुद्धीनां[3] ब्राह्मणानां[4] चेतसि नाधीयते इति तत्प्रतिपादने आदरवती[5] पुनः पुनराह श्रुतिः –

1. अतः कुतार्किकपाषण्डबुद्धि वा॰ ; 'जननमरणादिनियमाद् युगपद प्रवृत्तेश्च' इत्यादिहेतूपन्यासेन आत्मबहुत्वं साधयन्ति सांख्याः, एवं वैशेषिकादयश्च यदात्मबहुत्वे तर्कमुपन्यस्यन्ति स कुतर्क एवेत्यर्थः ॥

2. श्रुतिस्मृतिरूपप्रमाणोपपन्नमपि ॥

3. 'अनृजुबुद्धीनाम्' तार्किकचालितत्वादेवानृज्वी संपन्ना बुद्धिर्येषाम् । 'ऋजुबुद्धीनाम्' इति क्वचित्पाठः । तस्य कुतर्क एष इत्यध्यवसातुमसमर्थानाम्–इत्यर्थः ॥ 4. ब्राह्मणग्रहणमुपलक्षणार्थं सर्वेषामप्यधिकारिणाम् ॥

5. आदरवत्त्वं पुनःपुनरुक्त्या द्योत्यत इति भावः ॥

अग्निः यथा एक एव प्रकाशात्मा सन् भुवनम् — भवन्ति अस्मिन् भूतानीति[1] भुवनम् अयं लोकः । तमिमं—प्रविष्टः अनुप्रविष्टः[2] रूपं रूपं प्रति दार्वादिदाह्यभेदं प्रति इत्यर्थः । प्रतिरूपः तत्र तत्र प्रतिरूपवान्[3] दाह्यभेदेन बहुविधो बभूव । एक एव तथा सर्वभूतान्तरात्मा सर्वेषां भूतानाम् अभ्यन्तर आत्मा अतिसूक्ष्मत्वात् दार्वादिष्विव रूपं रूपं सर्वदेहं प्रति प्रविष्टत्वात् प्रतिरूपो बभूव । बहिश्च स्वेन अविकृतेन रूपेण ; आकाशवत्[4] ॥ ९ ॥

तथा अन्यो दृष्टान्तः—'वायुर्यथैकः' इत्यादि । प्राणात्मना देहेष्वनुप्रविष्टः[5] । 'रूपं रूपं प्रतिरूपो बभूव' इत्यादि समानम् ॥ १० ॥

## देहस्थस्यापि परस्य न संसारदुःखम्

**सूर्यो यथा सर्वलोकस्य चक्षु-**
**र्न लिप्यते चाक्षुषैर्बाह्यदोषैः ।**
**एकस्तथा सर्वभूतान्तरात्मा**
**न लिप्यते लोकदुःखेन बाह्यः ॥ ११ ॥**

---

1. तै. भा. ३-१० ( भुवनमभ्यभवाम् ) ॥

2. अनुप्रविष्ट इव प्रतीयमान इत्यर्थः ॥

3. रूपान्तरं बभूव, तत्तदुपाध्यनुरूपं वा बभूव, भवतीत्यर्थः । तत्तत्कार्यकरणसंघातानुरूपोऽपि भवति मायया ॥ बृ. भा. २-५-१९.

4. तद्बहिश्च, तद्धर्मासंस्पृष्ट एव चावतिष्ठते । आकाशवत् । यथाकाशो घटाकाशादिव्यपदेशं भजमानोऽपि तदानीमेव घटाद्यपरिच्छिन्नः स्वेनैव रूपेणावतिष्ठते तद्वदित्यर्थः ॥

5. वायुरेव ह्यध्यात्ममापन्नः पञ्चव्यूहो विशेषात्मना अवतिष्ठमानः प्राणो नाम ॥ सू. भा. २-४-९.

## परमात्मनो दुःखालिप्तत्वे दृष्टान्तः –

८८. एकस्य सर्वात्मत्वे संसारदुःखित्वं परस्यैव स्यात् इति प्राप्तम् । अत इदमुच्यते –

सूर्यो यथा चक्षुष आलोकेन उपकारं कुर्वन् मूत्रपुरीषाद्यशुचिप्रकाशनेन तद्दर्शिनः सर्वलोकस्य चक्षुरपि सन् न लिप्यते चाक्षुषैः । अशुच्यादिदर्शननिमित्तैः, आध्यात्मिकैः पापदोषैः, बाह्यैश्च अशुच्यादिसंसर्गदोषैः[1] । एकः सन् तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः । **लोको हि अविद्यया स्वात्मन्यध्यस्तया[2] कामकर्मोद्भवं दुःखम् अनुभवति[3] । न तु सा परमार्थतः स्वात्मनि[4] । यथा रज्जुशुक्तिकोषरगगनेषु सर्परजतोदकमलानि । न रज्ज्वादीनां स्वतो दोषरूपाणि सन्ति (सर्परजतोदकमलानि)[5] ; संसर्गिणि विपरीत-**

---

1. द्रष्टृशरीराद्यभिमानाभावात् , स्वालोकस्य बाह्यप्रकाश्यसंसर्गाभावाच्च इत्यर्थः ॥

2. अविद्या हि वस्तुतो नात्मनो धर्मः । गी. भा. १३-२. करणस्यैव कस्यचित् .... ; तै. भा. २-८ (नामरूपपक्षस्यैव विद्याविद्ये); बृ. भा. ४-४-६ (स्वतोऽविद्याकर्तृत्वस्य प्रतिषिद्धत्वात् ) ॥

3. अविद्यायां प्रतिबिम्बितश्चिद्धातुरज्ञो भ्रान्तो भवति । भ्रान्तश्च कामादिदोषेण कर्म कुरुते तन्निमित्तं च दुःखं स्वात्मन्यध्यस्यतीति केचित् । तद् भाष्याक्षरबहिर्भूतम् । अविद्यामन्तःकरणधर्मभूतां स्वात्मन्यध्यस्य, देहेन्द्रियाद्युपाध्यविवेकेन कामकर्मणी चाध्यस्य तत्कर्मफलं दुःखमनुभवतीवेति भाष्याक्षराणि नेयानि । सू. भा. २-३-४६. ( जीवस्याप्यविद्याकृतनामरूपनिर्वृत्तदेहेन्द्रियाद्युपाध्यविवेकभ्रमनिमित्तः ... ) ॥

4. गी. भा. १३-२ (एवं तर्हि 'ज्ञातृधर्मोऽविद्या .... ) ; १३-२ अविद्यादुःखित्वाद्यैर्न ज्ञातुः क्षेत्रज्ञस्य किञ्चिद्दुष्यति ॥ )

5. कंसान्तर्गतो भागः प्रक्षिप्तोऽस्माभिः । एतस्मिन् पाठे ' सर्परजतोदकमलानि ' इत्यन्तमेकं वाक्यम् । ' न परमार्थतः सन्ति ' इत्यनुषङ्गः । ' न रज्ज्वादीनाम् ' इत्यादि एतत्संग्रहवाक्यविवरणम् । यथास्थितपाठेऽपि कथञ्चित् क्लेशेनान्वयः शक्यकरणः ॥

बुद्ध्यध्यासनिमित्तात्[1] तद्दोषवद् विभाव्यन्ते[2]। न तद्दोषैस्तेषां लेपः। विपरीतबुद्ध्यध्यासबाह्या हि ते[3]। तथा आत्मनि सर्वो लोकः क्रियाकारकफलात्मकं विज्ञानं[4] सर्पादिस्थानीयं विपरीतम् अध्यस्य तन्निमित्तं जन्ममरणादिदुःखम् अनुभवति। न त्वात्मा सर्वलोकात्मापि सन्[5] विपरीताध्यारोपनिमित्तेन लिप्यते लोकदुःखेन। कुतः? बाह्यः, रज्ज्वादिवदेव विपरीतबुद्ध्यध्यासबाह्यो हि सः इति ॥ ११ ॥

### आत्मज्ञानिनां नित्यसुखशान्ती

एको वशी सर्वभूतान्तरात्मा
एकं रूपं बहुधा यः करोति।
तमात्मस्थं येऽनुपश्यन्ति धीरा-
स्तेषां सुखं शाश्वतं नेतरेषाम् ॥ १२ ॥

---

1. 'निमित्तात्तु' इति वा॥

2. सर्परजतोदकमलवद् विभाव्यन्ते, विभावनमेव हि केवलं न तु तत्र सर्पादयः सन्ति विभावनकालेऽपि। सू. भा. ४-१-५. (न तु तत्र रजतमस्ति), १-१-४, (अकस्मात् रजतमिति निश्चितौ शब्दप्रत्ययौ); छां. ६-२-३ (रज्जुरेव सर्प इत्यभिधीयते), सू. भा. १-४-६ (न स्वहिमबुद्धिकाले ....) ॥

3. विपरीतबुद्ध्या योऽध्यासः, तद्बाह्याः। तदसंस्पृष्टाः॥

4. विज्ञानम् इत्यधिकमिति भाति। सर्पादिस्थानीयमिति बाह्यविकल्पस्यैव निर्देशनात् वाक्यशेषे। अथवा इमां क्रियाम् एभिः कारकैः कृत्वा एतत् फलं भोक्ष्ये- इति विज्ञानमन्तःकरणस्थं भ्रान्त्या स्वात्मन्यध्यस्य तद्दुःखमनुभवतीव इति व्याख्येयम्॥

5. सर्वप्राणिशरीरस्थत्वेन विभाव्यमानोऽपीत्यर्थः। गी. भा. १३-३१.

नित्योऽनित्यानां चेतनश्चेतनाना-
मेको बहूनां यो विदधाति कामान् ।
तमात्मस्थं येऽनुपश्यन्ति धीरा-
स्तेषां शान्तिः शाश्वती नेतरेषाम् ॥ १३ ॥

सर्वकारणं परमात्मानमात्मत्वेन पश्यताम् नित्यसुखम् –

८९. किं च स हि परमेश्वरः सर्वगतः स्वतन्त्र एकः । न तत्समोऽप्यधिको[1] वा अन्योऽस्ति । वशी सर्वं हि अस्य जगद् वशे वर्तते । कुतः ? सर्वभूतान्तरात्मा[2] । यतः एकमेव सदेकरसम्[3] आत्मानं विशुद्ध-विज्ञानघनरूपं[4] नामरूपाद्यशुद्धोपाधिभेदवशेन बहुधा अनेकप्रकारेण यः करोति[5] । स्वात्मसत्तामात्रेण[6] । अचिन्त्यशक्तित्वात्[7] । तम् आत्मस्थं स्वशरीरहृदयाकाशे बुद्धौ[8] चैतन्याकारेणाभिव्यक्तम् – इत्येतत् । न हि शरीरस्य आधारत्वमात्मनः[9] । आकाशवदमूर्तत्वात् । आदर्शस्थं मुखम्

---

1. गी. ११-४३, श्वे. ६-८, अत्र तत्समो नास्तीति आत्मानेकत्वं प्रतिषिध्यते ; अधिको नास्तीति चात्मेश्वरभेदः ॥

2. सर्वान्तरस्थाद्धि सर्वं नियमयत्यसौ ॥ बृ. ३-५-१.

3. अत्र सत्त्वं विज्ञानस्वरूपत्वं च नान्योन्यव्यावृत्ते, किं तु ब्रह्मणः स्वरूपभूते एव सू. भा. ३-२-२१ (सत्तैव बोधो, बोध एव च सत्ता ॥)

4. वस्त्वन्तरासंकीर्णविज्ञानरूपम् ॥

5. अविद्याकल्पितमव्याकृतरूपं व्याकुर्वन् स्वात्मानं बहुधा करोतीत्यर्थः । सू. भा. २-१-१४, २-१-२७ (अविद्याकल्पितरूपभेदाभ्युपगमात् ), तै. स्था. २-६. (कथमेकस्य अर्थान्तराननुप्रवेशे बहुत्वम् ?) ॥

6. न स्वात्मव्यापारविशिष्टः सन् ॥

7. अचिन्त्यशक्तित्वमप्यविद्याव्यवहारदृष्ट्या । सू. भा. ४-३-१४. ( अनेकशक्तित्वं ब्रह्मण इति चेत् ) ॥

8. आत्मनि बुद्धौ स्थितम् , अभिव्यक्तम् इत्येवार्थ इति भावः ॥

9. सर्वगतो ह्यात्मा, सर्वकारणं च । मुं. भा. २-२-६. प्र. भा. ६-२. ('इहैवान्तः शरीरे' इत्यस्य व्याख्यानम् )

इति यद्वत्[1] । तमेतम् ईश्वरम् आत्मानं ये निवृत्तबाह्यवृत्तयः अनुपश्यन्ति आचार्यागमोपदेशम् अनु साक्षादनुभवन्ति[2] धीरा विवेकिनः, तेषां परमेश्वरभूतानां[3] शाश्वतं नित्यं सुखम् आत्मानन्दलक्षणं[4] भवति । नेतरेषां बाह्यासक्तबुद्धीनाम्[5] अविवेकिनां स्वात्मभूतमपि । अविद्याव्यवधानात्[6] ॥ १२ ॥

आत्माधीनमेव नित्यत्वं चेतरेषाम् –

९०. किञ्च – नित्यः अविनाशी अनित्यानां[7] विनाशिनाम्[8] । चेतनः चेतनानां चेतयितॄणां ब्रह्मादीनां प्राणिनाम् । अग्निनिमित्तमिव दाहकत्वमनग्नीनाम् उदकादीनाम् आत्मचैतन्यनिमित्तमेव चेतयितृत्वमन्येषाम्[9] । किञ्च–स सर्वज्ञः, सर्वेश्वरः, कामिनां संसारिणां कर्मानुरूपां कामान् कर्मफलानि स्वानुग्रहनिमित्तांश्च[10] कामान् य एको

---

1. अनाधारेऽप्याधारवदुपचारस्य दृष्टान्तोऽयम् ॥

2. अनुभव एव दर्शनम्, न तु विषयीकरणम् ॥

3. 'तेषाम्' इति उपाधिभेददृष्ट्या बहुवचनं न स्वरूपदृष्ट्या । स्वरूपेण हि परमेश्वराद्व्यतिरिक्ता एव हि ते इत्याह – 'परमेश्वरभूतानाम्' इति ॥

4. आत्मस्वरूपभूतानन्दलक्षणं न तु संवेद्यम् ॥ बृ. भा. ३-९-२८-७ (विज्ञानमानन्दं ब्रह्म)

5. मुं. भा. २-२-१०. (न बाह्यप्रत्ययानुसारिणः)

6. बृ. भा. १-४-७ (आत्मनोऽलाभोऽविद्यामात्रव्यवधानम् ) ॥

7. 'नित्यानाम्' इति (वा॥) पाठे नित्यत्वेन व्यवह्रियमाणानाम् इत्यर्थः । तत्र तु अविनाशिनाम् इति पाठः कल्प्यः ॥

8. नित्यविकारिणां शरीररूपाणाम् (१-२-२२) अनित्यानां नित्यः, नित्यत्वापादक इत्यर्थः । आत्मनित्यत्वाध्यासनिमित्तं हि देहादिष्वपि नित्यत्वबुद्धिरविवेकिनाम् इति भावः । गी. भा. १३-२७.

9. एतेन 'चेतनानाम्' इति चेतनत्वेनाऽऽभासमानानामित्यर्थे इत्युक्तं भवति ॥

10. केवलकर्मणः, तत्कार्यस्यापूर्वस्य वा अचेतनत्वात् फलदायकत्वानुपपत्तेरिति भावः ॥ सू. भा. ३-२-३८; गी. भा. ७-२१.

बहूनाम् अनेकेषाम् अनायासेन[1] विदधाति प्रयच्छतीत्येतत् । तम् आत्मस्थं येऽनुपश्यन्ति[2] धीराः, तेषां शान्तिः उपरतिः शाश्वती नित्या स्वात्मभूतेव[3] स्यात् । न इतरेषाम् अनेवंविधानाम् ॥ १३ ॥

### ब्रह्मानन्दः सर्वेषामपि सुवेद्यः

तदेतदिति मन्यन्तेऽ
निर्देश्यं परमं सुखम् ।
कथं नु तद् विजानीयां
किमु भाति विभाति वा ॥ १४ ॥

न तत्र सूर्यो भाति न चन्द्रतारकं
नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदं विभाति ॥ १५ ॥

इति द्वितीयाध्याये द्वितीया वल्ली ।

---

1. प्रतिभूतं प्रतिनियतदेशकालनिमित्तवशतस्तत्तत्क्रियाफलानि तत्तद्देश-कालयोस्तत्तन्निमित्तवशेन भवन्ति । अनन्ताश्च जीवा इत्यतो बहूनां जीवानां कर्मफलानि तत्तत्कर्मानुगुण्येन उक्तप्रकारेण विनैवाऽऽयासमेकेनैव विधीयमानं फलम् अवश्यं तथा विदधतः सर्वज्ञत्वं सर्वशक्तित्वं चाक्षिपति । श्रूयते स्मर्यते च तथाविधफलदातृत्वमीश्वरस्य ॥ कौ· ३-९, गी· ७-२१; सू· भा· ३-२-४१·

2. एवं नित्यशुद्धबुद्धमुक्तं सर्वज्ञं सर्वशक्तिमन्तमात्मत्वेन येऽनुपश्यन्ति इत्यर्थः ॥

3. नित्यसुखवन्नित्यशान्तिरपि सर्वस्याऽऽत्मभूतेवेत्यभिप्रायः ॥

आत्मा स्वयं भाति विभाति चेतररूपेण –

९१. यत् तदात्मविज्ञानसुखम्[1] अनिर्देश्यं[2] निर्देष्टुमशक्यं परमं प्रकृष्टं[3] प्राकृतपुरुषवाङ्मनसयोरगोचरमपि सत् निवृत्तैषणा ये ब्राह्मणाः[4] ते तदेतत् प्रत्यक्षमेव[5] इति मन्यन्ते । कथं नु केन प्रकारेण तत् सुखम् अहं विजानीयाम् 'इदम्' इत्यात्मबुद्धिविषयम् आपादयेयम्[6] यथा निवृत्तैषणा[7] यतयः । किमु तद् भाति दीप्यते, प्रकाशात्मकं तद् यतः[8], अस्मद्बुद्धिगोचरत्वेन विभाति विस्पष्टं दृश्यते[9], किं वा नेति ? ॥

अत्रोत्तरमिदं भाति च विभाति च इति । कथम् ? न तत्र तस्मिन् स्वात्मभूते ब्रह्मणि सर्वावभासकोऽपि सूर्यः भाति । तद् ब्रह्म न प्रकाशयतीत्यर्थः । तथा न चन्द्रतारकम् । नेमा विद्युतो भान्ति । कुतः अयम् अस्मद्दृष्टिगोचरः अग्निः । किं बहुना ? यदिदं आदित्यादिकं भाति तत् तमेव परमेश्वरं भान्तं दीप्यमानम् अनु भाति अनु दीप्यते । यथा जलोल्मुकादि[10] अग्निसंयोगात् अग्निं दहन्तम् अनु दहति न स्वतः,

---

1. आत्मानुभवलक्षणं सुखम् इत्यर्थः ॥

2. शब्दप्रवृत्तिनिमित्तानां जातिद्रव्यगुणादीनामभावात् ॥ गी.भा. १३-१२

3. आत्यन्तिकम् निरतिशयं च । गी. ६-२१, २७.

4. ब्रह्मविदः ॥ 5. स्वानुभवगम्यमेव, न परोक्षम् ॥

6. 'इदम्' इत्यनेन विषयीकरणं विवक्षितमिति न भ्रमितव्यम् । बुद्धेरपि साक्षित्वात् आत्मनः, सुखस्य च तदनन्यत्वात् । मम यन्नित्यतृप्तिकारणं तदात्मसुखमिति स्वानुभवमात्रगम्यम्–इत्येतावदिहोच्यते ॥

7. 'निवृत्तविषयैषणा' इति वा॥

8. चिन्मात्रस्वरूपत्वात् किं स्वयं भाति सूर्यादिवत् ?

9. स्वयंभानत्वेऽपि किमस्मदादीनामपि हीनवीर्याणां विदुषामिव स्पष्टं भाति ? – इति प्रश्नार्थः ॥

10. अत्र दाहकशक्तिवियुक्तस्यैव जलोल्मुकादेर्निदर्शनादवगम्यते, परमार्थदृष्ट्या न किञ्चिदप्यनात्मवस्तु स्वयं स्फुरणवदिति ॥

तद्वत् । तस्यैव भासा दीप्त्या सर्वमिदं सूर्यादि[1] विभाति । यत एवं तदेव ब्रह्म भाति च विभाति च कार्यगतेन विविधेन भासा । (अतः)[2] तस्य ब्रह्मणो भारूपत्वं स्वतोऽवगम्यते[3] । न हि स्वतोऽविद्यमानं भासनमन्यस्य कर्तुं शक्यम् । घटादीनाम् अन्यावभासकत्वादर्शनात्, भारूपाणां[4] चादित्यादीनां तद्दर्शनात् ॥ १५ ॥

इति श्रीशङ्करभगवतः कृतौ काठकोपनिषद्द्वितीयाध्याये द्वितीयवल्लीभाष्यम् ॥

1. सूर्यादीति । न प्रकाशमानमेव केवलम्, यावत् सर्वमेवेदं नामरूप-क्रियाकारकफलजातं ब्रह्मज्योतिःसत्तानिमित्तमेवाभिव्यज्यते । 'सर्वमिदम्' इत्यविशेषश्रुतेरित्यभिप्रायः (सू. भा. १-३-२२) । सूर्याद्युल्लेखस्तु तेषामपि स्वयंस्फुरत्ता नास्ति किमु घटादीनामित्यभिप्रायेण ॥

2. 'अतः' इत्यधिकावापः कृतोऽस्माभिः ॥

3. एतच्च लौकिकबुद्धिमनुसृत्य अनुमानस्थाने उक्तम् । विदुषां तु तदेतदित्यनुभवगम्यमित्युक्तम् ॥

4. व्यावहारिकदृष्ट्या इति शेषः ॥

# द्वितीयाध्याये – तृतीया वल्ली

**षष्ठवल्लीसंबन्धः –**

९२. तूलावधारणेनैव मूलावधारणं वृक्षस्य क्रियते लोके यथा, एवं संसारकार्यवृक्षावधारणेन तन्मूलस्य ब्रह्मणः स्वरूपावदिधारयिषया[1] इयं षष्ठी वल्ली आरभ्यते ॥

**जगतः परमकारणं ब्रह्म**

ऊर्ध्वमूलोऽवाक्शाख
एषोऽश्वत्थः सनातनः ।
तदेव शुक्रं तद् ब्रह्म
तदेवामृतमुच्यते ॥
तस्मिँल्लोकाः श्रिताः सर्वे
तदु नात्येति कश्चन । एतद् वै तत् ॥ १ ॥

**संसारवृक्षरूपकम् –**

९३. ऊर्ध्वमूलः ऊर्ध्वं मूलं यत् तद् विष्णोः परमं पदम् अस्य इति सोऽयम् अव्यक्तादिस्थावरान्तः[2] संसारवृक्षः ऊर्ध्वमूलः । वृक्षश्च

---

1. वृक्षतूलदर्शनेनादृष्टमपि वृक्षमूलमस्तीति यथावधार्यते, तद्वद् ब्रह्मास्तित्वावधारणाय – इति केचित् । तन्न । 'स्वरूपावदिधारयिषया' इति भाष्याक्षराननुरूपत्वात् । अस्य संसारवृक्षस्य यन्मूलं तदेतदपेक्षया सूक्ष्मम्, नित्यम्, महच्चेति स्वरूपनिर्धारणार्थमित्येव युक्तं व्याख्यातुम् । तदेव शुक्रं तद् ब्रह्म इति वाक्यशेषश्चैवं संगच्छते ॥ गी. भा. १५-१.

2. व्याकृताव्याकृतसंसारविलक्षणत्वं ब्रह्मण इति सूचयति अव्यक्तादीति ॥ गी. भा. १५-१८.

व्रश्चनात्[1] विनश्वरत्वात् । अविच्छिन्नजन्मजरामरणशोकाद्यनेकानर्थात्मकः[2] । प्रतिक्षणमन्यथास्वभावः, मायामरीच्युदकगन्धर्वनगरादिवद्दृष्टनष्टस्वरूपत्वात्[3] ; अवसाने च वृक्षवदभावात्मकः[4], कदलीस्तम्भवन्निस्सारः, अनेकशतपाषण्डबुद्धिविकल्पास्पदः[5], तत्त्वविजिज्ञासुभिरनिर्धारितेदंतत्त्वः, वेदान्तनिर्धारितपरब्रह्ममूलसारः, अविद्याकामकर्माव्यक्तबीजप्रभवः[6] अपरब्रह्मविज्ञानक्रियाशक्तिद्वयात्मकहिरण्यगर्भाङ्कुरः[7] सर्वप्राणिलिङ्गभेदस्कन्धः[8], तत्तत्तृष्णाजलासेकोद्भूतदर्पः, बुद्धीन्द्रियविषयप्रवालाङ्कुरः[9], श्रुतिस्मृतिन्यायविद्योपदेशपलाशः[10], यज्ञदानतपआद्यनेकक्रियासुपुष्पः, सुखदुःखवेदनानेकरसप्राण्युपजीव्यानन्तफलः, तत्तृष्णासलिलावसेकप्ररूढजटिलीकृत[11]दृढबद्धमूलः, सत्यनामादिसप्तलोकब्रह्मादिभूतपक्षिकृतनीडः, प्राणिसुखदुःखोद्भूतहर्ष-

---

1. ओव्रश्चू छेदने इति धातोः सप्रत्ययान्तस्य रूपं वृक्ष इति भावः । ' विनश्वरत्वात् अविच्छिन्न ' इति च नास्ति आ॥ ; वा॥ पाठस्त्वयम् ॥

2. नित्यनिरस्तसर्वानर्थमस्य मूलम् । तस्मिन्नेषोऽनर्थः कल्पित इति भावः ॥

3. कूटस्थनित्ये नित्याव्यभिचरत्स्वरूपे विकल्पितोऽयमिति सूचनार्थं विशेषणद्वयम् ॥

4. स्वेन मायिकरूपेण, अवसाने सर्वविकल्पास्पदे ब्रह्मणि ज्ञाते सति, अभावात्मकः ; परमार्थतस्तु इदानीमपि सर्वभावाभावविलक्षणब्रह्मस्वरूप इत्यर्थः । एवमुत्तरत्र ' निःसारः ' इत्यपि विशेषणं बोध्यम् ॥

5. अस्ति नास्ति, नित्योऽनित्य इत्यादिविकल्पाश्रयः संसारः । अत एव तार्किकबुद्धिविचालितान्तःकरणैर्जिज्ञासुभिरनिर्धार्यसतत्त्वः, वेदान्तार्थसुनिश्चयेन तु ब्रह्मैवेदमिति सुनिर्धारण इत्यनन्तरविशेषणद्वयाभिप्रायः ॥

6. अविद्याक्षेत्रे कामोत्कर्मबीजं यदव्यक्तरूपेण स्थितं प्राङ्नामरूपव्याकरणात् तादृशाव्यक्तबीजं प्रभवः कारणमस्येति तथोक्तः ॥ बृ. भा. १-४-७ अथवा अविद्याकामकर्मणां यदव्यक्तरूपम् , तदेव बीजं प्रभवो यस्य ॥

7. अव्यक्तबीजाज्जायमानो हिरण्यगर्भोऽङ्कुरः । हिरण्यगर्भ इति तदुपाधिभूतं महत्तत्त्वमुच्यते । तच्चापरब्रह्मणो ज्ञानक्रियाशक्तिद्वयाधिष्ठितम् । मुं. भा. १-१-८ (प्राणपदव्याख्या) ॥ 8. लिङ्गभेदाः सूक्ष्मशरीरविशेषाः ॥

9. प्रवालानि किसलयानि ॥ 10. पलाशानि पत्राणि ॥

11. 'जडीकृत' इति आ॥ पाठः ॥

शोकजातनृत्यगीतवादित्रक्ष्वेलितास्फोटित[1] हसिताकुष्ट[2] रुदित 'हा हा! मुञ्च मुञ्च!' इत्याद्यनेकशब्दकृततुमुलीभूतमहारवः, वेदान्तविहितब्रह्मात्मदर्शनासङ्गशस्त्र[3] कृतोच्छेदः एष संसारवृक्षः, अश्वत्थः अश्वत्थवत् कामकर्मवातेरितनित्यप्रचलितस्वभावः[4], स्वर्गनरकतिर्यक्प्रेतादिभिः शाखाभिरवाक्शाखः, अवाञ्चः शाखा यस्य सः। सनातनः, अनादित्वात्[5] चिरं प्रवृत्तः॥

**संसारमूलस्य ब्रह्मणः स्वरूपम् –**

९४. यदस्य संसारवृक्षस्य मूलं तदेव शुक्रं शुभ्रं शुद्धं ज्योतिष्मत् चैतन्यात्मज्योतिःसभावम्। तदेव ब्रह्म। सर्वमहत्त्वात्। तदेव अमृतम् अविनाशस्वभावम् उच्यते कथ्यते[6]। सत्यत्वात्। वाचारम्भणं विकारो नामधेयं अनृतमन्यत्; अतो मर्त्यम्[7]। तस्मिन् परमार्थसत्ये ब्रह्मणि लोकाः गन्धर्वनगरमरीच्युदकमायासमाः परमार्थदर्शनाभावावगमनाः श्रिताः आश्रिताः, सर्वे समस्ता, उत्पत्तिस्थितिलयेषु। तदु तद् ब्रह्म नात्येति नातिवर्तते[8] मृदादिकमिव घटादिकार्यं कश्चन कश्चिदपि विकारः। एतद्वै तत्॥ १॥

---

1. क्ष्वेलनम् क्रीडार्थमाक्रमणम्, आस्फोटः – भुजाबन्धः॥
2. आकुष्टम् – आक्रोशः, आकृष्टम् इति पाठे आकर्षणम् इत्यर्थः॥
3. ब्रह्मात्मदर्शननान्तरीयकं यदेषणात्रयाद् व्युत्थानम्, तदेवासङ्गशस्त्रम् गी. भा. १५-३.
4. न श्वोऽपि स्थाता इत्यवयवार्थसूचनमिदम्॥ गी. भा. १५-१.
5. व्यावहारिकमनादित्वं मिथ्यासंसारस्य। सू. भा. २-१-३६, गी. भा. १५-३.
6. एवं नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्म इति स्वरूपनिर्धारणं कृतं भवति। न ह्यनेवंविधं यथोपवर्णितस्य संसारवृक्षस्य मूलमिति संभाव्यते॥
7. यत् सत्यं तत् कदाचिदपि स्वरूपं न व्यभिचरति, अनृतं तु व्यभिचरति बाधदशायाम् इति मर्त्यम्। विकारत्वं च जगतोऽध्यारोपितत्वमिति वाचारम्भणश्रुत्या (छां. ६-४-१....) गम्यत इति भावः॥
8. सर्वदा तदात्मतां न जहातीत्यर्थः। तै. भा. २-१, सू. भा. २-१-१४.

## जगन्नियन्तृ ब्रह्म

**यदिदं किञ्च जगत्सर्वं**
**प्राण एजति निस्सृतम् ।**
**महद् भयं वज्रमुद्यतं**
**य एतद्विदुरमृतास्ते भवन्ति ॥ २ ॥**

सर्वप्रवृत्तिहेतुभूतं ब्रह्म –

९५. यद्विज्ञानादमृता भवन्तीत्युच्यते जगतो मूलं, तदेव नास्ति ब्रह्म । असत एवेदं निःसृतमिति[1] । तन्न । यदिदं किञ्च यत् किञ्चेदं जगत् सर्वं प्राणे परस्मिन् ब्रह्मणि[2] सति एजति कम्पते तत एव निःसृतं निर्गतं सत् प्रचलति नियमेन चेष्टते । यदेवं जगदुत्पत्त्यादिकारणं[3] ब्रह्म तत् महद् भयम् । महच्च तत् भयं च बिभेत्यस्मादिति महद् भयम् । वज्रमुद्यतम् उद्यतमिव वज्रम् । यथा वज्रोद्यतकरं स्वामिनम् अभिमुखीभूतं दृष्ट्वा भृत्या नियमेन तच्छासने वर्तन्ते, तथा इदं चन्द्रादित्यग्रहनक्षत्रतारादिलक्षणं जगत् सेश्वरं नियमेन क्षणमपि अविश्रान्तं वर्तते[4] इत्युक्तं भवति । ये एतद् विदुः स्वात्मप्रवृत्तिसाक्षिभूतम्[5] एकं ब्रह्म, अमृताः अमरणधर्माणः, ते भवन्ति ॥ २ ॥

---

1. नायमभिप्रायो जगतः असदेवैकं कारणमिति, असतः पदार्थस्यानङ्गीकारात् असद्वादिभिः । नास्ति किञ्चित् सद्रूपं कारणमित्येव तु विवक्षितम् ॥ छां. ६-२-१.

2. प्राणशब्दशब्दितमिह ब्रह्मैव भयहेतुत्वादिति निर्णीतम् वे.सू. १-३-३९ भाष्ये ॥

3. 'निःसृतम्' इत्युत्पत्तिकारणत्वम् 'एजति' इति स्थितिप्रवृत्तिकारणत्वं च यस्योक्तम् इत्यर्थः । गी. भा. १८-४६ ; आदिशब्देन प्रलयोऽपि गृहीतः ॥

4. सर्वप्रवृत्तिकारणं ब्रह्मेत्यर्थः ॥ बृ. भा. ३-८-९, गी. भा. १०-८.

5. यदेतद् ब्रह्म जगत्कारणत्वेनोक्तं सर्वप्रवृत्तिकारणत्वेन च, तदेव स्वकार्यकरणसंघातप्रवृत्तिसाक्षिभूतम् – इति ये विदुरिति संबन्धः । बृ. भा. ४ ३-६ (आत्मनैवायं ज्योतिषा) ॥

भयादस्याग्निस्तपति
भयात् तपति सूर्यः ।
भयादिन्द्रश्च वायुश्च
मृत्युर्धावति पञ्चमः ॥ ३ ॥

ब्रह्मणो भयहेतुत्वम् –

९६. कथं तद्भयाज्जगद्वर्तत इति ? आह –

भयात् भीत्या अस्य परमेश्वरस्य अग्निः तपति । भयात् तपति सूर्यः । भयादिन्द्रश्च वायुश्च । मृत्युर्धावति पञ्चमः । न हि, ईश्वराणां लोकपालानां समर्थानां सतां नियन्ता चेद् वज्रोद्यतकरवन्न स्यात्, स्वामिभयभीतानामिव भृत्यानां नियता प्रवृत्तिरुपपद्यते[1] ॥ ३ ॥

ब्रह्म चेहैव लोके विज्ञातव्यम्

इह चेदशकद् बोद्धुं
प्राक् शरीरस्य विस्रसः ।
ततः सर्गेषु लोकेषु
शरीरत्वाय कल्पते ॥ ४ ॥

ब्रह्म चेदिहैव न ज्ञातम्, ततो जन्मान्तरकारणं भवति –

९७. तच्च इह जीवन्नेव, चेद् यदि, अशकत् शक्नोति[2]। शक्तः सन् जानातीत्येतत् । भयकारणं ब्रह्म बोद्धुम् अवगन्तुम्, प्राक् पूर्वं शरीरस्य विस्रसः अवस्रंसनात्, पतनात् । संसारबन्धनाद् विमुच्यते[3] ।

---

1. यावद् ब्रह्म स्वप्रत्यगात्मत्वेन न विदन्ति, तावद् भीताः प्रवर्तन्त इति युक्तमिति भावः । तै. भा. २-७ (अथ तस्य भयं भवति) ॥

2. 'शक्नोति' इति नास्ति वा॥

3. इति वाक्यशेषो द्रष्टव्यः । न चेदशकद् बोद्धुम् इति समनन्तरोत्तर-वाक्यात् प्राक् । द्रष्टव्यं समानार्थकं वाक्यं श्रुत्यन्तरे के. २-५, बृ ४-४-१४.

न चेदशकद् बोद्धुं ततः अनवबोधात्, सर्गेषु—सृज्यन्ते येषु स्रष्टव्याः प्राणिन इति सर्गाः, पृथिव्यादयो लोकाः; तेषु सर्गेषु—लोकेषु शरीरत्वाय शरीरभावाय कल्पते समर्थो भवति। शरीरं गृह्णातीत्यर्थः। तस्मात्, शरीरविस्रंसनात् प्राक् आत्मावबोधाय यत्न आस्थेयः[1] ॥ ४ ॥

## यथाऽऽदर्शे तथाऽऽत्मनि
## यथा स्वप्ने तथा पितृलोके।
## यथाप्सु परीव ददृशे
## तथा गन्धर्वलोके च्छायातपयोरिव ब्रह्मलोके ॥

**इहलोके एव ब्रह्मणो स्फुटदर्शनम् –**

९८. यस्मादिहैवाऽऽत्मनो दर्शनम् आदर्शस्थस्येव मुखस्य स्पष्टमुपपद्यते[2]। न लोकान्तरेषु ब्रह्मलोकादन्यत्र। स च दुष्प्रापः। कथमिति[3]? उच्यते –

यथा आदर्शे प्रतिबिम्बभूतम् आत्मानं पश्यति लोकः, अत्यन्तविविक्तम्, तथा इह आत्मनि स्वबुद्धौ आदर्शवन्निर्मलीभूतायां[4] विविक्तमात्मनो दर्शनं भवतीत्यर्थः। यथा स्वप्ने, अविविक्तं जाग्रद्वासनोद्भूतम्[5]

---

1. एतद्वाक्यं मध्यमणिन्यायेन इह चेदशकद् बोद्धुं ततो विमुक्तः स्यात्, तस्मादिहैवावबोद्धव्य आत्मा इति संबध्यते। 'यस्मात् इहैवात्मदर्शनं स्पष्टमुपपद्यते' इत्यनेनाप्युत्तरावतरणिकावाक्येन। अत एव 'स च दुष्प्रापः' इत्येदन्तमिहैवासञ्जितो वा॥ पाठे॥

2. उपलभ्यते इति क्वचित्कपाठोऽनुपपन्नः॥

3. 'इहैव स्पष्टमुपपद्यत इति कथम्?' – इति प्रश्नः॥

4. निर्मलायाम् इत्युपलक्षणार्थम्, सूक्ष्मीकृतायाम् इत्यपि द्रष्टव्यम्। गी. भा. १८–५० (कथं तर्ह्यात्मनो ज्ञानम्?)

5. वासनानिर्मितकार्यकरणतादात्म्याभिनिवेशात्, मिथ्योपभोगासक्त्वाच्चेति भावः॥

तथा पितृलोके अविविक्तमेव दर्शनमात्मनः । कर्मफलोपभोगासक्तत्वात् । यथा चाप्सु अविविक्तावयवम् आत्मरूपं परीव दृश्यते परिदृश्यत इव[1], तथा गन्धर्वलोकेऽविविक्तमेव दर्शनम् आत्मनः[2]। एवं लोकान्तरेष्वपि इति शास्त्रप्रामाण्यादवगम्यते[3] । छायातपयोरिव अत्यन्तविविक्तं ब्रह्मलोक एवैकस्मिन् । स च दुष्प्रापः । अत्यन्तविशिष्टकर्मज्ञानसाध्यत्वात्[4] । तस्मात्, आत्मदर्शनाय इहैव यत्नः कर्तव्य इत्यभिप्रायः ॥ ५ ॥

### ब्रह्म प्रत्यगात्मत्वेनैव बोद्धव्यम्

**इन्द्रियाणां पृथग्भाव-**
**मुदयास्तमयौ च यत् ।**
**पृथगुत्पद्यमानानां**
**मत्वा धीरो न शोचति ॥ ६ ॥**

**आगमापायिनामिन्द्रियाणां सर्वेषामपि साक्षी प्रत्यगात्मा –**

९९. कथमसौ बोद्धव्यः ? किं वा तदवबोधे प्रयोजनमिति ? उच्यते –

---

1. विलुलितत्वाज्जलस्येति भावः ॥

2. विविधभोगासक्तिविक्षिप्तत्वादेवेति भावः । पितृलोकापेक्षयापि सूक्ष्मतरा भोगा इहेति विशेषः ॥

3. पितृलोकगन्धर्वलोकयोरुपलक्षणार्थमिह ग्रहणम् । न क्वचिदपि लोकान्तरे विविक्ततया आत्मदर्शनमित्येवात्र श्रुतितात्पर्यमवसेयम् । 'इह चेदशकद् बोद्धुम् ' इति शास्त्रप्रामाण्यात् , श्रुत्यन्तरे चैवमेवेह लोके वेदितव्यतया ब्रह्मोपदिश्य तथा ज्ञानमसंपादयतः संसारानर्थदोषसंकीर्तनाच्चेत्यर्थः ॥

4. विशिष्टकर्मोपासनासमुच्चयानुष्ठानलभ्यो हि प्राजापत्यो लोकः तथा हि दर्शितमग्निविद्याग्रन्थसंदर्भेणेति ॥

इन्द्रियाणां श्रोत्रादीनां स्वस्वविषयग्रहणप्रयोजनेन स्वकारणेभ्य आकाशादिभ्यः पृथगुत्पद्यमानानाम्[1], अत्यन्तविशुद्धात् केवलात्, चिन्मात्रस्वरूपात्, पृथग्भावं स्वभावविलक्षणात्मकताम्। तथा तेषामेवेन्द्रियाणाम् उदयास्तमयौ च उत्पत्तिप्रलयौ जाग्रत्स्वप्नावस्थापेक्षया[2] नात्मनः[3] – इति मत्वा ज्ञात्वा विवेकतो धीरः धीमान् न शोचति। आत्मनो नित्यैकस्वभावस्य[4] अव्यभिचारात्[5], शोककारणत्वानुपपत्तेः[6]। तथा च श्रुत्यन्तरम् 'तरति शोकमात्मवित्' (छां. ७–१–३) इति ॥ ६ ॥

इन्द्रियेभ्यः परं मनो
मनसः सत्त्वमुत्तमम्।
सत्त्वादपि महानात्मा
महतोऽव्यक्तमुत्तमम् ॥ ७ ॥

1. इन्द्रियाणां भौतिकत्वं श्रुत्यन्तरे (छां. ६–५–३)। भूतानामेव हि स्वात्मग्राहकत्वेन संस्थानान्तरं करणं नाम (बृ. २–४–११) ॥

2. 'जाग्रत्स्वप्नावस्थाप्रतिपत्त्या' इति वा॥; उभयथापि जाग्रत्प्राप्त्या उत्पत्तिः, स्वापावस्थाप्राप्त्या प्रलयः इत्यर्थः। विशेषतः सुषुप्तौ इन्द्रियाणां सविषयाणां च परमात्मनि प्रलयो भवति। प्र. भा. ४–७, ८; छां. भा. ६–८–१, ८–६–३.

3. नात्मन उत्पत्तिप्रलयौ ॥

4. 'स्वभावस्याव्यभिचारात्' इति वा॥

5. चैतन्यैकस्वरूपेणावस्थानम्, पर्यायेणावस्थात्रयप्रतिपत्तेः, सोऽहमिति प्रतिसंधानात्, इन्द्रियोत्पत्तिप्रलयावभासनाच्च। गौ. का. भा. १–१; बृ. भा. ४–३–२१.

6. इष्टं हि प्राप्तं वियुक्तं वोद्दिश्य चिन्तयानस्तद्गुणान् शोचति। बृ. भा. ४–३–२२ ('सर्वान् शोकान्')। न तु तदुभयमस्त्यात्मनः। कूटस्थनित्यत्वात् – इत्यभिप्रायः ॥

अव्यक्तात् तु परः पुरुषो
व्यापकोऽलिङ्ग एव च ।
यं ज्ञात्वा मुच्यते जन्तु-
रमृतत्वं च गच्छति ॥ ८ ॥

**आत्मनः सर्वप्रत्यक्त्वं ज्ञात्वा मुक्तिः –**

१००. यस्मादात्मन इन्द्रियाणां पृथग्भाव उक्तः, नासौ बहिरधिगन्तव्यः, यस्मात् प्रत्यगात्मा स सर्वस्य । तत् कथमिति ? उच्यते –

'इन्द्रियेभ्यः परं मनः' इत्यादि । अर्थानाम् इह इन्द्रियसमानजातीयत्वात् इन्द्रियग्रहणेनैव ग्रहणम् । पूर्ववदन्यत्[1] । सत्त्वशब्दाद् बुद्धिरिहोच्यते[2] ॥ ७ ॥

अव्यक्तात्तु परः पुरुषः व्यापकः । व्यापकस्याप्याकाशादेः सर्वस्य कारणत्वात् । अलिङ्गः–लिङ्ग्यते गम्यते येन तल्लिङ्गम्, बुद्ध्यादि ; तदविद्यमानम् अस्य सोऽयम् अलिङ्ग[3]–एव च । सर्वसंसारधर्मवर्जित

1. इन्द्रियेभ्यः परा ह्यर्थाः (१-३-१०) तदिह इन्द्रियसारत्वादेवार्थानां न पृथग्ग्रहणम् । 'अर्थेभ्यश्च परं मनः' इत्यपि 'इन्द्रियेभ्यः परं मनः' इत्यनेनैव गतम् । उक्तन्यायात् । मनसस्तु परा बुद्धिरित्येतत् 'मनसः सत्त्वमुत्तमम्' इतीहोच्यते । 'सत्त्वादपि महानात्मा' इति 'बुद्धेरात्मा महान् परः' इतिवद् हैरण्यगर्भतत्त्वपरत्वेन व्याख्येयम् । 'महतोऽव्यक्तमुत्तमम्' इति च 'महतः परमव्यक्तम्' (१-३-११) इत्यनेन समानार्थम्, अव्याकृतपरत्वेन व्याख्येयम् इत्यभिप्रायः ॥ 2. 'उच्यते' इति नास्ति क॥

3. यो हि बोद्धा, मन्ता, श्रोता, द्रष्टा च स एवात्मा इति बुद्ध्यादिलिङ्गेन आत्मा अनुमीयते । धूमादिलिङ्गेन वह्न्यादिवत्–इति केचित् । तन्न । बुद्ध्यादीनां बोद्धव्यादिविषयत्वात् बोद्धृविषयत्वानुपपत्तेः । अनुमित्सोः स्वरूपत्वादेवानुमेयत्वानुपपत्तेश्चात्मनः । तस्मादलिङ्ग आत्मा इत्यर्थः । ऐ. भा. (प्रथमाध्यायोपसंहारभाष्यम्, 'श्रवणादिलिङ्गेनापि कथं जायते ?') ; गी. भा. १३-२ (अनुमानेन चेज्जानासि, कथं संबन्धग्रहणम् ?) ; सू. भा. २-१-६ (लिङ्गाद्यभावाच्च नानुमानादीनाम्) ॥

इत्येतत्[1]। यं ज्ञात्वा आचार्यतः, शास्त्रतश्च[2] मुच्यते जन्तुः, अविद्यादिहृदयग्रन्थिभिः, जीवन्नेव। पतितेऽपि शरीरे अमृतत्वं च गच्छति[3]। सोऽलिङ्गः परोऽव्यक्तात् पुरुषः इति पूर्वेणैव संबन्धः ॥

### ज्ञानसाधनं योगः

न संदृशे तिष्ठति रूपमस्य
　न चक्षुषा पश्यति कश्चनैनम्।
हृदा मनीषा मनसाभिक्लृप्तो
　य एतद्विदुरमृतास्ते भवन्ति ॥ ९ ॥

अविकल्पयितृबुद्ध्यैव शक्यदर्शन आत्मा –

१०१. कथं तर्हि तस्य अलिङ्गस्य दर्शनमुपपद्यत इति? उच्यते –

न संदृशे संदर्शनविषये न तिष्ठति प्रत्यगात्मनोऽस्य रूपम्। अतः न चक्षुषा सर्वेन्द्रियेण। चक्षुर्ग्रहणस्य उपलक्षणार्थत्वात्[4]। पश्यति नोपलभते कश्चन कश्चिदपि, एनं प्रकृतमात्मानम्। कथं तर्हि तं पश्येदिति? उच्यते। हृदा हृत्स्थया बुद्ध्या मनीषा – मनसः सङ्कल्पादिरूपस्य ईष्टे

---

1. अव्यक्तान्तात् सर्वस्मादपि परत्वात्, तद्विलक्षणत्वात् सर्वसंसारधर्मवर्जितः–इत्यभिप्रायः ॥

2. शास्त्राचार्योपदेशादिसंस्कृतमनसैव हि सोऽधिगम्यः। गी॰भा॰ २-२१॰

3. अविद्याकामकर्मविनाश एव परममुक्तिर्जीवत एव (मुं॰ भा॰ २-२-९); पतिते तु देहे तदनन्तरं शरीरान्तरग्रहणाभावादमृतत्वप्राप्तिरुपचर्यत इत्युक्तम् (२-२-१) टि॰ 9 ॥

4. अस्य रूपं न विद्यते यस्मात्, अतश्चक्षुषा कश्चनैनं न पश्येत् – इत्युक्तन्यायः श्रोत्राद्यगम्यत्वेऽपि समानः शब्दादिरहितत्वादात्मन इत्यभिप्रायः (१-३-१५) ॥

नियन्तृत्वेन इति मनीट् । तथा मनीषा – अविकल्पयित्र्या[1] । मनसा मननरूपेण[2] सम्यग्दर्शनेन । अभिक्लृप्तः अभिसमर्थितः । अभिप्रकाशित इत्येतत् । 'आत्मा ज्ञातुं शक्यते' इति वाक्यशेषः । तम् आत्मानं ब्रह्म एतद् ये विदुः[3] अमृतास्ते भवन्ति ॥ ९ ॥

**यदा पञ्चावतिष्ठन्ते**
**ज्ञानानि मनसा सह ।**
**बुद्धिश्च न विचेष्टति**
**तामाहुः परमां गतिम् ॥ १० ॥**

हृन्मनीड्बुद्धिप्राप्तिः कथं भवति ? –

१०२. सा हृन्मनीट् कथं प्राप्यत[4] इति ? तदर्थो योग उच्यते –

यदा यस्मिन् काले स्वविषयेभ्यो निवर्तितानि आत्मन्येव पञ्च ज्ञानानि – ज्ञानार्थत्वात् श्रोत्रादीनीन्द्रियाणि ज्ञानान्युच्यन्ते[5] – अवतिष्ठन्ते

---

1. 'विकल्पवर्जितया बुद्ध्या' इति वा॥ कामसंकल्पविचिकित्सादि (बृ. १-५-३)रूपेण विकल्पनमकुर्वत्या । विषयनिमित्तसर्वविकल्पाभावे हि बुद्धिरविकल्पेनात्मरूपेणैवावतिष्ठते ॥ गौ. का. ३-३२.

2. 'मननेन विचाररूपेण प्रथमं संभावितः' इति केचित् । तन्न ; सम्यग्दर्शनरूपेणेति वाक्यशेषासाङ्गत्यात् । मनीषा बुद्ध्या मननेन सम्यग्दर्शनरूपेण अभिप्रकाशितः – इति योजना । निर्विकल्पकबुद्ध्यैवात्मानन्यत्वमापन्नया स्वानुभवैकगम्यः इत्यर्थः । 'मनु अवबोधने' इत्यस्माद्विष्पन्नोऽयं मननशब्दः । बृ. भा. ३-५-१. (मननान्मुनिः), गौ. का. भा. १-२९ ('स मुनिः') ॥

3. प्रत्यगात्माभिन्नं ब्रह्म ये विदुः - इत्यर्थः ॥

4. हृदा मनीषा आत्माभिप्रकाश्यत इत्युक्तम् । सैव मनीट् बुद्धिः कथं प्रापणीया साधकैः इति प्रश्नः ॥

5. अतो ज्ञानकरणानीत्येवार्थ इति भावः ॥

सह मनसा, यदनुगतानि तेन सङ्कल्पादिव्यापृतेनान्तःकरणेन । बुद्धिश्च अध्यवसायलक्षणा न विचेष्टति स्वव्यापारेषु न विचेष्टते न व्याप्रियते[1], तामाहुः परमां गतिम् ॥ १० ॥

**तां योगमिति मन्यन्ते**
**स्थिरामिन्द्रियधारणाम् ।**
**अप्रमत्तस्तदा भवति**
**योगो हि प्रभवाप्ययौ ॥ ११ ॥**

योगावस्थानिरूपणम् –

१०२. ताम् ईदृशीम् अवस्थां योगमिति मन्यन्ते वियोगमेव सन्तम् । सर्वानर्थसंयोगवियोगलक्षणा हीयमवस्था योगिनः[2] । एतस्यां हि अवस्थायाम् अविद्याध्यारोपणवर्जितस्वरूपप्रतिष्ठ आत्मा[3] । स्थिराम् इन्द्रियधारणाम् । स्थिराम् अचलाम् इन्द्रियधारणाम् । बाह्यान्तःकरणानां धारणाम् इत्यर्थः[4] । अप्रमत्तः प्रमादवर्जितः समाधानं प्रति नित्यं

---

1. यदैव सर्वेन्द्रियव्यापारोपरमः, मनोबुद्धिव्यापारोपरमश्च ; तदैव बुद्धेः परमा गतिः, इन्मनोसाक्षित्वमात्मस्थितिरिति ज्ञेयमित्यर्थः । तदा हि बुद्धिः स्वं मायामयं रूपं हित्वा 'सा परा गतिः' (१-३-११) इत्युक्तपरमपुरुषरूपेणैव अवतिष्ठते । इदमेव शान्तात्मनि नियमनं नाम (१-३-१३) ॥ गी. भा. ६-२५.

2. अतो वियोगमेव सन्तमिममात्मावस्थाविशेषं योगमिति विपरीतलक्षणया मन्यन्ते इति संबन्धः ॥ गी. भा. ६-२३.

3. यद्यपि सुषुप्तावपि स्वरूपप्रतिष्ठ एवाऽऽत्मा (बृ. भा. ४-३-२१), तथापि सुषुप्त्यन्तानां न आत्यन्तिकः प्रलयो भवति । बीजभावावशेषात् (गौ. का. भा. ३-३५) । न हि स बुद्धिपूर्वकः प्रलयः (बृ. भा. २-४-१२), इहपुनर्बुद्धिपूर्वकत्वादात्यन्तिकः इति विशेषः ॥

4. न केवलं निर्व्यापारत्वापादनेन धारणा विवक्षितात्र । तथा हि न स्वरूपप्रतिष्ठा स्यात् । किं तु सर्वथा नियमनेनात्मरूपतापादनमेव । गी. भा. ६-२६; गौ. का. ३-४२ प्रभृति ३-४६ पर्यन्तं भाष्यम् ॥

यत्नवान् तदा तस्मिन् काले । यदैव प्रवृत्तयोगो भवति इति सामर्थ्यादव-गम्यते । न हि बुद्ध्यादिचेष्टाभावे प्रमादसंभवोऽस्ति[1] । तस्मात् प्रागेव बुद्ध्यादिचेष्टोपरमात्, अप्रमादो विधीयते[2] । अथवा यदैव इन्द्रियाणां स्थिरा धारणा तदानीमेव निरङ्कुशम् अप्रमत्तत्वम् इत्यतोऽभिधीयते 'अप्रमत्तस्तदा भवति[3]' इति । कुतः[4] ? योगो हि यस्मात् प्रभवाप्ययौ । उपजनापायधर्मक इत्यर्थः । अतोऽपायपरिहाराय, अप्रमादः कर्तव्य इत्यभिप्रायः ॥ ११ ॥

ब्रह्मज्ञानं तत्फलं च

नैव वाचा न मनसा
प्राप्तुं शक्यो न चक्षुषा ।
अस्तीति ब्रुवतोऽन्यत्र
कथं तदुपलभ्यते ॥ १२ ॥

अस्तीत्येवोपलब्धव्य-
स्तत्त्वभावेन चोभयोः ।
अस्तीत्येवोपलब्धस्य
तत्त्वभावः प्रसीदति ॥ १३ ॥

---

1. प्रमादो हि नाम बुद्धिधर्म इति ॥

2. 'तदा अप्रमत्तो भवति' इत्यक्षरार्थस्वीकारेऽप्राप्तनिषेद्धी श्रुतिरित्या-पद्येतेत्यतः, योगावस्थानिष्पत्तेः प्रागेवाप्रमादो विधीयते इति कल्पनीयम् 'भवति' इति वर्तमानापदेशश्रुतिसद्भावेऽपि 'खादिरो यूपो भवति' इत्यादिस्थले इवेत्यर्थः ॥

3. यावत् न स्थिरा धारणा, तावन्नाप्रमाद इत्यर्थः । अस्मिन् पक्षे भवतीति यद्यपि वस्तुस्वभावकथनम्, तथाप्यर्थात् यावद्योगफलप्राप्ति प्रयत्नः करणीयोऽप्रमादे - इति लभ्यते ॥

4. अप्रमादे प्रयत्नः करणीय इत्येतत् कुतः ?

आत्मास्तित्ववादिन्येव तत्त्वोपलब्धिः –

१०४. बुद्ध्यादिचेष्टाविषयं चेद् ब्रह्म, 'इदं तत्' इति विशेषतो गृह्येत । बुद्ध्याद्युपरमे च ग्रहणकारणाभावात्[1] अनुपलभ्यमानं नास्त्येव ब्रह्म[2] । यद्धि करणगोचरं तदस्तीति प्रसिद्धं लोके विपरीतं चासदिति । अतश्च, अनर्थको योगः[3] । अनुपलभ्यमानत्वाद् वा नास्तीत्युपलब्धव्यं ब्रह्म–इत्येवं प्राप्ते इदमुच्यते –

सत्यम्, नैव वाचा न मनसा, न चक्षुषा, नान्यैरपि इन्द्रियैः प्राप्तुं शक्यते इत्यर्थः[4] । तथापि सर्वविशेषरहितोऽपि जगतो मूलम् इत्यवगतत्वात् अस्त्येव[5]। कार्यप्रविलापनस्य अस्तित्वनिष्ठत्वात् । तथा हि – इदं कार्यं सूक्ष्म[6]तारतम्यपारम्पर्येण अनुगम्यमानं सद्बुद्धिनिष्ठामेव अवगमयति[7]। यदापि विषयप्रविलापनेन प्रविलाप्यमाना बुद्धिः, तदापि सा सत्प्रत्ययगर्भैव

---

1. कारणं च बुद्ध्यादिकरणम् । 'ग्रहणकरणाभावात्' इत्येव वा पाठः कल्पनीयः ॥

2. अनुपलभ्यत्वान्नास्ति ब्रह्म – इत्याशङ्कामुत्थाप्य तत्र तत्र परिहारो भाष्यान्तरेऽपि दृश्यते । तै. भा. २-५ (तत्रासदेव ब्रह्मेत्याशङ्क्यते...२-६), के. भा. ३-१ ( यन्नास्ति तदविज्ञातम् )॥

3. न ह्यसतः साक्षात्कारार्थं योगः कुतोऽर्थवान् भवेदिति भावः ॥

4. 'शक्य इत्यर्थः' इत्येव भाष्यं लिखितं स्यात् इत्युन्नीयते । वागादीनां ग्रहणं सर्वेन्द्रियोपलक्षणार्थम् । अतः सर्वैरपीन्द्रियैः प्राप्तुमशक्य इत्येवार्थ इति भावः ॥

5. 'ऊर्ध्वमूलम्' इत्यादिश्रुतेः सर्वकारणत्वावगमात्, अस्तीत्यर्थः ॥

6. 'सौक्ष्म्य' इति वा॥

7. अत्र कार्यस्य प्रविलापनम् अविद्याकृतस्य विद्यया । 'प्रज्ञानघन एव' इत्येकरसताश्रवणात् (सू. भा. १-३-१) । तच्च प्रविलापनं सूक्ष्मतारतम्येन प्राक् (१-३-१०) भाष्योक्तप्रकारेण । तच्च कार्यानुगतकारणानुगमेनान्ततः सद्बुद्धिनिष्ठामवगमयति ॥ गी. भा. २-१६.

विलीयते[1]। बुद्धिर्हि नः प्रमाणं सदसतोर्याथात्म्यावगमे[2]। मूलं चेज्जगतो न स्यात्, असदन्वितमेवेदं कार्यम् 'असत्' इत्येव गृह्येत[3]। न त्वेतदस्ति। 'सत्', 'सत्' इत्येव तु गृह्यते। यथा मृदादिकार्यं घटादि मृदाद्यन्वितम्। तस्मात्, जगतो मूलम् आत्मा अस्तीत्येव उपलब्धव्यः। कस्मात्? अस्तीति ब्रुवतः अस्तित्ववादिनः, आगमार्थानुसारिणः[4] श्रद्दधानात्, अन्यत्र नास्तिकवादिनि 'नास्ति जगतो मूलमात्मा, निरन्वयमेवेदं कार्यम् अभावान्तं प्रविलीयते' इति मन्यमाने विपरीतदर्शिनि[5] कथं तद् ब्रह्म तत्त्वत[6] उपलभ्यते? न कथञ्चन उपलभ्यते इत्यर्थः ॥ १२ ॥

---

1. यदीदं नास्ति, किं तर्ह्यस्तीत्याकाङ्क्षा समनुवर्तते सर्वत्र। बुद्धिरपि यद्यद् गृह्णाति तत्सदित्येव गृह्णाति, तद्विषयबाधे तद्विकल्पास्पदकारणे 'सदिदम्' इत्येव सत्प्रत्ययगर्भो विलीयते। यथा घटं सत्त्वेन गृह्णाना बुद्धिः, तदसत्त्वनिश्चयेन प्रविलीयमाना तत्कारणमृद्विषयकसत्प्रत्ययगर्भैव प्रविलीयते। एवं मृद्विषय-बुद्धिरपीति ज्ञेयम् ॥

2. यद्विषया बुद्धिर्न व्यभिचरति तत् सत्, यद्विषया तु व्यभिचरति तदसत् – इत्येवं बुद्धिरेव सदसद्विभागेन वस्तुतत्त्वनिश्चये प्रमाणम् ॥ गी. भा. २-१६.

3. असत्कार्यवादिनो नासदेव कार्यात्मतामेतीति ब्रुवते। अतोऽसदन्वित-मेवेदं गृह्येतेत्यापादनं तत्पक्षे न संभवतीति यद्यप्यापाततो भाति, तथापि सदन्वितग्रहणं न स्यात् इत्यत्रैव निर्भरः सिद्धान्तिन इति ध्येयम् ॥

4. अनुभवावसायिश्रुत्युपदेशसंप्रदायविशेषविद् इत्यर्थः । सर्वं हि विनश्यद् विकारजातं पुरुषान्तं विनश्यति। पुरुषो विनाशहेत्वभावादविनाशीत्यनु-भवः ॥ सू. भा. १-१-४.

5. अनुभवापलापिदर्शनवति ॥

6. अस्तीत्यपि न ब्रह्मतत्त्वमन्ततो गत्वा। नास्तिबुद्धिनिराकरणं तु क्रियतेऽस्तित्वबुद्ध्या इत्यस्तित्वबुद्धिरङ्गीक्रियते तत्र ब्रह्मविद्भिः, कार्यकारणवादम् अध्यारोपापवादन्यायेन स्वीकृत्य ॥ गौ. का भा. ४-४२.

अस्तीत्युपलब्धवत एवात्मनो निरुपाधिकतत्त्वज्ञानम् –

१०५. तस्मात्, अपोह्यासङ्घादिपक्षम् आसुरम् अस्तीत्येव आत्मा उपलब्धव्यः, सत्कार्यबुद्ध्याद्युपाधिः[1] । यदा तु तद्रहितोऽविक्रिय आत्मा, कार्यं च कारणव्यतिरेकेण नास्ति[2] 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छां. ६-१-४) इति श्रुतेः, तदा तस्य निरुपाधिकस्य अलिङ्गस्य[3], सदसदादिप्रत्ययविषयत्ववर्जितस्य[4] आत्मनः तत्त्वभावो भवति । तेन च रूपेण – आत्मा 'उपलब्धव्यः' इत्यनुवर्तते ॥

तत्रापि, उभयोः, सोपाधिकनिरुपाधिकयोः, अस्तित्व[5]तत्त्वभावयोः –निर्धारणार्था षष्ठी–पूर्वम् अस्तीत्येवोपलब्धस्य आत्मनः । सत्कार्योपाधिकत्वास्तित्वप्रत्ययेनोपलब्धस्य इत्यर्थः । पश्चात् प्रत्यस्तमितसर्वोपाधिरूपः, आत्मनस्तत्त्वभावः विदिताविदिताभ्यामन्यो[6] अद्वयस्वभावः, 'नेति नेति' (बृ. २–३–६), 'अस्थूलमनण्वह्रस्वम्' (बृ. ३–८–८), 'अदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने' (तै. २–७) – इत्यादिश्रुतिनिर्दिष्टः प्रसीदति अभिमुखीभवति, आत्मप्रकाशनाय । पूर्वम् 'अस्ति' इत्युपलब्धवतः इत्येतत्[7] ॥ १३ ॥

---

1. कार्यप्रविलापनेनावशिष्टास्तित्व इत्यर्थः । कार्यप्रसवबीजात्मकत्वस्य अपरित्यज्यैव हि सच्छब्दप्रत्ययगम्यत्वमात्मनः ॥ गौ. का. भा. १–२. 'सत्कार्यो बुद्ध्याद्युपाधिः' आ॥ ; 'सत्कार्यबुद्ध्याद्युपाधिभिः' वा॥ ; यथाधृतपाठे तु कार्यं सत्प्रत्ययगर्भा बुद्धिश्चेत्युभयमप्युपाधित्वेन गृहीतं भवति । अस्यानन्तरं 'तत्त्वभावेन च' इति श्रुतिप्रतीकं भाष्योपात्तं त्रुटितमित्युन्नीयते ॥

2. कार्यकारणभावस्याध्यारोपदृष्ट्या समुपात्तस्यापोदितत्वादिति शेषः ॥

3. बुद्ध्यादिलिङ्गरहितस्य ॥

4. बीजत्वापनये सति शब्दप्रवृत्तिनिमित्ताभावात् ; गौ. का. भा. १–२, गी. भा. १३–१२ (न सत्तन्नासदुच्यते) ॥

5. 'अस्तित्वतत्त्वभावयोः' इत्येवालमिति भाति । मुद्रितपुस्तकेषु 'अस्तित्व ....' इत्येव दृश्यते ॥

6. व्याकृताव्याकृतविलक्षणः ॥ के. १–४, गी. भा १५–१७.

7. पूर्वम् अस्तीत्युपलब्धवतः पश्चादुपाधिविगमे निरुपाधिकतत्त्वं स्वयमेवानुभवारूढं भवतीत्यर्थः ॥

यदा सर्वे प्रमुच्यन्ते
काम येऽस्य हृदि श्रिताः ।
अथ मर्त्योऽमृतो भव-
त्यत्र ब्रह्म समश्नुते ॥ १४ ॥

कामप्रविलये अमृतत्वप्राप्तिः –

१०६. एवं परमार्थात्मदर्शिनो यदा यस्मिन् काले सर्वे कामाः कामयितव्यस्यान्यस्याभावात्[1] प्रमुच्यन्ते विशीर्यन्ते, येऽस्य प्राक् प्रतिबोधाद् विदुषो हृदि बुद्धौ श्रिताः आश्रिताः । बुद्धिर्हि कामानामाश्रयो नात्मा[2] । 'कामः सङ्कल्पः' (बृ. १-५-३) इत्यादिश्रुत्यन्तराच्च । अथ तदा मर्त्यः – प्राक् प्रतिबोधादासीत्[3] स प्रबोधोत्तरकालम् अविद्याकामकर्मलक्षणस्य मृत्योर्विनाशात्[4] अमृतो भवति । गमनप्रयोजकस्य मृत्योर्विनाशाद् गमनानुपपत्तेः[5], अत्र इहैव – प्रदीपनिर्वाणवत्[6] – सर्वबन्धनोपशमनात् ब्रह्म समश्नुते । ब्रह्मैव भवतीत्यर्थः[7] ॥ १४ ॥

---

1. शरीरस्थितिनिमित्तान्नपानादौ प्रवृत्तिकारणेच्छाव्यतिरिक्ताः सर्वे कामाः – इति टीकाकारः । व्यावहारिकदृष्ट्या यद्यपि तदपि सत्यमेव, तथापि 'सर्वे कामाः' इति श्रुतेः, 'कामयितव्यस्यान्यस्याभावात्' इति भाष्याच्चात्र सर्वेषां कामानाम् आत्मरूपापत्तिरेव प्रविलयो विवक्षित इति गम्यते । सर्वं ह्यस्यात्मैवाभूदित्यतः कामयितव्यस्यान्यस्याभावः ॥ बृ. भा. ४-४-६. (आत्मकामः)

2. कामा हृदयाश्रया एवाभ्युपगम्यन्ते न वैशेषिकादिवत् भर्तृप्रपञ्चादिवच्च आत्माश्रिताः – इति भाष्यान्तरेऽपि ॥ बृ भा. ४-३-२२ (शोकान् हृदयस्य....)

3. 'यः' इत्यध्याहार्यम् । त्रुटितं वा पदम् ॥

4. कामस्य विनाशादमृतो भवतीत्युक्तेरिदमवगम्यत इति भावः ॥ बृ. भा. ४-३-७.

5. कामप्रयुक्त एव हि कर्मणि प्रवृत्तो तत्फलभोगाय लोकान्तरं गच्छति ॥ अयं त्वकामीति । बृ. भा. ४-४-६ ; सू. भा. ४-२-१२, १३, १४.

6. यथा प्रदीपस्य निर्वाणे इहैव तेजःसामान्येऽवस्थितिः, तद्वत् ॥ मुं. भा. ३-२-६ ; बृ. भा. ३-२ (संबन्धभाष्यम्)

7. मुं. भा. ३-२-९ । 'समश्नुते' इति वचनात् अप्राप्तप्राप्तिर्मा शङ्कीत्येवं व्याख्यातम् ॥

यदा सर्वे प्रभिद्यन्ते
हृदयस्येह ग्रन्थयः ।
अथ मर्त्योऽमृतो भव-
त्येतावद्ध्यनुशासनम् ॥ १५ ॥

अविद्याग्रन्थिविनाशात् कामानां समूलविनाशः –

१०७. कदा पुनः कामानां मूलतो[1] विनाश इति ? उच्यते –

यदा सर्वे प्रभिद्यन्ते भेदम् उपयान्ति, विनश्यन्ति । हृदयस्य बुद्धेः, इह जीवत एव ग्रन्थयः ग्रन्थिवद् दृढबन्धनरूपा अविद्याप्रत्यया[2] इत्यर्थः । 'अहमिदं शरीरम्', 'ममेदं धनम्', 'सुखी दुःखी चाहम्' इत्येवमादिलक्षणाः, तद्विपरीताद् ब्रह्मात्मप्रत्ययोपजननात् 'ब्रह्मैवाहमस्म्यसंसारी' इति[3] । विनष्टेषु अविद्याग्रन्थिषु तन्निमित्ताः कामा मूलतो[4] विनश्यन्ति । अथ मर्त्योऽमृतो भवति[5] । एतावद् हि एतावदेव एतावन्मात्रं

---

1. विषयसांनिध्याभावेन कारणान्तराद्संकल्पयतः सुषुप्तमूर्छाद्यवस्थानुभववतो वा कामा न भवन्ति यद्यपि, तथापि तेषां समूलघातो न भवतीत्यतः प्रश्नः – कदा पुनरिति ॥

2. यद्यपि कामा अपि हृदयग्रन्थय एव, 'कामः संकल्पः' (बृ. १-५-३) इत्यादिश्रुत्यन्तरात् 'भिद्यते हृदयग्रन्थिः' (मुं. भा. २-२-९) इति च, तथापि तेषां बन्धकत्वे यन्मूलं तेषामेवाविद्यावासनानामिह पृथग्ग्रहणम् 'अविद्याग्रन्थिं विकिरति' (मुं. भा. २-१-१०) इति तेषामपि ग्रन्थिशब्दव्यपदेश्यत्वदर्शनात् ॥

3. इति ब्रह्मात्मप्रत्ययोपजननात् यदा विनश्यन्तीति संबन्धः ॥

4. 'मूलतो विनश्यन्ति' इति वचनादवगम्यते अतस्मिंस्तद्बुद्धिरूपाविद्यातो व्यतिरिक्तं काममूलमविद्याशब्दवाच्यं व्याख्यानप्रस्थानानुयायिनां केषाञ्चिदभिमतं कारणाज्ञानं भगवतो न हृदये स्थितमिति ॥

5. अविद्याकामकर्मविनाशसमसमयमेवामृतो भवति । अमृतत्वस्याविद्यामात्रव्यवहितत्वादिति भावः ॥

नाधिकमस्तीत्याशङ्का कर्तव्या[1] । अनुशासनम् अनुशिष्टिः, उपदेशः । सर्ववेदान्तानामिति वाक्यशेषः[3] ॥ १५ ॥

अपरब्रह्मविद्याफलम्

**शतं चैका च हृदयस्य नाड्य-**
**स्तासां मूर्धानमभिनिःसृतैका ।**
**तयोर्ध्वमायन्नमृतत्वमेति ।**
**विष्वङ्ङन्या उत्क्रमणे भवन्ति ॥ १६ ॥**

गतिविशेषसंकीर्तनस्य प्रयोजनम् –

१०८. निरस्ताशेषविशेषव्यापिब्रह्मात्मप्रतिपत्त्या प्रभिन्नसमस्ताविद्याग्रन्थेः, जीवत एव ब्रह्मभूतस्य विदुषो न गतिर्विद्यते इत्युक्तम्[3] । 'अत्र ब्रह्म समश्नुते' (२–३–१४) इत्युक्तत्वात्[4], 'न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति' (बृ. ४–४–६) इति श्रुत्यन्तराच्च[5] । ये पुनर्मन्दब्रह्मविदो[6] विद्यान्तरशीलिनश्च[7] ब्रह्मलोक-

1. अमृतत्वप्राप्त्यै यत्नान्तरं कर्तव्यमस्त्यावशिष्यत इति शङ्का न कर्तव्या ॥

2. अविद्याकामविनाशे ब्रह्मात्मत्वभावप्राप्तिरिति, नातःपरं कर्तव्यशेष इति च सर्ववेदान्तोपदेशः प्र. भा ६–७, गी. भा. १५–२०.

3. 'अथ मर्त्योऽमृतो भवति' इति हृदयग्रन्थिभेदसमसमयमेव अमृतत्वमुक्तम् ॥

4. प्रकृतमन्त्रे गतिसंकीर्तनात् तदविरोधाय पूर्वमन्त्रेऽपि गत्युपसंहारः कर्तव्य इति वदन्तं प्रत्याह – 'अत्रेति । गत्यभावे कामप्रणाशं हेतुमुक्त्वा इहैव ब्रह्मप्राप्तिं ब्रुवती श्रुतिः कुप्येत यदि प्रकरणसामर्थ्यादनुरुध्यात्र परब्रह्मविद्विषया गतिश्रुतिरभ्युपगम्येतेति भावः ॥ 5. अत्र गतिः प्रत्यक्षं निषिध्यते ॥

6. अपरब्रह्मोपासकाः । परमेव नामरूपधर्मविशिष्टं ब्रह्म यदोपास्यं तदा मन्दब्रह्म, अपरं ब्रह्म–इति च व्यपदिश्यते ॥ प्र. भा. ५–२ ; सू. भा. ४–३–१४.

7. पञ्चाग्निविद्याद्यनुष्ठातारः । छां. ५–१०–२ ; सू. भा. ४–३–१५.

भाजः, ये च तद्विपरीताः संसारभाजः, तेषामेव गतिविशेष[1] उच्यते, प्रकृतोत्कृष्टब्रह्मविद्याफलस्तुतये[2] । किं चान्यत् । अग्निविद्या पृष्टा प्रत्युक्ता च । तस्याश्च फलप्राप्तिप्रकारो वक्तव्यः[3] — इति मन्त्रारम्भः ॥

## अपरब्रह्मविदां गतयः —

१०९. तत्र, शतं च शतसङ्ख्याकाः[4], एका च सुषुम्ना नाम पुरुषस्य हृदयाद् विनिस्सृताः नाड्यः सिराः । तासां मध्ये मूर्धानं भित्त्वा अभिनिःस्सृता निर्गता एका सुषुम्ना[5] नाम । तया अन्तकाले हृदये आत्मानं[6] वशीकृत्य योजयेत्[7], तया नाड्या ऊर्ध्वं उपरि आयन् गच्छन्[8] आदित्यद्वारेण[9] अमृतत्वम् अमरणधर्मत्वम् आपेक्षिकम्[10] 'आभूत संप्लवं स्थानममृतत्वं हि भाष्यते '[11] (वि. पु. २-८-९७) इति स्मृतेः,

---

1. तयोर्ध्वमायन्निति सगुणब्रह्मविदां पञ्चाग्निविदां च, विष्वङ्ङन्या इति च संसारभाजाम् ॥

2. उत्कृष्टब्रह्मविद्याप्रकरणमिदम् । तस्याश्च विद्यायाः फलम् इहैव ब्रह्मप्राप्तिः । इतरा तु ब्रह्मविद्यापि सती कालान्तरे देशान्तरे च क्रममुक्तिप्रदैवेत्यतः परब्रह्मविद्येयम् इत्थंमहाभागा यत् कुशलमतिभिः कैश्चिदेव लभ्या–इति विद्यान्तराश्रयगतिकीर्तनम् एतत्स्तुत्यर्थमित्यवगन्तव्यमिति भावः ॥ सू. भा. ४-३-१४.

3. यद्यपि फलं तत्रैवोक्तम्, तत्प्राप्तिप्रकारस्तु तत्रानुक्तो नाडीद्वारेण गमनरूपोऽत्र वक्तव्यः – इत्यतोऽपि गतिकीर्तनमिदमुपपन्नमिति भावः । अस्मिन् पक्षे स्वप्रधानमेव गतिश्रवणं न परब्रह्मविद्याफलस्तुतये ॥

4. प्रधानत इत्यर्थः । आनन्त्याद्देहनाडीनाम् ॥ छां. भा. ८-६-६.

5. श्रुत्युपदिष्टेयं योगशास्त्रेऽपि परामृष्टा । प्र. भा. ३-७, तै. भा. १-५ ॥

6. मनः ॥ गी. भा. ८-१२.     7. योगाभ्यासे नियुञ्ज्यात् ॥

8. भूमिजयक्रमेणेति शेषः ॥ गी. भा. ८-१०.

9. छां. ८-६, तै. १-६, ई. १६, बृ. ५-१५-१ – आसु सर्वत्रादित्यद्वारेण गतिरुक्ता ॥

10. इतरफलापेक्षया बहुकालस्थायित्वात् अमृतत्वमित्युच्यत इति भावः ॥

11. छान्दोग्ये (५-१०-२) चोदाहृतमिदं पौराणिकवाक्यम् । तत्रापि 'हि भाष्यते' इत्येव पाठः । 'विभाव्यते' इति पाठान्तरमप्यस्ति ॥

ब्रह्मणा वा सह कालान्तरेण[1] मुख्यममृतत्वम्[2] एति भुक्त्वा भोगान्[3] अनुपमान् ब्रह्मलोकगतान् । विष्वङ् नानाविधगतयः[4], अन्या नाड्यः उत्क्रमणे उत्क्रमणनिमित्तं भवन्ति । संसारप्रतिपत्त्यर्था एव भवन्तीत्यर्थः ॥

उपसंहारः

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा
सदा जनानां हृदये संनिविष्टः ।
तं स्वाच्छरीरात् प्रवृहे-
न्मुञ्जादिवेषीकां धैर्येण ॥
तं विद्याच्छुक्रममृतं
तं विद्याच्छुक्रममृतमिति ॥ १७ ॥

उपनिषदर्थोपसंहारः –

११०. इदानीं सर्ववल्ल्यर्थोपसंहारार्थमाह –

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां संबन्धिनि हृदये संनिविष्टो यथाऽव्याख्यातः[5] । तं स्वात् आत्मीयात्, शरीरात् प्रवृहेत् उद्यच्छेत्, निष्कर्षेत् । पृथक्कुर्यात् इत्यर्थः[6] । किमिवेति ? उच्यते—मुञ्जादिव इषीकाम्[7]

---

1. ब्रह्मलोकप्रलयान्ते ॥

2. सम्यग्दर्शनोत्पत्त्यपेक्षया – इति शेषः । न ह्येकस्यैवापेक्षिकं मुख्यं चामृतत्वं भवेत् । सम्यग्दर्शनवतां ब्रह्मलोकं गतानां मुख्यमुक्तिः सूत्रभाष्ये (४-३-१०, ११) दर्शिता । इतरेषां तु पुनरावृत्तिः छां.भा. ५–१०–२, बृ.भा. ६–२–१५, गी. भा. ८–२६. 3. छान्दोग्ये (८–५–३, ४) वर्णितान् ॥

4. 'नानागतयः' इति वा॥

5. (२–१–१२, १३) 'द्वितीयाध्याय प्रथमा वल्ली भाष्ये' इति शेषः॥

6. शरीरद्वयादपि विविच्य जानीयात् ॥

7. अध्यस्ताद् देहद्वयाद् विविच्य कूटस्थाव्यभिचररूपेण स्थितमात्मानं जानीयात् (गी. भा. १३–२६) इत्यर्थः । न हि साक्षादेव मुञ्जादिषीकामिव हस्तेन विकर्षणमिह संभवति ॥

अन्तःस्थां धैर्येण अप्रमादेन[1]। तं शरीरान्निष्कृष्टं चिन्मात्रं[2] विद्यात् विजानीयात् शुक्रं शुद्धम् अमृतं यथोक्तं[3] ब्रह्म इति। द्विर्वचनम् उपनिषत्परिसमाप्त्यर्थम्, इतिशब्दश्च ॥ १७ ॥

**मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वा**
**विद्यामेतां योगविधिं च कृत्स्नम् ।**
**ब्रह्मप्राप्तो विरजोऽभूद् विमृत्यु-**
**रन्योऽप्येवं यो विद्ध्यात्ममेव ॥ १८ ॥**

आख्यायिकार्थोपसंहारः –

१११. विद्यास्तुत्यर्थो[4]ऽयमाख्यायिकार्थोपसंहारोऽधुना उच्यते – मृत्युप्रोक्तां यथोक्ताम् एतां[5] ब्रह्मविद्यां योगविधिं च कृत्स्नं समस्तम्। सोपकरणं सफलमित्येतत्[6]। नचिकेतो नचिकेताः[7] अथ वरप्रदानान्मृत्योः[8]। लब्ध्वा प्राप्य इत्यर्थः। किम्? ब्रह्म प्राप्तोऽभूत्। मुक्तोऽभवत्

1. सावधानं योगाभ्यासेन (२-३-११) ॥ 2. पुरुषम् इति शेषः ॥

3. द्वितीयवल्ली(२-२-८)भाष्ये। अविद्याध्यस्ताद् देहद्वयाद् विलक्षणमेव पुरुषं धर्माधर्माद्यतीतं कार्यकारणभावविवर्जितं कालत्रयातीतं सर्वविकल्पास्पदं ब्रह्म–इति विद्यादित्यर्थः ॥

4. इत्थंमहाभागेयं विद्या यन्नचिकेतसा प्राणात्ययभीतिमप्यविगणय्य मृत्योरुपदेशात् संपादिता। आत्यन्तिकामृतत्वप्रदा च–इति स्तुत्यर्थम् ॥

5. 'एताम्' इति नास्ति वा॥

6. 'यच्छेद्वाङ्मनसी' इत्यादिना (१-३-१३), 'हृदा मनीषा' (२-३-९, १०, ११) इत्यादिना च सोपकरणम्, सफलं विद्यापर्यवसानं च–इत्यर्थः ॥

7. अत्र मूले भाष्ये च सर्वत्र 'नाचिकेत' इत्येव आ॥; 'नचिकेतः' इति मूले 'नचिकेताः' इति च वा॥ पाठः; 'नचिकेतः' इति मूले भाष्ये तदनुवादेन नचिकेता इति च पठितमित्यस्माभिः कल्पितम्। अत्र सुधिय एव प्रमाणम् ॥

8. 'विद्यां योगविधिं च, अथ – मृत्योर्वरप्रदानात्, लब्ध्वा' इति योजना–इति भावः ॥

इत्यर्थः । कथम् ? विद्याप्राप्त्या विरजः विगतरजाः, विगतधर्माधर्मः । विमृत्युः विगतकामाविद्यश्च सन् पूर्वमित्यर्थः[1] ॥

न केवलं नचिकेता एव । अन्योऽपि य एवं नचिकेतोवत्[2] आत्मवित् अध्यात्ममेव निरुपचरितं प्रत्यक्स्वरूपं प्राप्य तत्त्वमेव – इत्यभिप्रायः । नान्यद् रूपम् अप्रत्यग्रूपम्[3] । तत् – एवमध्यात्मम्, एवम् उक्तप्रकारेण वेद विजानातीति एवंवित्–सोऽपि विरजाः सन् ब्रह्म प्राप्य विमृत्युर्भवति–इति वाक्यशेषः ॥ १८ ॥

शान्तिः[4]

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः ॥ १९ ॥

इति द्वितीयाध्याये तृतीया वल्ली । द्वितीयाध्यायश्च समाप्तः ॥

## परिसमाप्ता काठकोपनिषत्

1. विद्याप्राप्त्या अविद्याकामकर्माणि पूर्वं विधूय तन्नान्तरीयकतया ब्रह्मप्राप्तः – इति संबन्धः प्रदर्शितो भवति ॥

2. नचिकेता इव विद्यां योगविधिं च प्राप्य योऽपीदानीन्तनो विद्यात् सोऽपि मुक्तो भवति । न तु तेनेव महावीर्येणापि भाव्यं मुमुक्षुणेति निर्बन्धः ॥

3. परागर्थे आत्ममतिं विहाय सर्वान्तरं प्रत्यगात्मानमेव स्वात्मानमुक्तलक्षणं यो वेद सोऽपि मुक्तो भवति–इत्यर्थः । ब्रह्म प्राप्य विमृत्युर्भवतीति तु यथोक्तानुक्रमेण द्रष्टव्यम् 'यः पूर्वं विरजा विमृत्युश्च भूत्वा ब्रह्म प्राप्नोति' इति । अत्र भूमिका द्रष्टव्या ॥

4. इयं शान्तिः 'इति द्वितीयाध्यायः' इत्यस्य पश्चाद् वर्तते केषुचित् पुस्तकेषु । 'सह नाविति शान्तिः' इत्येतावदेव क्वचित् । शान्तिर्भाष्यं च कुत्र कथं निवेशिते इति निर्णयस्तु कोशान्तरावलोकनमन्तरेणेदानीं न शक्यकरणः । पश्यन्तु तुलनार्थं तैत्तिरीयानन्दवल्लीप्रारम्भगतामिमां शान्तिं तद्भाष्यं च ॥

शान्तिपाठप्रयोजनकथनं तद्व्याख्यानं च –

११२. अथ शिष्याचार्ययोः प्रमादकृतान्यायेन[1] विद्याग्रहण-प्रतिपादननिमित्तदोषप्रशमनार्था, इयं शान्तिरुच्यते –

सह नौ आवाम् अवतु पालयतु विद्यास्वरूपप्रकाशनेन । कः ? स एव परमेश्वर उपनिषत्प्रकाशितः[2] । किञ्च सह नौ भुनक्तु तत्फलप्रकाशनेन नौ पालयतु । सहैवावां विद्याकृतं वीर्यं सामर्थ्यं करवावहै निष्पादयावहै । किञ्च तेजस्विनौ तेजस्विनोरावयोर्यदधीतं तत् स्वधीतमस्तु[3] । अथवा तेजस्वि नौ आवाभ्यां यदधीतं तदतीव तेजस्वि वीर्यवदस्तु इत्यर्थः[4] । मा विद्विषावहै शिष्याचार्यौ—अन्योन्यं प्रमादकृता-न्यायाध्ययनाध्यापनदोषनिमित्तं—द्वेषं मा करवावहै इत्यर्थः । 'शान्तिः शान्तिः शान्तिः' इति त्रिर्वचनं सर्वदोषोपशमनार्थम् ॥ १९ ॥

इति श्रीशङ्करभगवतः कृतौ काठकोपनिषद्द्वितीयाध्यायतृतीयवल्लीभाष्यम् ॥
समाप्तं च द्वितीयाध्यायभाष्यम्

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छङ्करभगवतः कृतौ काठकोपनिषद्भाष्यं समाप्तम्

---

1. अन्यायाध्ययनम् गुरुपादोपसंग्रहणादिकं विनाध्ययनम् । अन्याया-ध्यापनम् शिष्यस्य यथा स्वधीतं स्यात् तथा यत्नकरणेऽनादरः ॥

2. धर्माधर्माद्यतीतः ॥

3. तेजस्विनौ इति षष्ठ्यर्थे । अधीतमस्तु इति सम्यगधीतम् अर्थज्ञान-योग्यमस्तु – इत्यर्थः ॥

4. नौ तृतीयार्थे । अधीतं तेजस्वि वीर्यवत्, अमृतत्वफलप्रदमस्तु – इत्यर्थः ॥

# अथ काठकोपनिषत्सारः

अन्वयसंख्या उपनिषन्मन्त्रपरामर्शिकाः

---

## प्रथमाध्याये – प्रथमा वल्ली

१-९. उद्दालकपुत्रो वाजश्रवसः किल विश्वजिता नाम यागेनेजे । तेन च यागान्ते ऋत्विग्भ्यः सदस्येभ्यश्च ब्राह्मणेभ्यो दित्सिता गाः कृशा अदोह्या जीर्णाश्च पश्यंस्तत्पुत्रो नचिकेता 'नूनमेताभिर्दक्षिणार्थं प्रदीयमानाभिः पितुरनिष्टमेव फलं भवेत् । सर्वस्वदक्षिणाकश्चायं यागः । अतो मामप्ययं कर्मसाद्गुण्यार्थं ददातु' इत्यालोच्य पितरमुपगम्य 'तात, मां कस्मै दास्यसि ?' इत्यपृच्छत् । तेन च मुग्धोऽयमिति मत्वा समुपेक्षितो द्वितीयं तृतीयं च वारं तथैवाप्राक्षीत् । स च वाजश्रवसस्तेन प्रक्षुब्धः 'मृत्यवे त्वां ददामि' इति क्रोधेन प्रत्यवदत् । तदनु परं शोकाविष्टोऽभूत् कथं मयोक्तमवाच्यमेतद् यज्ञभूमाविति । नचिकेतास्तु प्रशान्त एवोवाच "हे पितः, मृषाकरणं कस्यापि न श्रेयसे भवेत् । विशिष्य च भवतो यज्ञदीक्षितस्य । अतः पालयात्मनः सत्यम्, पुत्रमोहेन मा कृपांकुरु" इति । पिता चैवमुक्त आत्मनः सत्यतायै तं प्रेषयामास । नचिकेता मृत्युभवनं ययौ । तत्र प्रोषिते यमे तिस्रो रात्रीरशनवर्जित एवोवास । प्रत्यागतो यमः स्वैर्बोधितः प्रत्यभिज्ञाय नचिकेतसं तदवस्थम्, आतिथ्यानादरनिमित्तप्रत्यवाय-परिजिहीर्षया "त्वयानशनेनोषितास्तिस्रो रात्रीः प्रति मत्तस्त्रीन्वरान् वृणीष्व यथा मे स्वस्ति भूयात्" इत्युवाच ॥

१०-१९. नचिकेतास्तु "भो मृत्यो, गृहं प्रत्यागतं मां दृष्ट्वा मम पिता यथा सुमनाः स्यात्, प्रीत्या च मामभिवदेत्, तथा अनुगृहाण । एष एव प्रथमो वरः । जरामरणशोकादिभीतिनिवारिण्याः प्रजापतिप्राप्तिफलकाग्निविद्याया यथाव-दुपदेशेनानुग्रहीतव्योऽहम् । एष च द्वितीयो वरः" इति वरद्वयं ययाचे । अथ मृत्युस्तद्वरद्वयं दत्वा कुमारस्य नचिकेतसो ग्रहणशक्तिमभिनन्दयन् "अयमग्नि-स्तवैव नाम्ना प्रसिद्धिं याता, अन्यदपि कर्मविज्ञानं तुभ्यमुपदिशामि । एष तु मया सुप्रीतेन स्वयं दत्तो वरः । अथावशिष्टं तृतीयं वृणीष्व" इत्युवाच ॥

२०-२९. अथ नचिकेता अब्रवीत् "हे देव, मृते मनुष्ये देहेन्द्रियादि-संघातव्यतिरिक्त आत्मा, अवतिष्ठते वा न वा ? अत्र वादिविप्रतिपत्तेः संशयो

भवति । स च छेत्तव्यस्त्वया ” इति । मृत्युस्तस्यात्मज्ञानार्हतां परीचिक्षिषुः प्राह “ भोः, देवैरपि संशयितोऽयमर्थः, अतिदुर्बोधश्चायम् । अतः परित्यजैनमन्यं वरं वृणीष्व ” इति । नचिकेतास्त्वाह “ यस्माद्देवैरयं संशयितो दुर्बोधश्च, नचास्त्यन्यः प्रार्थयितव्य एतत्तुल्योऽर्थः, भवांश्च प्रभुरस्य विषयप्रश्नस्य विनिर्णये ; अत एनमेव वरं वृणे ” इति । “ दीर्घायुः प्रजासन्ततिम्, पशुक्षेत्रहिरण्यादिकं यथेच्छजीवितत्वसहितं साम्राज्यं सर्वकामावाप्तिं च वृणीष्व ; दिव्यभोगांश्च प्रदास्याम्यहम् । किं करिष्यसि निर्भीकमरणानुप्रश्नेन ? ” इति पुनरपि बहुधा प्रलोभ्यमानोऽपि मृत्युना नायं चचाल । “ भवद्दर्शनादेव स्वयंसिद्धान् प्रभूतधनायुरादीन् कामान् को वा विवेकी प्रार्थयेत ?, अतो मयैष एव वरो वरणीयो देहादिव्यतिरिक्तात्मास्तित्वनास्तित्वविनिर्णयज्ञानम् ” इति स्वप्रार्थनायामेव स्थिरो बभूव ॥

## प्रथमाध्याये – द्वितीया वल्ली

१-६. एवं परीक्ष्य नचिकेतसं तस्याधिकारिविशेषणवत्त्वं चावगम्य मृत्युस्तस्मै पृष्टमात्मज्ञानमुपदिदिक्षुस्तस्य वैराग्यातिशयं तावत् प्रशशंस “ श्रेयःप्रेयसोरुभयोरप्युपस्थितयोरत्यन्तविरुद्धस्वभावयोरन्यतरस्यैवोपादेयत्वे प्राप्ते विवेकी पुरुषः श्रेयस्साधनमेवादत्ते मन्दप्रज्ञस्तु योगक्षेमभावनाभावितः प्रेयःसाधनमेव वृणीते, अनर्थं चर्छति । लोके तावदज्ञा एव बहवो ये पुत्रपश्वादिकामानेव कामयमानाः संसारे भ्रमन्ति । अथ च पण्डितमानिनस्तेऽन्यानपि स्वाभिमते कामभोगपथे प्रस्थापयन्ति । ऐहिकफलमेव बहुमन्यमानाः परलोकविचाराद् वञ्चिता भवन्ति । त्वं त्वनादृत्याखिलकामभोगानात्मतत्त्वज्ञानमेव प्रेप्सितवानसीत्यतस्त्वां श्रेयोभाजनं मन्येऽहम् । अयं ह्यात्मा यं त्वं जिज्ञाससे, तस्य श्रवणमपि तावद्दुर्लभं बहूनाम्, शृण्वन्तोऽपि तत्तत्त्वं बहवो न विद्युः । यतस्तस्य यथार्थतो बोद्धा बोधयिता च कश्चिदेव सहस्रेष्वेको भवत्यद्भुतवत् । आगमवतैव ह्याचार्येणोपदिष्टेनाधिकारिणा अवगन्तुं शक्योऽयम्, न केवलतर्कशरणेन येनकेनचित् । भवांस्त्वतितरसाधारणशिष्ययोग्यतासंपन्नः, यतः श्रुत्वा ज्ञात्वापि ज्ञानोपासनयोः परमां गतिं ब्रह्मलोकलक्षणामणिमाद्यैश्वर्यप्रापणीमपि परतत्त्वज्ञानमेवेप्सुस्त्यक्तवानसि, यां मादृशा अपि काङ्क्षन्ते स्म । एतच्च तत्त्वं सर्वेषामपि भूतानां हृदयगुहायां स्थितमपि सत्, यैरेवाध्यात्मयोगेन स्वानुभवगोचरीकृतं त एव हर्षशोकप्रहाणपूर्वकं नित्यानन्दरूपं तमात्मानं लब्ध्वा निर्वृतिं यान्ति । तदीदृग्ज्ञानमेवैकान्ततोऽभिकाङ्क्षतस्तव भाविब्रह्मप्राप्तिर्ध्रुवेति मम मतिः ” इति ॥

१४-१७. तदेवमात्मनि प्रसन्नं मृत्युं विदित्वा तुष्टो नचिकेताः पुनरपि तृतीयवरत्वेन स्वेन प्रार्थितमर्थविशेषं विशदीकरिष्यन्नाह "यत्तदात्मतत्त्वं धर्माधर्मागोचरम्, यच्च स्वयं कार्यकारणभावरहितम्, भूतभविष्यद्वर्तमानापरिच्छिन्नं च त्वं विजानासि तन्मह्यं ब्रूहीति ॥

यमस्तु पृष्टं वस्तु सविशेषणं विवक्षन्नादौ " हे नचिकेतः, सर्ववेदाध्ययनगम्यं सर्वतपोभिरवाप्यं ब्रह्मचर्यनिष्ठायाश्च परगतिरूपं तत्त्वम् ओंशब्दवाच्यमोङ्कारप्रतीकं च भवति । ओङ्कारश्चायं सर्वेषामपि ब्रह्मप्रतीकानां श्रेष्ठम्, उपासितुः परापरान्यतरब्रह्मप्राप्तिसाधनं भवत्यधिकारतारतम्यापेक्षया ॥

१८-२२. "अथेदानीं तस्यात्मनः साक्षात्स्वरूपं तुभ्यं निर्दिशामि, शृणु। नित्यनिरस्तजन्ममरणादिविकारं तत्। अत एव धर्माधर्मागोचरम्, सर्वसंसारातीतम्। अणोरणीयो महतोमहीयश्च । सर्वस्यात्मभूतमपि कामिभिर्दुर्विज्ञेयं विरुद्धधर्माक्रान्तत्वेन विभाव्यमानत्वात् । सर्वबाह्यविषयेभ्यो व्यावृत्तबुद्धीनामेव तु तद्विज्ञानालोकालयो भवेत् । यतः स्वतोऽशरीरं सदेव भूतानामुच्चावचेषु शरीरेष्वनित्येषु कूटस्थचैतन्यैकरूपेणावस्थितं सर्वव्यापि, सर्वस्यात्मभूतं च ॥

२३-२५. यद्यपि प्रवचनमेधाबहुश्रुतत्वान्यपि साधनान्येवात्मज्ञानस्य तथापि सर्वकामत्यागपूर्वकमात्मानमेव कामयमानस्यात्मनैवात्मा लभ्यते मुख्यतः। दुराचारत्यागः, शमदमादिसाधनसंपत्, तत्रापि समाहितचित्तत्वं समाधानफलानभिसन्धिश्च-इत्येतानि प्रज्ञानेन ब्रह्मप्राप्तौ कारणानि भवन्ति । ईदृशसाधनवानेव सर्वजगत्संसारहेतोः कूटस्थनित्यात्मनः स्वरूपं विद्यात् ॥

## प्रथमाध्याये - तृतीया वल्ली

१-२. अस्मिन् शरीरे द्वावात्मानौ हृदयं प्रविष्टौ । तयोरेकः संसारी कर्मफलभुक्, अपरस्तु परमात्मा । तं परमात्मानमकर्मिणो ब्रह्मविदो ज्ञातुम्, पञ्चाग्नयस्त्रिणाचिकेताश्च कर्मिण उपासितुं शक्ताः ॥

३-९. तत्र योऽयं संसारी स रथी, तस्य शरीरमेव रथः। बुद्धिस्तस्य सारथिः, मनः प्रग्रहः, इन्द्रियाणि हयाः, विषयाश्च तेषां संचरणमार्गाः-इति रूपकं शास्त्रेण कल्पितम्। तत्र शरीरेन्द्रियमनोभिः संयुक्त आत्मा संसारमोक्षफलभोक्ता कल्प्यते। तत्रैवं सति यस्य रथिनो बुद्धिसारथिरविवेकी, अप्रगृहीतमनाश्च तस्य सारथेरिन्द्रियाण्यवश्यानि भवन्ति । स च संसारमधिगच्छति । यस्य पुनः सारथिर्विवेकी, समाहितमनाश्च तत्सारथेः सदश्वा इवेन्द्रियाणि वश्यानि

भवन्ति । स एव च संसाराध्वनः पारं पुनरावृत्तिरहितं तद्विष्णोः परमं परमात्मतत्त्वं प्रज्ञानेनाऽऽप्नोति ॥

१०-११. इन्द्रियाणि, विषयाः, मनः, बुद्धिः, महत्तत्त्वम्, अव्यक्तशब्दशब्दितमव्याकृतं च-इत्येतानि भूतसूक्ष्माण्युत्तरोत्तरं सूक्ष्मतराणि, महत्तराणि, स्वेतरप्रत्यगात्मभूतानि च । अव्यक्तादपि सूक्ष्मतरः सर्वव्यापकः पुरुषशब्दवाच्यः परमात्मा । स एव च सूक्ष्मत्वमहत्त्वप्रत्यगात्मत्वानां परा काष्ठा । उक्तानुक्रमेण सूक्ष्मतरानुगमेन य एवं सर्वमहत्तरं परमात्मानं विजानाति, तस्य विज्ञातव्यस्य, प्राप्तव्यस्य वा अन्यस्यानवशेषात् सैव परागतिर्भवति ॥

१२-१५. स एष आत्मा सर्वभूतेषु गूढोऽपि न सर्वं प्रति स्वेन रूपेण प्रकाशते । एकाग्रतोपेतया सूक्ष्मवस्तुनिरूपणपरैरेव तु सूक्ष्मबुद्ध्या दृश्यते । इन्द्रियाणि मनसि, मनश्च बुद्धौ, बुद्धिं च महत्यात्मनि, तं च महान्तमात्मानं निर्विशेषे सर्वबुद्धिप्रत्ययसाक्षिणि प्रविलाप्य सर्वविकल्पास्पदमेनं विजानीयात् । एष च ज्ञानमार्गः, तीक्ष्णक्षुरधारेव दुरत्यया यस्मात्, तस्मादविद्यानिद्रामुज्झित्वा तत्त्वदर्शिन आचार्यान् प्राप्य तदुपदिष्टमार्गेण स्वात्मत्वेनावगन्तव्योऽयमात्मा । अत्यन्तसूक्ष्मं ह्यात्मतत्त्वं शब्दस्पर्शरूपरसगन्धादिसर्वस्थूलधर्मविवर्जितत्वादव्ययम् अप्रकम्प्यं कूटस्थनित्यं च, यत्साक्षात्करणादेवाविद्याकामकर्मलक्षणान्मृत्योर्मुच्येत जन्तुः ॥

१६-१७. इदं वल्लीत्रयोपदिष्टमर्थम् आचार्येभ्यः श्रुत्वा अधिकारिभ्यश्चोक्त्वा च ब्रह्मलोके पूज्यो भवति । यश्चेमं परमं गुह्यं ब्राह्मणसंसदि श्राद्धकाले वा श्रावयेत्, तस्य तच्छ्रावणमनन्तपुण्यफलदं भवेत् ॥

## द्वितीयाध्याये – प्रथमा वल्ली

१-२. स्वभावतो पराक्प्रवणान्येवेन्द्रियाणि विषयविषयाणीत्यतः न प्रत्यगात्मदर्शनं सुखेनासाद्यते मनुष्यैः । सहस्रेषु कश्चिदेवैको वैराग्यसंपन्नो विषयेभ्यो व्यावर्त्येन्द्रियाणि, अमृतत्वफलकप्रत्यगात्मदर्शनाय प्रयतते ॥

३-९. रूपरसादिविषयोपलब्धौ यद् वेदनसामान्यं तदात्मनः स्वरूपं सर्वज्ञम् । स एव स्वप्नजागरितयोर्द्रष्टैकः स्थानद्वयव्यापी, स एव साक्षी नः प्रत्यगात्मा परमार्थतः । तद्विज्ञानाच्च शोकात्ययो भवति । कर्मफलभोक्तृसंसारीव विभाव्यमान आत्मैव वस्तुतः कालत्रयातिगः परमात्मा यो नचिकेतसा पृष्टः । योऽप्यसौ हिरण्यगर्भः प्रथमजः सर्वकरणात्मा सोऽप्येतस्मादेव ब्रह्मणो जायत इत्यत एतस्मादनन्यः । अधियज्ञमध्यात्मं च कर्मिभिर्योगिभिश्चोपास्यमानोऽग्निरप्येतदात्मकः । सूर्यस्याप्युदयास्तमयस्थानं यः प्राणः सोऽपि ब्रह्मैव परमार्थतः ॥

१०-१३. यदिदं विविधकार्यकरणोपाधिमत्त्वेन संसारिवद्भिर्भाव्यमानम् यच्च निरुपाधिकं ब्रह्म, तदेवेदम्, इदमेव च तत्; नास्त्यस्मिन् नानात्वम् किञ्चिदपि-इति सुसंस्कृतमनसैव शक्यवेदनम् । परिच्छिन्न इव प्रतीयमानोऽपि जीवो वस्तुतः कालत्रयातीतः सर्वस्वतन्त्रः परमात्मैव यो नचिकेतसा पृष्टः ॥

१४-१५. उच्छ्रितप्रदेशे वृष्टमुदकं यथा विविधं नीचैर्विकीर्णं विनश्यति, एवं भेददृष्टिवासनावासितधीः पुरुषो भूयो भूयो भिन्नभिन्नशरीरप्रतिपत्त्या संसरति; अभेददर्शनशीलस्तु शुद्धोदके समासिक्तमिव शुद्धोदकं तत्त्वविज्ञानेन ब्रह्मणि संपद्य चैतन्यैकरसतामाप्नोति ॥

## द्वितीयाध्याये - द्वितीया वल्ली

१-७. इदं शरीरमेकादशद्वारयुक्तं द्वारद्वारपालाद्यनेकोपकरणसंपन्नपुरवद् विरचितमुपलभ्यते । यथा पुरं स्वासंहतस्य राज्ञोऽर्थाय भवति, तथेदमपि शरीरं स्वासंहतस्य स्वामिन आत्मनोऽर्थाय । यदर्थोऽयं कार्यकरणसंघातः, तं कूटस्थ-चैतन्यरूपं सर्वशरीरेष्वपि समं वर्तमानं सम्यग्ज्ञानपूर्वकं ध्यात्वा न शोचति । इहैवाविद्यादिबन्धनैर्मुक्तः शरीरान्तरं न पुनः शरीरग्रहणाय कल्पते । सर्वप्राण-करणव्यापारा अपि तदर्था एव, तत्प्रयुक्ताश्च । तस्य हि विप्रयोगे सर्वमिदं कार्यकरण-कलापरूपं क्षणमात्रमपि न स्वव्यापारनिर्वर्तनसमर्थं भवति । य एवं स्वार्थोऽ-संहतश्च कार्यकरणसंघातेन, यमेव चाश्रित्यायं संघातः स्वव्यापारं कुर्वंस्तिष्ठति, तेनैव सर्वो जीवति, तदेव च परं ब्रह्म । तद्विज्ञानादेव विमुच्यते, तदविज्ञानाच्च संसरति जन्तुः ॥

८-११. योऽसौ स्वव्यापारादुपरतेषु सर्वकरणेषु स्वप्नावस्थायां सकल-मिथ्यार्थावभासकः स्वयं जागर्ति, स एव शुद्धब्रह्मसंज्ञितोऽमृतस्वरूपः । तस्मिन्नेव सर्वकारणे भूरादयो लोका आश्रितास्तिष्ठन्ति । तत्स्वरूपमतीत्य स्थातुं न कश्चन प्रभवेत् । यथैवाग्निः स्वदाह्यदार्वाद्याकारं भजमान इव दृश्यमानोऽपि स्वेन पारमार्थिकेनैकरूपेणैवावतिष्ठते सर्वदा, यथा च वायुरध्यात्मं सर्वदेहेषु प्राणात्मना प्रविष्टः तत्तद्देहानुरूपं व्याप्रियमाण इति दृश्यमानोऽपि वस्तुत एकरूप एवाव-तिष्ठते, एवमेवायमात्मा विविधदेहोपाध्यनुरोधात् विविध इव प्रतिभासमानोऽ-प्येकरूप एव तद्विलक्षणेन स्वेनाविकृतरूपेणावतिष्ठते । यथैव च सूर्य एक एव सर्वशुद्धाशुद्धपदार्थप्रकाशकत्वाद्दृश्यवस्तुद्रष्टॄणां चक्षुरनुग्राहकश्च सन्नपि न बाह्य-पदार्थदोषैस्तद्द्रष्टृचक्षुर्दोषैर्वा न लिप्यते, तथैवायमेकः सर्वभूतान्तरात्मापि न संसारदुःखेन लिप्यते ॥

१२–१३. 'अयमेक एव सर्वभूतान्तरात्मा सर्वस्य वशी स्वात्मानमेकरूपमेव नित्यदा सन्तमुपाध्यनुरोधेन बहुधा करोति, स एव चास्माकं हृदयस्थ आत्मा' इति ये शास्त्राचार्योपदेशमनु पश्यन्ति, तेषामेव शाश्वतसुखलक्षणो मोक्षो नाज्ञानाम् इतरेषाम् । 'एष एव परमात्मा स्वयमेको नित्यः स्वानुग्रहनिमित्तेनेतरेषामनित्यानां भूतानां नित्यताभ्रान्तिकारणं भवति । एष एव नित्यचैतन्यस्वरूपश्चेतनत्वेन विभाव्यमानानामनात्मनां चेतयितृत्वमादधाति । एष एव चैकः स्वयं नित्यतृप्तः सर्वेषामन्येषां कामिनां कर्मानुसारेण कामान् प्रयच्छति । स एव च नो हृदयस्थ आत्मा' इति येऽनुपश्यन्ति, तेषामेव स्वात्मानन्या नित्या शान्तिर्भवति नान्येषाम् अज्ञानाम् ॥

१४–१५. तदेतद्वाङ्मनसागोचरं परमानन्दरूपं वस्तु ब्रह्मविदः स्वात्मसाक्षिकं यथा मन्यन्ते, एवमस्मदादेरपि तदात्मसाक्षिकम् 'इदमहम्' इति भायादेव, यत्कारणं सूर्यचन्द्रादयोऽपि सर्वे तदाश्रयासक्ता एतमेव भान्तमनुभान्ति, भासयन्ति च स्वविषयान् । सर्वं चेदं तस्य भासैव विभाति । तदेवं स्वयं भास्वदिदं ब्रह्म स्वकार्यगतभासापि विभातीति न तद्दर्शने कोऽप्यायासः ॥

## द्वितीयाध्याये – तृतीया वल्ली

१–३. यस्मान्मूलादयं संसारवृक्षः प्रसृतशाखो रोहति, तदेव शुद्धममृतं ब्रह्म । तदेवाश्रित्य लोकाः सर्वे सर्वदा स्थिताः, न तदात्मतां हातुं शक्नोतीह कश्चिदपि । यद्भयादिव सर्वमिदं सूर्यचन्द्रादिलक्षणं जगदविश्रान्तं स्वव्यापारे नियमेन वर्तते, तदिदं स्वात्मप्रवृत्तिसाक्षिभूतं ब्रह्म स्वात्मत्वेन ये विदुः, ते भवन्त्यमृताः ॥

४–५. तदिदं ब्रह्म इह जीवन्नेव चेद् बोद्धुं शक्नोति, तर्हि परमपुरुषार्थसिद्धिः स्यात् । नो चेत्, शरीरपरम्पराग्रहणरूपः संसारोऽविरतो भवति । यस्मात् इहैव लोके परमात्मा स्वबुद्धिसाक्षित्वेन स्फुटमवबोद्धुं शक्यते लोकान्तरे तु विक्षेपकारणादविविक्तमेवाऽऽत्मज्ञानम् ॥

६–११. इन्द्रियाणां विषयत्वेनोत्पत्तिप्रलयत्वेन च स्वात्मविलक्षणताम्, स्वात्मनश्च तद्द्रष्टृत्वेन नित्यैकस्वभावतां च विविच्य यो बुध्यते, तस्य शोककारणं नावशिष्यते । यस्मादेवेन्द्रियमनोबुद्ध्यहङ्काराव्यक्तेभ्यः परः सर्वव्यापकः, सर्वविध-लिङ्गवर्जितश्च, तस्मादेवायं न चक्षुरादिप्रमाणैः परिच्छेद्यः । सर्वविकल्पविवर्जितया बुद्ध्या तु शक्योऽनुभवितुम् । तादृशी च बुद्धिः सर्वेन्द्रियमनोबुद्धिसंयमरूपाद् योगादवाप्यते । स च योग उपजनापायधर्मा-इत्यतोऽप्रमादेनाभ्यस्य संपादनीयः॥

१२-१६. यद्यप्ययमात्मा वाङ्मनसागोचरः, तथापि सर्वकार्याणां नियमेनास्तित्वानुगतत्वात्, सूक्ष्मतारतम्यपारम्पर्येणावेक्ष्य स्वस्वकारणे प्रविलापयतां च सद्बुद्धिविषयपरमकारणत्वेनैव पर्यवसानात्, बुद्धेश्च विषयप्रविलापनेन प्रविलाप्यमानायाः सदा सत्प्रत्ययगर्भतयैव प्रविलीयमानत्वात्, सर्वजगन्मूलभूतोऽयम् अस्तीत्येवावगन्तव्यः । एवमागमार्थानुसारिण्येवास्तित्ववादिनि तत्त्वं विमृशतः कालेन परमात्मा निरुपाधिकपरमार्थरूपेणाप्यात्मतया स्वयं प्रकाशते । सत्कार्योपाधित्वेनोपलब्धस्य हि सर्वोपाधिसंबन्धाभावेऽवगते निरुपाधिको निर्विशेषः परमार्थभावोऽपि नेतिनेत्यादिलक्षणः स्वात्मत्वेन शक्योऽवगन्तुमिति । असत्कार्यवादिनस्त्वागमबाह्यतया सर्वस्यापि निरन्वयनाशाभ्युपगमात् सर्वथापि परमार्थतत्त्वं नोपलब्धुं शक्यम् ॥

१४-१६. एतावन्मात्रं सर्ववेदान्तानुशासनं यद् ब्रह्मविद्यया अविद्याप्रत्ययानां विनाशे सति हृदि श्रिताः सर्वे कामाः प्रमुच्यन्ते । अविद्याकामकर्मलक्षणमृत्योर्विनाशादेव च परमार्थदर्शी तत्समसमयममृतो भवति । कर्मिणामुपासकानां च लोकान्तरं गतानामपि न संसारोपरमः । ब्रह्मलोकं प्राप्तानामपि ज्ञानकर्मसमुच्चयानुष्ठायिनाम् आपेक्षिकमेवामृतत्वम् । परमार्थविद्यावाप्त्या वा तत्रत्यानां कालान्तरे मुख्यममृतत्वं भवेदिति ॥

१७-१८. तदयमत्र सर्ववल्ल्यर्थः – जनानां हृदये नित्यावस्थितः पुरुषः परिच्छिन्नत्वेनावभासमानोऽपि वस्तुतः परमात्मैव । तं शरीरादिसर्वोपाधिभ्यो विविच्य नित्यशुद्धबुद्धमुक्तस्वभावब्रह्मात्मना विद्यादिति । तामेतां ब्रह्मविद्यां तदुपायं चाध्यात्मयोगं मृत्योर्लब्ध्वा नचिकेता धर्माधर्माद्यतीतब्रह्मस्वरूपं प्राप्य विमृत्युरभूत् । अन्योऽप्येवं ब्रह्म स्वात्मत्वेन यो विद्यात्, सोऽपि तथैव विमृत्युर्भवतीत्यतो जिज्ञासुभिर्ब्रह्मविद्यार्थं तत्त्वदर्श्याचार्यसेवनं कृत्वैव विद्या समासादनीया, आचार्येण च न्यायप्राप्तशिष्यनिस्तारणं करणीयं प्रीतिपूर्वकं विद्योपदेशेनेति शिवम् ॥

# मन्त्राणामनुक्रमणिका


| मन्त्रप्रतीकम् | अव. मं. | पृ. |
|---|---|---|
| अग्निर्यथैको | २-२-९ | १०१ |
| अङ्गुष्ठमात्रः पुरुषो | २-१-१२ | ८८ |
| ,, ,, | २-१-१३ | ८९ |
| ,, ,, | २-३-१७ | १३० |
| अजीर्यताममृतानाम् | १-१-२८ | २६ |
| अणोरणीयान् महतो | १-२-२० | ४९ |
| अनुपश्य यथा पूर्वे | १-१-६ | ८ |
| अन्यच्छ्रेयोऽन्यदुतैव | १-२-१ | २९ |
| अन्यत्र धर्मादन्यत्राधर्मात् | १-२-१४ | ४२ |
| अरण्योर्निहितो | २-१-८ | ८४ |
| अविद्यायामन्तरे | १-२-५ | ३२ |
| अव्यक्तात्तु परः | २-३-८ | ११८ |
| अशब्दमस्पर्शम् | १-३-१५ | ७२ |
| अशरीरं शरीरेषु | १-२-२२ | ५१ |
| अस्तीत्येवोपलब्धव्यः | २-३-१३ | १२२ |
| अस्य विस्रंसमानस्य | २-२-४ | ९६ |
| आत्मानं रथिनं विद्धि | १-३-३ | ५९ |
| आशाप्रतीक्षे सङ्गतं | १-१-८ | ९ |
| आसीनो दूरं व्रजति | १-२-२१ | ५० |
| इन्द्रियाणां पृथग्भावम् | २-३-६ | ११६ |
| इन्द्रियाणि हयानाहुः | १-३-४ | ५९ |
| इन्द्रियेभ्यः परं मनो | २-३-७ | ११७ |
| इन्द्रियेभ्यः परा ह्यर्था | १-३-१० | ६४ |
| इह चेदशकद् बोद्धुम् | २-३-४ | ११४ |
| उत्तिष्ठत जाग्रत | १-३-१४ | ७० |
| उशन् ह वै वाजश्रवसः | १-१-१ | ५ |
| ऊर्ध्वमूलोऽवाक्शाखः | २-३-१ | ११० |
| ऊर्ध्वं प्राणमुन्नयति | २-२-३ | ९६ |
| ऋतं पिबन्तौ सुकृतस्य | १-३-१ | ५६ |
| एको वशी सर्वभूतान्तरात्मा | २-२-१२ | १०४ |
| एतच्छ्रुत्वा संपरिगृह्य | १-२-१३ | ४२ |
| एतत्तुल्यं यदि मन्यसे | १-१-२४ | २४ |
| एतदालम्बनं श्रेष्ठम् | १-२-१७ | ४५ |
| एतद्ध्येवाक्षरं ब्रह्म | १-२-१६ | ४५ |
| एष तेऽग्निर्नचिकेतः | १-१-१९ | १८ |
| एष सर्वेषु भूतेषु | १-३-१२ | ६६ |
| कामस्याप्तिं जगतः | १-२-११ | ३९ |
| जानाम्यहं शेवधिः | १-२-१० | ३९ |
| तं ह कुमारं सन्तम् | १-१-२ | ५ |
| तदेतदिति मन्यन्ते | २-२-१४ | १०७ |
| तं दुर्दर्शं गूढम् | १-२-१२ | ४१ |
| तमब्रवीत् प्रीयमाणो | १-१-१६ | १५ |
| तां योगमिति मन्यन्ते | २-३-११ | १२१ |
| तिस्रो रात्रीर्यदवात्सीः | १-१-९ | १० |
| त्रिणाचिकेतस्त्रिभिरेत्य सन्धिम् | १-१-१७ | १६ |
| त्रिणाचिकेतस्त्रयम् | १-१-१८ | १८ |
| दूरमेते विपरीते | १-२-४ | ३१ |
| देवैरत्रापि विचिकित्सितम् | १-१-२१ | २२ |
| ,, ,, | १-१-२२ | २३ |
| न जायते म्रियते वा | १-२-१८ | ४६ |
| न तत्र सूर्यो भाति | २-२-१५ | १०७ |
| न नरेणावरेण | १-२-८ | ३५ |

| मन्त्रप्रतीकम् | अव. मं. | पृ. |
|---|---|---|
| न प्राणेन नापानेन | २-२-५ | ९६ |
| न वित्तेन तर्पणीयो | १-१-२७ | २५ |
| न संदृशे तिष्ठति | २-३-९ | ११९ |
| न सांपरायः प्रतिभाति | १-२-६ | ३३ |
| नाचिकेतमुपाख्यानम् | १-३-१६ | ७४ |
| नायमात्मा प्रवचनेन | १-२-२३ | ५२ |
| नाविरतो दुश्चरितात् | १-२-२४ | ५३ |
| नित्योऽनित्यानाम् | २-२-१३ | १०५ |
| नैव वाचा न मनसा | २-३-१२ | १२२ |
| नैषा तर्केण मतिरापनेया | १-२-९ | ३७ |
| पराचः कामाननुयन्ति | २-१-२ | ७८ |
| पराञ्चि खानि व्यतृणत् | २-१-१ | ७६ |
| पीतोदका जग्धतृणा | १-१-३ | ६ |
| पुरमेकादशद्वारम् | २-२-१ | ९३ |
| प्र ते ब्रवीमि तदु | १-१-१४ | १४ |
| बहूनामेमि प्रथमो | १-१-५ | ७ |
| भयादस्याग्निस्तपति | २-३-३ | ११४ |
| मनसैवेदमाप्तव्यम् | २-१-११ | ८७ |
| महतः परमव्यक्तम् | १-३-११ | ६४ |
| मृत्युप्रोक्तां नचिकेतोऽथ | २-३-१८ | १३१ |
| य इमं परमम् | १-३-१७ | ७४ |
| य इमं मध्वदम् | २-१-५ | ८२ |
| य एषु सुप्तेषु जागर्ति | २-२-८ | ९९ |
| यच्छेद्वाङ्मनसी प्राज्ञः | १-३-१३ | ६९ |
| यतश्चोदेति सूर्यो | २-१-९ | ८५ |
| यथादर्शे तथा | २-३-५ | ११५ |
| यथा पुरस्ताद्भविता | १-१-११ | १२ |
| यथोदकं दुर्गे वृष्टम् | २-१-१४ | ९० |
| यथोदकं शुद्धे शुद्धम् | २-१-१५ | ९१ |
| यदा पञ्चावतिष्ठन्ते | २-३-१० | १२० |
| यदा सर्वे प्रभिद्यन्ते | २-३-१५ | १२७ |
| यदा सर्वे प्रमुच्यन्ते | २-३-१४ | १२६ |
| यदिदं किञ्च जगत्सर्वम् | २-३-२ | ११३ |
| यदेवेह तदमुत्र | २-१-१० | ८६ |
| यस्तु विज्ञानवान् भवति | १-३-६ | ६१ |
| ,, ,, ,, | १-३-८ | ६२ |
| यस्त्वविज्ञानवान् | १-३-५ | ६१ |
| ,, ,, | १-३-७ | ६२ |
| यस्मिन्निदं विचिकित्सन्ति | १-१-२९ | २७ |
| यस्य ब्रह्म च क्षत्रं च | १-२-२५ | ५४ |
| यः पूर्वं तपसो | २-१-६ | ८३ |
| यः सेतुरीजानानाम् | १-३-२ | ५८ |
| या प्राणेन संभवति | २-१-७ | ८४ |
| येन रूपं रसं गन्धम् | २-१-३ | ७९ |
| येयं प्रेते विचिकित्सा | १-१-२० | २१ |
| ये ये कामा दुर्लभा | १-१-२५ | २४ |
| योनिमन्ये प्रपद्यन्ते | २-२-७ | ९८ |
| लोकादिमग्निम् | १-१-१५ | १५ |
| वायुर्यथैको भुवनम् | २-२-१० | १०१ |
| विज्ञानसारथिर्यस्तु | १-३-९ | ६२ |
| वैश्वानरः प्रविशत्यतिथिः | १-१-७ | ९ |
| शतं चैका च हृदयस्य | २-३-१६ | १२८ |
| शतायुषः पुत्रपौत्रान् | १-१-२३ | २३ |
| शान्तसंकल्पः सुमनाः | १-१-१० | ११ |
| श्रवणायापि बहुभिः | १-२-७ | ३४ |
| श्रेयश्च प्रेयश्च | १-२-२ | ३० |
| श्वोभावा मर्त्यस्य | १-१-२६ | २५ |
| स त्वमग्निं स्वर्ग्यम् | १-१-१३ | १३ |
| स त्वं प्रियान् | १-२-३ | ३१ |
| सर्वे वेदा यत्पदम् | १-२-१५ | ४३ |

| मन्त्रप्रतीकम् | अव. मं. | पृ. | मन्त्रप्रतीकम् | अव. मं. | पृ. |
|---|---|---|---|---|---|
| सह नाववतु | २-३-१९ | १३२ | स्वर्गे लोके न भयम् | १-१-१२ | १२ |
| स होवाच पितरम् | १-१-४ | ६ | हंसः शुचिषद् | २-२-२ | ९५ |
| सूर्यो यथा सर्वलोकस्य | २-२-११ | १०२ | हन्त त इदं प्रवक्ष्यामि | २-२-६ | ९८ |
| स्वप्नान्तं जागरितान्तं च | २-१-४ | ८१ | हन्ता चेन्मन्यते | १-२-१९ | ४८ |

# परिशिष्टम्

## ( तैत्तिरीयब्राह्मणे ३-११-८ )

उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ । तस्य ह नचिकेता नाम पुत्र आस । तꣳ ह कुमारꣳ सन्तं दक्षिणासु नीयमानासु श्रद्धाविवेश । स होवाच तत कस्मै मां दास्यसीति । द्वितीयं तृतीयमिति ॥

### ( सायणभाष्यम् )

वाजोऽन्नम् । तद्दाननिमित्तं श्रवः कीर्तिः यस्यासौ वाजश्रवाः कश्चिन्मुनिर्गौतमगोत्रोत्पन्नः ; तस्य पुत्र उद्दालकाख्यो मुनिर्वाजश्रवसः । स च कदाचित् सर्वस्वदक्षिणाकेन विश्वजिदादियागेन उशन् , तत्फलं कामयमानः, यागमध्ये सर्ववेदसं सर्वस्वं ऋत्विग्भ्यो ददौ । तस्मिन् काले तस्योद्दालकस्य कश्चित्पुत्रो नचिकेता नामासीत् । स चोपनयनयोग्यवयस्कः कुमारो भूत्वा तदा वर्तते । तं कुमारं सन्तं नचिकेतसम् , ऋत्विजः प्रति दक्षिणासु पित्रा नीयमानासु, अतिशयेन श्रद्धाऽऽविवेश । यथाशास्त्रं दक्षिणा दातव्येत्येषा बुद्धिः श्रद्धातिशयः । श्रद्धाविशिष्टः स कुमारो मनस्येवं विचारयामास । कर्मसाद्गुण्यार्थं पित्रा सर्वस्वं दातव्यम् । अहं च पितुः स्वम् । तस्माद्दातव्योऽहम्-इति विचार्य पितरं प्रत्येवमुवाच – हे तत हे पितः, कस्मा ऋत्विजे मां दास्यसीति । तदानीं बालोऽयं मुग्ध इति तद्वचनमुपेक्ष्य तूष्णीं स्थितं पितरं प्रति द्वितीयं वारं तृतीयं वारं च तथैवोवाच ॥

तꣳ ह परीत उवाच । मृत्यवे त्वा ददामीति ॥

### ( भाष्यम् )

पितुरुत्तरं दर्शयति – तꣳ हेति । अयं तावन्मुग्धो न भवति, किं तु धूर्त इत्येवं कुपितः सन् , तदाभिमुख्येन पर्यावृत्तः क्रोधावेशात् 'मृत्यवे त्वा ददामि' इति तं कुमारमुवाच ॥

तꣳ ह स्मोत्थितं वागभिवदति गौतम कुमारमिति । स होवाच । परेहि मृत्योर्गृहान् । मृत्यवे वै त्वादाम् इति ॥

( भाष्यम् )

अस्मिन्नवसरे काचिददृश्यमानशरीरा दैवी वाक् तं नचिकेतसं समनुजग्राह । तदनुग्रहप्रकारं दर्शयति – तं ह इति । कोपयुक्तं पितुस्तद्वचनं श्रुत्वा पितुः सकाशात् परतो गन्तुं तं होत्थितं कुमारम् अभिमुखीकृत्य अनुग्रहपरा दैवी वाक् इत्थं वदति स्म । किमिति ? तदुच्यते – हे गौतमगोत्रोत्पन्न नचिकेतः, स खलु तव पिता एवमुवाच । तद्वचनस्यायमभिप्रायः – हे पुत्र, मृत्योर्गृहान् प्रति परेहि गच्छ । मृत्यवे त्वामहं दत्तवानस्मीति ॥

तं वै प्रवसन्तं गन्तासीति होवाच । तस्य स्म तिस्रो रात्रीरनाश्वान् गृहे वसतात् । स यदि त्वां पृच्छेत् – कुमार कति रात्रीरवात्सीरिति । तिस्र इति प्रतिब्रूतात् । किं प्रथमां रात्रिमाश्ना इति । प्रजां त इति । किं द्वितीयामिति । पशूंस्त इति । किं तृतीयामिति । साधुकृत्यां त इति ॥

( भाष्यम् )

इत्थं तत् पितुरभिप्रायं विशदीकृत्य सा वाग्देवता कुमारमनुग्रहीतुं बुद्धिप्रदानं करोति – हे नचिकेतः, यमो यदा गृहान्निर्गत्य यत्र क्वापि प्रवसति तं प्रवसन्तं निश्चित्य तद्गृहे गन्तासि गमिष्यसि । गच्छेत्यर्थः । एवमुक्त्वा पुनरप्येवमुवाच – तस्य यमस्य गृहे गत्वा यमदर्शनाभावे तदीयपुत्रभार्यादिभिः प्रार्थितोऽपि त्वं दिनत्रयम् अनाश्वान् भोजनरहितो निवासं कुरु । तावत् समागत्य स यमो यदि त्वां प्रति हे कुमार कति रात्रीरिहोषितवान् ? – इति पृच्छेत्, तदानीं तिस्र इत्येव सत्यमेव प्रत्युत्तरं ब्रूहि । ततः प्रथमदिने किं भुक्तवानसि ? – इत्येवं पृष्टः सन्, त्वदीयां प्रजां भक्षितवानस्मि – इत्येवं प्रत्युत्तरं ब्रूहि । अतिथिर्गृहे समागत्य भोजनरहितो वसति चेत् तस्य गृहस्वामिन एकदिनभोजनराहित्यमात्रेण प्रजाक्षयो भवति–इत्येतच्छास्त्ररहस्यं तेन वाक्येन सूचितं भवति । एवं द्वितीयतृतीयदिवसयोरुपवासेन पशुक्षयं सुकृतक्षयं चासूचयत् ॥

तं वै सन्तं जगाम । तस्य ह तिस्रो रात्रीरनाश्वान् गृह उवास । तमागत्य पप्रच्छ कुमार, कति रात्रीरवात्सीरिति । तिस्र इति प्रत्युवाच । किं प्रथमां रात्रिमाश्ना इति । प्रजां त इति । किं द्वितीयामिति । पशूंस्त इति । किं तृतीयामिति । साधुकृत्यां त इति ॥

( भाष्यम् )

तदेवं वाग्देवतया शिक्षितो नचिकेतास्तथैव चकारेत्येतद् दर्शयति – तं वा इति। पूर्ववद् व्याख्येयम् ॥

## नमस्ते अस्तु भगव इति होवाच । वरं वृणीष्वेति ॥

( भाष्यम् )

एतावता शास्त्रार्थरहस्याभिज्ञोऽयं कुमारो न तु मूर्खः ; तस्मात् सत्कारार्हो न मारणीय इत्येवं निश्चित्य यं सत्कारं चकार तं दर्शयति – नमस्त इति । उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् । वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति । (वि. पु. ६-५-७८) एतच्छास्त्रानुसारेण नचिकेतसम् अभिज्ञं मत्वा भगवच्छब्देन संबोध्य दिनत्रयोपवासकृतं स्वापराधं परिहर्तुं वरत्रयं दत्तवान् । सोऽयमर्थः कठवल्लीष्वस्मिन्नेव नाचिकेतोपाख्याने विस्पष्टमाम्नातः 'तिस्रो रात्रीर्यदवात्सीर्गृहे मेऽनश्नन् ब्रह्मन्नतिथिर्नमस्यः । नमस्तेऽस्तु ब्रह्मन् स्वस्ति मेऽस्तु तस्मात् प्रति त्रीन् वरान् वृणीष्व' ( का. १-१-९ ) इति । प्रतिशब्देन प्रतिदिनोपवासनिमित्तापराधपरिहारायेत्ययमर्थ उच्यते ॥

## पितरमेव जीवन्नेयानीति ॥

( भाष्यम् )

नचिकेतसा वृतं **प्रथमं वरं** दर्शयति – पितरमेवेति । हे यम, त्वयाहममारितो जीवन्नेव मदीयं पितरं प्राप्नवानि सोऽयं प्रथमो वर इति ॥

## द्वितीयं वृणीष्वेति । इष्टापूर्तयोर्मेऽक्षितिं ब्रूहीति होवाच । तस्मै हैतमग्निं नाचिकेतमुवाच । ततो वै तस्येष्टापूर्ते न क्षीयेते ॥

( भाष्यम् )

अथ प्रश्नोत्तराभ्यां **द्वितीयं वरं** दर्शयति – द्वितीयं वृणीष्वेति । द्वितीयवरार्थं प्रार्थितोऽयं कुमारो मदीययोः श्रौतस्मार्तसुकृतयोरक्षयहेतुं ब्रूहीत्येतादृशं वरं वृतवान् । ततो यमस्तस्मै नचिकेतस एतं पूर्वानुवाकेष्वभिहितं चेतव्यमुपास्यं च द्विविधं नाचिकेत-नामाङ्कितमग्निमुवाच । तन्नामाङ्कितत्वं कठवल्लीषु (१-१-१९) स्पष्टीकृतम् – 'एष तेऽग्निर्नचिकेतः स्वर्ग्यो यमवृणीथा द्वितीयेन वरेण । एतमग्निं तवैव प्रवक्ष्यन्ति जनास' इति । ततो नाचिकेताग्निचयनादग्निध्यानाच्च तस्य नचिकेतसः श्रौतस्मार्तसुकृते न क्षीयेते, अल्पफले न भवतः ॥

नास्येष्टापूर्ते क्षीयेते योऽग्निं नाचिकेतं चिनुते य उ चैनमेवं वेद ॥

( भाष्यम् )

नचिकेतस इवान्यस्यापि श्रौतस्मार्तसुकृतयोरक्षयं दर्शयति – नास्येति ॥

तृतीयं वृणीष्वेति । पुनर्मृत्योर्मेऽपचितिं ब्रूहीति होवाच । तस्मै हैतमग्निं नाचिकेतमुवाच । ततो वै सोऽपपुनर्मृत्युमजयत् । अपपुनर्मृत्युं जयति योऽग्निं नाचिकेतं चिनुते य उ चैनमेवं वेद ॥

( भाष्यम् )

पुनरपि प्रश्नोत्तराभ्यां वरान्तरं दर्शयति – वर्तमानस्य मनुष्यशरीरस्य सकृन्मृत्युरवश्यम्भावी । तदूर्ध्वं पुनरप्यर्वाचीनजन्मस्वीकारे सति पुनर्मृत्युर्भवति । जन्मस्वीकारं विना मुक्तौ सत्यां सोऽयं पुनर्मृत्युरपजीयते । मृत्योरपजयः पुरुषस्यैव जयः । तादृशं पुनर्मृत्योरपजयहेतुं ब्रूहीत्येष तृतीयो वरः । एवं वृणानाय तस्मै नचिकेतसे पुनर्मृत्युजयहेतुत्वेन तमेव द्विविधं नाचिकेताग्निमुक्तवान् । चयनोपासनयोर्मध्ये चयनस्य प्राधान्यम् उपासनस्योपसर्जनत्वं यस्य पुंसः संपद्यते, तस्येष्टापूर्तयोरक्षयत्वमात्रं चिरं पुण्यलोकमनुभूय पुनर्जन्मस्वीकारः । यस्य तूपासनं प्रधानं चयनमुपसर्जनं, तस्य ब्रह्मलोकप्राप्तिद्वारा मुक्तिरेव, न तु जन्मान्तरम् । तस्मान्मृत्योर्जय इत्येवं द्वयोर्विभागः । ततो वै तस्मादेव प्रधानभूतादुपासनात् स नचिकेताः पुनर्मृत्युं जितवान् । अन्योऽपि विद्याप्राधान्ये सति तद्वन्मृत्युं जयति ॥

# अथ भाष्यस्थमुख्यशब्दसूची

अत्र दत्ताः संख्या भाष्यभागपरामर्शिन्यः

-:—:-


**अक्षरम्** (ओङ्कारः), ४३.

**अग्निः** (विराट्, नाचिकेताग्न्यभेदेन निर्दिष्टः), ३, १६, १७, १८, १९, २१, २२, ३८; (भूतविशेषः), २२.

**अग्निविद्या** (नाचिकेताग्निचयनम्, विराडुपासनं च), ३, १६, २१.

**अग्निविज्ञानम्** २१.

**अग्र्या बुद्धिः** (एकाग्रबुद्धिः), ५९.

**अचिन्त्यशक्तिः** (ईदृश्य इयत्य इमे इति चिन्तयितुमशक्या नैका शक्तयः यस्य), ८९.

**अज्ञानम्** (क्रियाकारकाध्यारोपणम्), २३.

**अज्ञाननिद्रा** (अविद्या, आत्मप्रबोधविनाश्या), ६१.

**अणुः** (अतीन्द्रियः, सूक्ष्मः, परमात्मा), २५, ४०.

**अतिसूक्ष्मम्** (सर्वथापि अतीन्द्रियम्), ६९, ८७.

**अद्वय आत्मा** (अणुपरिमाणः), ३६, ४६; (द्वितीयरहित आत्मा), ७९, १०५.

**अधिकारिविषयप्रयोजनसंबन्धाः** (ग्रन्थानुबन्धचतुष्टयम्), ५.

**अधिदैवम्** (देवेषु), ७४.

**अधियज्ञम्** (यज्ञे), ७३.

**अध्यात्मम्** (शरीरे), ७३, ७४; (निरुपचरितप्रत्यक्स्वरूपम्), १११.

**अध्यात्मयोगः** (मनस आत्मन्येव समाधानम्), ३९.

**अध्यारोपणम्, अध्यासः** (अन्यथाकल्पनम्), २३, ८८.

**अनाद्यविद्या** (अचिन्त्यानादिमदज्ञानम्, आत्मानात्मनोरितरेतराध्यासः), ६१.

**अनुष्ठानम्** (ज्ञानपूर्वकं ध्यानम्), ८०.

**अन्तरात्मा** (सर्वान्तर आत्मा, परमात्मा), ११०.

**अन्तःकरणोपाधिः** (अङ्गुष्ठमात्र आत्मा), ७७.

**अपरं ब्रह्म** (उपास्यम्), ४३, ५४, ९३.

**अभ्युदयः** (शास्त्रचोदितसाधनफलम्), ३०.

**अमृत** (अमरणधर्मि ब्रह्म), ९४; (मुक्तः), ९५, १०१, ११०.
**अमृताः** (देवाः), २८.
**अमृतत्वम्** (देवत्वम्), १६. (आपेक्षिकम्, ब्रह्मलोके), १०९; (मुक्तिः), ३०, १०९, ११०.
**अलिङ्गः** (बुद्ध्यादिलिङ्गरहितः), १००, १०१.
**अविद्या** (मिथ्याज्ञानम्, अध्यासः), ३३, ६७, ७५, ८५, ८६, ८८.
**अविद्यातिमिरदृष्टिः** (मिथ्यादृष्टिः), ७६.
**अविद्याकामकर्माणि** (संसारकारणानि), ६७.
**अविद्याकामकर्मलक्षणः** (मृत्युः), १०६.
**अविद्याकृतकामकर्मबन्धनम्** (अविद्याकामादिबन्धनम्), ८०.
**अविद्याग्रन्थयः** (अविद्याप्रत्ययाः), १०७, १०८.
**अविद्यातृष्णे** (पराग्दर्शनकामौ, ज्ञानप्रतिबन्धरूपौ), ६७.
**अविद्यादिसंसारबीजानि, अविद्यादिसंसारहेतवः** (अविद्याकामकर्माणि), २, ४.
**अविद्याध्यारोपणम्** (आत्मन्यविद्याकल्पनम्), १०३.
**अविद्याप्रत्ययाः** (ग्रन्थिशब्दवाच्याः, शरीरादितादात्म्यप्रत्ययाः), १०७.
**अविद्यामायाच्छन्नः** (अविद्याकल्पितमायाच्छन्नः), ५९.
**अविद्यारूपम्** (प्रेयः), ३०.
**अविद्याव्यवधानम्** (न केनचिदन्तरितम्, अज्ञानमात्रेण परोक्षमेव), ८९.
**अव्यक्तम्** (जगतः प्रागवस्था, अव्याकृताकाशादिशब्दवाच्या), ५८.
**अव्यक्तबीजम्** (अव्यक्तलक्षणम् उपादानकारणम्), ९३.
**अव्यक्तादिस्थावरान्तः** (व्याकृताव्याकृतरूपो संसारवृक्षः), ९३.
**अव्ययम्** (यत् सर्वथा न व्येति), ६२.
**अव्याकृतम्** (अव्यक्तशब्दो द्रष्टव्यः)
**अशरीरः** (परमार्थरूपेण शरीररहितः), ४८.
**अशेषविशेषरहितः** (जातिद्रव्यगुणक्रियादिविशेषरहितः), ४४.
**असंस्कृतबुद्धिः** (शमदमादिसंस्काररहिता बुद्धिः), ५९.
**असंहतः** (स्वार्थः, स्वतन्त्रः, नान्यसहकारापेक्षः), ७०.
**आकाशः** (सर्वप्रथमं सृज्यमानं भूतम्), (१) (परमात्मनो दृष्टान्तः), ४४, ४५, ४८, ७५, ८९. (२) (सूक्ष्मतमं भूतम्), ६२; (३) (श्रोत्रेन्द्रियकारणम्), ९९; (४) (अव्याकृतम्), ५८.
**आगमः** (सांप्रदायिक उपदेशक्रमः), ३६, ३७; (श्रुत्युपदेशः), १०४.
**आचार्यः** (शास्त्रार्थोपदेशकोऽनुभववान् गुरुः), १. ३६, ४०, ६३.

**आचार्यागमसंस्कृतम्** (आचार्याद्युपदेशजनितसंस्कारवत् मनः), ७६.
**आत्मकामः** (आत्मज्ञानमेव कामयिता), ४९.
**आत्मज्ञानम्, आत्मविज्ञानम्, आत्मावबोधः** (तत्त्वतः), २३, २९, ६१, ९१.
**आत्मदर्शनम्** (विविक्ततया आत्मानुभवः), ६७, ९८.
**आत्मभावः** (आत्मत्वम्, भावनया आप्तः साक्षात्कारः), २० ; (आत्मत्वं ज्ञानम्), ६९.
**आत्मा** (परमात्मा), २३, २५, ३६, ३९, ४०, ४४, ४५, ४६, ४७, ४८, ४९, ५१, ६१, ६२, ६५, ६८, ७०, ७९, ८८, ८९, ९८, ९९, १००, १०१, १०२, १०३, १०५; (संसारी), ५५, ७९, ८३ ; (शरीरम्), ७७ ; (बुद्धिः), ९८.
**आत्मानन्दः** (आत्मस्वरूपभोग आनन्दः), ८९.
**आत्मैकत्वम्** (सर्वेषामप्येकेनैवात्मना आत्मवत्त्वम्), ८७.
**आत्यन्तिकनिःश्रेयसम्** (पुनरावृत्तिरहितो मोक्षः), २३.
**आपेक्षिकं नित्यम्** (इतरापेक्षया नित्यम्, चिरकालस्थायि), ३८.
**आलम्बनम्** (प्रतीकम्, ब्रह्मत्वेन ध्येयम्), ४३.
**आसुरः पक्षः** (आत्मनास्तित्ववादः, देहात्मवादः), १०५).
**उत्कृष्टब्रह्मविद्या** (परब्रह्मविद्या), १०८.
**उपनिषत्** (ब्रह्मविद्या), २ ; (विराडुपासनम्, अग्निविद्या), ३ ; (ब्रह्मविद्या-प्रतिपादको ग्रन्थः), ४.
**उपाधिः** (आत्मवस्तुन्यतथाज्ञाने कारणभूता देहादयः), ४७, ५५, ७५, ७७, ८९, १०५.
**एकत्वविज्ञानम्** (अद्वयात्मविज्ञानम्), ७६.
**एकदेशविज्ञानम्** (परिच्छिन्नज्ञानम्, विशेषज्ञानम्), ४७.
**एकरसम्** (एकात्मकम्, जात्यन्तररहितम्), ७६, ७९, ८९.
**एकाग्रता** (मनसोऽविक्षिप्ततया एकत्रैव स्थितत्वम्), ५९.
**एकैकगुणापकर्षः** (भूतेषु), ६२.
**एषणा** (पुत्रवित्तलोकविषयः कामः), ६७, ८०, ९१.
**ओंप्रतीकम्** (ओंकारे उपास्यमानम्), ४२.
**ओंशब्दवाच्यम्** (ओंकाराभिधेयम्), ४२.
**ओंशब्दप्रतीकम्** (ओंकारमालम्ब्य ध्येयम्), ४२.
**कार्यकरणानि** (देहेन्द्रियाणि), ७१, ७५, ८३.
**कार्यकरणलक्षणानि** (भूतानि), ७१.

कार्यप्रविलापनम् (अविद्याकृतस्य कारणात्मतादर्शनेन प्रविलापनम्), १०४.
कुतार्किकाः (केवलतर्कानुसारिणः), ७९, ८७.
कुदृष्टयः (वेदविरुद्धदर्शनाः), ७९.
कूटस्थः (निर्विकारः), ७७.
क्रियाकारकफलानि (आत्मनि कल्पितसंसाररूपाणि), २३, ६१.
क्षणभङ्गवादः (प्रतिक्षणं विध्वंसमानं विज्ञानमेवात्मा इति वादः), ७७.
खानि (इन्द्रियाणि), ६६.
गतिः (अवगतिः), ३६, ५९.
गन्धर्वनगरमरीच्युदकमायासमाः (मिथ्याभूता परमात्माश्रिता लोकाः), ९४.
गुहा (हृदयम्, बुद्धिः), १७, ३९, ५३, ७१, ७२.
ग्रन्थयः (अविद्याप्रत्ययाः), १०७, १०८.
चिन्मात्रघनः, चिन्मात्रस्वरूपः (चिदेकस्वरूपः), ५८, ९९.
जन्तुः (जीवः, ब्रह्मादिस्तम्बपर्यन्तः), ४६.
जीवः (प्राणादिधारयिता), ७०.
जीवन्नेव ब्रह्मभूतः (जीवन्मुक्तः), १०८.
ज्ञानकर्मसमुच्चयः (कर्मोपासनासमुच्चयः, वैराजपदफलकः), २०.
ज्ञानमार्गः (ज्ञानेनात्मप्राप्तिप्रकारः), ६१.
ज्ञानात्मा (बुद्धिरूप आत्मा), ९०.
ज्ञानानि (इन्द्रियाणि), १०२.
तत्त्वविदः (अनुभविनः), ६१.
तपः (ज्ञानादिलक्षणम्), ७१.
तर्कः (स्वबुद्ध्यभ्यूहलक्षणः), ३७.
त्रिणाचिकेतः (त्रिःकृत्वो नाचिकेताग्निं चितवान्, (तदध्ययनविज्ञानवान्), २०, ५३
दर्शनश्रवणमननविज्ञानादिलिङ्गः (दर्शनादिभिस्तत्कर्तृत्वेन प्रत्यभिज्ञेयः), ४६.
दृष्टादृष्टविषयाः (दृष्टानुश्रविकविषयाः, ऐहिकामुष्मिकविषयाः), २, ४६.
देवः (देवता), २७, ६७, ७१, ७४; (करणानि), ७४, ८२; (विराट्), २०; (परमात्मा), ३९, ४७.
देहादिसंघातः (देहेन्द्रियसंहतिः), ६८.
धर्मः (वस्तु, आत्मा), २५, २६, ७८.
धातवः (करणानि), ४६.
ध्रुवम् (कूटस्थनित्यम्), ६२.
नानात्वप्रत्युपस्थापिका (अविद्या), १६.

**नामरूपकर्मत्रयम्** (व्याकृतं जगत्), ६१.
**नित्यविज्ञप्तिस्वरूपम्, नित्यविज्ञानघनस्वभावम्** (चैतन्यैकस्वरूपम्), ६२, ७५.
**निरन्वयं प्रविलीयते** (कारणसहितमभावान्तं नश्यति), १०४.
**निरस्ताशेषविशेषम्** (सर्वविशेषशून्यम्), १०८.
**निरुपाधिकम्** (सर्वोपाधिरहितम्, निर्विशेषम्), १०५.
**निःश्रेयसम्** (मुक्तिः), २३, ३०.
**पञ्चाग्नयः** (द्युपर्जन्यादिष्वग्निभावनारूपविद्याशीलिनः), ५३.
**परं ब्रह्म** (वेदान्तार्थभूतं ज्ञेयं ब्रह्म), २, ५३, ९३, ९५.
**परः पुरुषार्थः** (मोक्षः), २४.
**परमं पदम्** (आत्मनः सतत्त्वम्), ५८.
**परमात्मा** (सर्वस्यापि मुख्य आत्मा), ५७.
**परमार्थसत्यम्** (सर्वथापि सत्यम्, न सत्यत्वेन लोके व्यवह्रियमाणम्), ९४.
**परार्थाः** (अन्यस्य प्रयोजनाय कार्यकारिणः), ८४.
**परार्धः** (ब्रह्मणः स्थानम्), ५३.
**पाषण्डाः** (पाखण्डाः, अवैदिकमार्गस्थाः), ९३.
**पुरुषः** (मनुष्यः), १२, ३०; (सर्वत्र पूर्णः परमात्मा), ५८, ५९, ७७.
**पुरुषार्थः** (पुरुषेणार्थ्यमानं फलम्), २८, ३०.
**प्रतीकम्** (ब्रह्मत्वेनोपास्यमिति श्रुत्युदाहृतं वस्तु, ब्रह्मप्राप्त्यालम्बनम्), ४३.
**प्रत्यगात्मा** (अन्तरात्मा, व्यापकः सारभूतश्च), ४८, ५९, ६६, ७१.
(२) (तत्सारभूतं वस्तु), ५८.
**प्रत्यवायः** (अकरणादुत्पत्स्यमानो दोषः), १२.
**प्रत्यस्तमितसर्वोपाधिः** (निरुपाधिक आत्मा), १०५.
**प्रथमजः** (हिरण्यगर्भः), ६०.
**प्रथमशरीरी** (विराट्), १८.
**प्रदीपनिर्वाणवत्** (यथा प्रदीपो ज्योतिःसामान्ये प्रशान्तो भवति तद्वत्), १०६.
**प्रयोजनम्** (पुरुषार्थः), २९, ३०.
**प्रवृत्तिनिवृत्ती** (पुरुषार्थसाधने प्रवृत्तिः, अनर्थहेतोर्निवृत्तिश्च), ५६.
**प्राकृतः** (प्रकृतिकृतदेहाद्यभिमानवान्), २५, ३६, ५१.
**प्राणः** (आध्यात्मिको वायुवृत्तिविशेषः), ८२, ८४; (आध्यात्मिको आधिदैवश्च प्राणः, परमार्थतः परमात्मा), ७४, ९५.
**बुद्धिः** (अध्यवसायवृत्तिमदन्तःकरणम्), ५५, ५६, ५७, ५८, ६०, १०२, १०४, १०५; (अन्तःकरणम्), ६१; (महत्तत्त्वम्), ६२.

**बोधाबोधात्मकम्** (हैरण्यगर्भं तत्त्वम्), ५८.
**ब्रह्म** (ब्राह्मण्यम्), ५१; (परंब्रह्म, परमात्मतत्त्वम्), २, ४०, ५३, ५८, ६२, ७३, ७४, ७५, ७६, ७८, ८०, ८५, ८६, ९४, ९५, १०१, १०४; (अपरम् उपास्यं ब्रह्म), ५४.
**ब्रह्मलोकः** (हिरण्यगर्भस्य वासस्थानम्), ४३, ९८; (परं ब्रह्म), ४३, ६३.
**ब्रह्मजज्ञः** (ब्रह्मणः पुत्रः विराट्), ३, २०.
**ब्रह्मचर्यम्** (गुरुकुले वासः), ४२.
**ब्रह्मविदः** (ब्रह्मज्ञानिनः), ५३, ५४.
**ब्रह्मसंसत्** (ब्राह्मणानां संसत्), ६४.
**ब्रह्मविद्या** (ब्रह्मज्ञानम्, उपनिषच्छब्दवाच्यम्), २, १११.
**ब्रह्मविद्याचार्यः** (ब्रह्मविद्यासंप्रदायकर्ता गुरुः), १.
**ब्रह्मा** (हिरण्यगर्भः), २०, २८, १०९.
**ब्रह्मात्मदर्शनम्, ब्रह्मात्मप्रत्ययः, ब्रह्मात्मैकत्वविज्ञानम्** (ब्रह्मणः स्वात्मत्वेनानुभवः), ९३, १०७.
**ब्रह्मादयः प्राणिनः, ब्रह्मादिस्तम्बपर्यन्तानि, ब्रह्मादिस्थावरान्तानि** (भूतानि), ४६, ५९, ७५, ९०.
**भूतसूक्ष्मम्** (भूतानां सूक्ष्मरूपं मनोबुद्ध्यादिलक्षणम्), ५८.
**भोक्ता** (संसारी, शरीरेन्द्रियमनउपाधिकः), ५५.
**मनः** (संकल्पविकल्पाद्यात्मकम् अन्तःकरणम्), ५५, ५६, ५७, ५८; (अन्तःकरणम्), ७६.
**मन्दब्रह्मविदः** (अपरब्रह्मोपासकाः), १०८.
**महान् आत्मा** (हैरण्यगर्भतत्त्वम्), ५८, ६०.
**माया** (इन्द्रजालम्), ९३, ९४; (अविद्यारूपा, अविद्याकल्पितनामरूपलक्षणा वा), ५९.
**मायामरीच्युदकगन्धर्वनगरादिवत्** (दृष्टनष्टस्वरूपस्य संसारस्य दृष्टान्तः), ९३.
**मिथ्याज्ञानविजृम्भितम्** (अविद्याकल्पितम्), ६१.
**मृत्युः** (यमः), १, ९, १०, १५, १८, १११; (अविद्याकामकर्मसमुदायः), ६२, ६७, १०६; (मरणम्), ७५, ७६.
**मृत्युपाशाः** (अधर्माज्ञानादयः), २१; (जननमरणाद्यनर्थाः), ६७.
**योगः** (आत्मनि मनःसमाधानम्), द्र. 'अध्यात्मयोगः', १०३, १११.
**योगक्षेमौ** (शरीराद्युपचयरक्षणे), ३१.
**रज्जुशुक्त्यूषरगगनानि** (सर्पादिविकल्पनानामास्पदभूतानि), ८८.

लिङ्गम् (आत्मस्वरूपाधिगमे साधनम्), ८२.
वासुदेवाख्यः (परमात्मा), ५७.
विज्ञानम् (अनुभवः), ६८, ८०, ८५.
विज्ञानप्रकाशः, विज्ञानस्वभावः, विज्ञानघनस्वभावः, विज्ञानैकरसः (चैतन्यमात्रस्वरूपः आत्मा), ६८, ७५, ८२.
विपरीतबुद्ध्यध्यासः (मिथ्याज्ञानकृताध्यारोपः), ८८.
विद्या (ब्रह्मविज्ञानम्), २, ४, ५, ६, ३३, ५२, ५५, १११; (उपासनम्), ३.
विशुद्धविज्ञानघनरूपम् (शुद्धचिन्मात्ररूपम्), ८९.
विशेषविज्ञानस्थः (दृष्टिश्रुत्यादिलक्षणज्ञानवान्, जाग्रत्स्वप्नयोः), ४७.
विश्वजित् (सर्वस्वदक्षिणाको यागः), ६.
वृत्तिः (ग्रन्थस्य व्याख्यानरूपं भाष्यम्), १; (वर्तनम्), १०.
वैराजं पदम् (प्रजापतेः स्थानम्), २०
शान्तदर्पाः (विद्याधिकारिणः), ७९.
शान्तात्मा (निर्विशेष आत्मा), ६०.
शाश्वतं सुखम् (नित्यानन्दः, मोक्षः), ८९.
शाश्वती शान्तिः (नित्योपरतिः, मोक्षः), ९०.
संसारः (जननमरणलक्षणः), ५५, ५७.
संसारभोगः (इहामुत्रफलभोगः), ३८.
संसारबीजम्, संसारहेतुः (अविद्याकामकर्मलक्षणम्), २
संस्कृतबुद्धिः, संस्कृतात्मा (शास्त्राचार्योपदेशेन संस्कृतमन्तःकरणं यस्य), ३५, ५९.
संहताः (संभूयपरार्थकारिणः), ८४.
सङ्कल्पविकल्पाद्यात्मकम्, संकल्पविकल्पादिलक्षणम्, संकल्पादिरूपम् (संकल्पादिकारणम्, तद्व्यापारवच्च मनः), ५५, ५८, १०१.
सत्यम् (अवश्यंभावि, कर्मफलम्), ५३.
सत्त्वम् (निश्चयात्मिका बुद्धिः), १००.
सदेकरसम् (सन्मात्रम्), ८९.
समाधानम् (योगः), १०३.
समाहितचित्तः (अविक्षिप्तचित्तः, युक्तः), ५०.
सम्यग्दर्शनम् (अविकल्पयितृमनसा ईक्षणम्), १०१.
सर्परजतोदकमलानि (रज्जुशुक्तिकोषराकाशेषु अध्यस्तानि), ८८.
सर्वकारणम्, सर्वकारणकारणम् (मूलकारणम्, यत् सर्वात्मनाऽवभासते), ५८, ६२

**सर्वबुद्धिप्रत्ययसाक्षी** (तत्तदाकारं भजमानेषु प्रत्ययेषु कूटस्थचैतन्यरूपेण तद्द्रष्टा), ६०.
**सर्वभूतान्तरात्मा** (सर्वेषामपि भूतानां साधारणः सर्वान्तर आत्मा), ८७, ८९.
**सर्वविशेषप्रत्यस्तमितस्वरूपः** (सर्वविधविशेषरहितः), ६०.
**सर्वव्यवहारगोचरातीतम्** (धर्माधर्मकालकार्यकारणभावाद्यतीतम्), ४१.
**सर्वानर्थबीजम्** (अज्ञानम्), ६१.
**सर्वान्तरः** (मुख्यात्मा), ६१.
**साक्षादवगमः, साक्षादनुभवः, साक्षाद्विज्ञानम्** (अयमहमिति ब्रह्मात्मतानुभवः), ४६, ६९, ८९.
**साध्यसाधनलक्षणम्** (पुत्रकर्मोपासनारूपसाधनम्, मनुष्यपितृदेवलोकरूपं साध्यं च), २३.
**सामान्यविज्ञानम्** (चित्स्वरूपम्), ४७.
**सुषुम्ना** (उपासकानां मोक्षसाधनार्थं द्वारभूता नाडी), १०९.
**सूक्ष्मत्वादि** (सूक्ष्मत्वमहत्त्वविशुद्धत्वनित्यत्वानि), ५०, ६२.
**सोपाधिकः** (अस्तित्वोपाधिविशिष्ट आत्मा), १०५.
**स्वभावः** (प्रकृतिः, निसर्गः), ६६; (स्वरूपम्), ६६.
**स्वयम्भूः** (स्वातन्त्र्येण यो भवति), ६६.
**स्वर्गलोकः** (प्रजापतिलोकः), १६, १७, २२.
**स्वात्मप्रवृत्तिसाक्षिभूतम्** (कार्यकरणसंघातप्रवृत्तिसाक्षिभूतम्), ९५.
**स्वात्मन्यध्यस्ता** (अविद्या), ८८.
**स्वाभाविकम्** (अविचारितसिद्धम्, अज्ञानम्), २३; (निसर्गजो धर्मः), ६७.
**स्वार्थः** (स्वतन्त्रः, यदर्थमन्यव्यापारः), ८४.
**हार्दाकाशः, हृदयपुण्डरीकाकाशः, हृदयाकाशः** (यस्मिन् ब्रह्म उपलभ्यते), ५३, ८२, ८९.
**हिरण्यगर्भः** (प्रथमजो ब्रह्मा), २०, ७१, ७२.
**हैरण्यगर्भं तत्त्वम्** (महत्तत्त्वम्), ५८.
**हैरण्यगर्भं पदम्** (ब्रह्मणः स्थानम्), ३८.

-:-

अध्यात्मप्रकाशमुद्रणालयः, होळेनरसीपुरम्.
१५-७-१९६२—१०००.

# THE ADHYATMA PRAKASHA KARYALAYA.

( Established 1920 )

## HOLENARSIPUR.

HASSAN DIST. MYSORE STATE. (S. Ry.)

An Institution to help the interpretation of Indian Culture by stimulating the study and practice of the Adhyatma Vidya — Philosophy and Religion in its universal aspect — especially as revealed in the Upanishads and allied literature.

1. Has so far published more than A HUNDRED BOOKS in Kannada, Sanskrit and English.

2. Arranges for frequent DISCUSSIONS. DISCOURSES, and PUBLIC LECTURES. VEDANTA CLASSES in the morning, form a regular feature.

3. Has a free lending LIBRARY and a READING ROOM for the public.

4. Conducts a Kannada Monthly Magazine called the "ADHYATMA PRAKASHA", devoted to Jnana, Bhakti and Vairagya.

5. Maintains a VEDANTIC COLLEGE with the object of training up model students who regard the spread of Vedantic ideas as their goal in life.

**Please apply to the Manager for fuller information.**